ko hyanyastvāmṛte śambho bhavavyādhibhiṣagguruḥ//

सविशेषमित्यादि। सावशेषम् अवशेषपर्यन्तम्। आमूलात् मूलमारभ्य। त्वामृते त्वां विना। भवव्याधिभिषग्गुरुः जन्मरूपस्य व्याधेश्चिकित्सकराजः।

---

without Śakti or Śakti without Brahman. Worship of Brahman is directed towards Brahman as united with Śakti and worship of Śakti is directed towards Śakti as united with Brahman. Therefore the worship of Brahman and worship of Śakti are one and the same. The being so the fruit to be gained by Brahmasādhana is the same as that to be gained by Śākti-sādhana.

1. Dhyāna.
2. Pūjā.

O Śambhu[1]! who but Thee, Lord among Physicians of earthly ills,[2] is fit to speak of it, from its beginning to its end, and in all its detail agreeable as it is to Me and beneficent to all humanity?.

इति देव्या वचः श्रुत्वा देवदेवो महेश्वरः।
उवाच परया प्रीत्या पार्वतीं पार्वतीपतिः।। ८।।

iti devyā vacaḥ śrutvā devadevo maheśvaraḥ/
uvāca parayā prityā pārvatīṁ pārvatīpatiḥ//

इतीत्यादि। उवाच उत्तरमिति शेषः।

Hearing the words of the Devī, the Deva of Devas, Husband of Pārvatī,[3] was delighted, and spoke to Her thus :

श्रीसदाशिव उवाच

शृणु देवि महाभागे तवाराधनकारणम्।
तव साधनतो येन ब्रह्मसायुज्यमश्नुते।। ९।।

śrīsadāśiva uvāca

śṛṇu devi mahābhāge tavārādhanakāraṇam/
tava sādhanato yena brahmasāyujyamaśnute//

पार्वतीपतिः पार्वतीं किमुत्तरमुवाचेत्यपेक्षायामाह शृणु देवीत्यादि। हे देवि हे महाभागे महाभाग्यशालिनि येन कारणेन तव साधनतो जनो ब्रह्मसायुज्यं ब्रह्मत्वमश्नुते लभते तन्मया कथ्यमानं तवाराधनकारणं त्वं शृण्वित्यन्वयः।

Śrī Sadāśiva said :

Listen, O Thou of high fortune and destiny, to the reasons why Thou shouldst be worshipped, and how thereby the individual becomes united with the Brahman[4].

---

1. A name of Śiva; from Śam (happiness, bliss, beatitude,) and bhū (to be). He Who is and grants happiness.
2. Bhava-vyādhi. The means both the ill of existence itself and ills flowing therefrom. The ill of existence to those on the Nivṛti path is repeated birth and death. From this root other ills follows.
3. Daughter of Parvata, the mountain Himālaya. A name of the Devī.
4. Here is given the reason why the Sādhana of the Parameśvarī leads to Brahmasāyujya, namely, that Her Svarūpa is that of the Brahman since they are essentially one.

त्वं परा प्रकृतिः साक्षाद् ब्रह्मणः परमात्मनः।
त्वत्तो जातं जगत् सर्वं त्वं जगज्जननी शिवे।। १०।।

tvaṁ parā prakṛtiḥ sākṣād brahmaṇaḥ paramātmanaḥ/
tvatto jātaṁ jagat sarvaṁ tvaṁ jagajjananī śive//

अथ परमेश्वरीसाधनस्य ब्रह्मसायुज्यजनकत्वे तद्गतं ब्रह्मसारूप्यमेव कारण-मस्तीत्यभिधातुमुपक्रमते त्वं परा प्रकृतिरित्यादि। यत इति शेषः। परमा माया शक्तिर्वा यस्य स परमः अतति सर्वं व्याप्नोतीत्यात्मा परमाश्चासावात्मा चेति परमात्मा तस्य परमात्मनो ब्रह्मणो यतस्त्वं साक्षात् पराऽत्युत्कृष्य प्रकृतिरसीत्येवमन्वयः कार्य्यः।

Thou art the very Parā Prakṛti[1] of Brahman the Paramātmā,[2] and from.Thee has sprung the whole Universe—O Śiva—its Mother[3].

---

1. The Parā (Supreme) Prakṛti and Paramātmā or Supreme Consciousness are united as one.
2. Paramātmā. Bhāratī expalins the word as follows : Parama=he Who is possesses of the Supreme Māyā or Śakti; and Ātmā = He who pervades all things. Ātmā comes from the root *At*+man. At=to spread. He who spreads is He who pervades all things (Aṭati sarvaṁ vyāpnoti, iti, Ātmā). The Ātmā which is this is the Paramātmā (parameścāsau ātmā ceti Paramātmā).
3. On this verse Tarkālaṅkāra commetns as follows : Paramātmā and Parabrahman=Turīya Brahman beyond the three Puruṣas, *viz.*, the Viśva, Virāṭ and Jāgrat state, the Taijasa, Hiraṇya-garbha and Svapna state, and the Avyākṛta, Prājña and Suṣupti state (Avasthā) of which states the Puruṣas are Abhimānī. Here Sadāśiva is describing Pārvatī who is an Aṁśa of Mūlaprakṛti inseparate from it. Turīya Brahman and Mūlaprakṛti are in direct immediate connection (Sākṣāt-sambandha, *i.e*, nothing intervenes—they are one immediately). The Sāmyāvasthā of the three Guṇas when at rest (Nidrāsthāna) or the Nirguṇa state=Mūlaprakṛti. On Kṣobha or distrubance of equilibrium of the Guṇas three arises from the Tāmasik part of Mūlaprakṛti Maheśvara and Mahākālī; from the Rājasik part Brahamā and Mahā-sarasvatī, and from the Sāttvik part Mahāviṣṇu and Mahālakṣmī. These are not in direct connection with Parabrahman but only mediately so (Paramparā-sambandha) through the medium of the Guṇas. In Pralays all Guṇas are dissolved in Mūla-prakṛti when nothing else exists and as a consequence the eternal connection between Brahman and Mūlaprakṛti is established. At the time of Kṣobha of the Guṇas, the latter appear separately and Prakṛti takes on two aspects—the pure (Viśuddha) and non-pure (Malina). The

महदाद्यणुपर्यन्तं यदेतत् सचराचरम्।
त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत्।। ११।।

mahadādyaṇuparyantaṁ yadetat sacarācaram/
tvayaivotpāditaṁ bhadre tvadadhīnamidaṁ jagat//

महत्तत्त्वमादिर्यस्य तन्महदादि।

O gracious One ! whatever there is in this world, of things which have and are without motion, from Mahat[1] to an atom, owes its origin to and is dependent on Thee.

त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः।
त्वं जानासि जगत् सर्वं न त्वां जानाति कश्चन।। १२।।

tvamādyā sarvavidyānāmasmākampi janmabhūḥ/
tvaṁ jānāsi jagat sarvaṁ na tvāṁ jānāti kaścana//

---

first is Parā-Prakṛti, Vidyā, or Māyā and the second is Aparā-Prakṛti Avidyā or Ajñāna. The Caitanya to which is ascribed (Upahita) Parā-prakṛti is the omnipotent, omniscient Īśvara or Śiva, and the Caitanya to which Aparāprakṛti is ascribed is Ajñāna, Jīva. And so the Pañcadaśī says (I, 15-17) "Prakṛti which is Sattva-Rajas-Tamo Guṇa is of two kinds, being according to the purity or non-purity of Sattva (Prakāśātmaka) guṇa, Māyā or Avidyā. The Cidātmā reflected on Māyā and controlling Her is the Omniscient Īśvara. The Cidātmā reflected on Avidyā and subservient to it by reason of her diversity (Vaicitrya) becomes many as Jīvas.

1. Mahādadi, the Tatta Mahat, and the others of the Sāṅkhya-Philosophy. This word does not, as it sometimes supposed, mean "great" (mahat), but is derived from the Vedic "Mahas," or "Maghas," which means "Jyotiḥ" or "Light". (*Sāṅkhya Darśana* by Umeśa Candra Batavyāla.) Tarkālaṅkāra says : From Prakṛti originated Mahat-Tattva; from Mahat Ahaṅkāra : From Ahaṅkāra the eleven Indriyas and the five Tanmātrās and from the latter the five Mahābhūtas. These are the 24 Tattvas of the Sāṅkhya Darśana. Combination of substance (Yaugika sṛṣṭi) does not produce any new Tattvas. In the case of the earth and jar and gold and ornament thre is no difference in substance. The process according to Tantra is extremely wonderful so much so that the knowing of it produces Divyajñāna. It is not ossible however to explain it in a short compass. The Nyāya and Sāṅkhya are not so subtle as this. The philosophers differe but the Tāntrik doctrine conflicts with none. He who desires to know it and get thereby a glimpse of the Brahman should get instruction in the Uttara Āmnāya from a good Guru; he will then gain the highest end of man.

किञ्च त्वमाद्येत्यादि। आद्या आदिभूता। नत्वन्येषामेव जगतां जननी त्वमसि किन्त्वस्माकं शङ्करादीनामपि जन्मभूरुत्पत्तिस्थानं त्वम्। जगज्जननीत्वात् सर्वं जगत् त्वं जानासि। त्वत्तो जातत्वात् कश्चन अपि त्वां तु न जानाति।

Thou art the Origin of all the manifestations[1]; Thou art the birth-place of even Us[2]; Thou knowest the whole world, yet none know Thee.

त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी।
धूमावती त्वं वगला भैरवी छिन्नमस्तका।। १३।।

tvaṁ kālī tāriṇī durgā ṣoḍaśī bhuvaneśvarī/
dhūmāvatī tvaṁ vagalā bhairavī chinnamastakā//

किञ्च त्वं कालीत्यादि।

त्वमन्नपूर्णा वाग्देवी त्वं देवी कमलालया।
सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः।। १४।।

tvamannapūrṇā vāgdevī tvaṁ devī kamalālayā/
sarvaśaktisvarūpā tvaṁ sarvadevamayī tanuḥ//

वाग्देवी सरस्वती। कमलालया लक्ष्मीः। तनुः तवेति शेषः।

Thou art Kālī, Tāriṇī,[3] Durgā, Ṣoḍaśī, Bhuvaneśvarī, Dhūmāvatī. Thou art Bagalā, Bhairavī, and Chinnamastakā.[4] Thou art Anna-purṇā,[5] Vāgdevī,[6] Kamalālayā.[7] Thou art in the form of all the Śaktis[8] and Thou pervadest the bodies of all the Devas.

---

1. That is, primarily the Daśa-Mahāvidyā. The Devī as Kālī, Tārā, Cahinnamastā, Dhūmāvatī, Ṣoḍaśī, Bhuvaneśvarī, Bagalā, Kamalā, Mātaṅgī, Bhairavī.
2. Brahmā, Viṣṇu, and Śiva. These are forms of and subordinate to the Great Mother assumed for the purpose of creation and so forth.
3. Tāriṇī is Tārā; Durgā is another manifestation of the same Devī.
4. See A. and Ellen Avalon's *Hymns to the Goddess.*
5. The Devī as Dispenser of food; an aspect addressed by Śaṅkarācārya as the Devī bountiful.
6. Devī of speech, wisdom, knowledge, science, art, eloquence, music that is, Sarasvatī, Śakti of Brahmā.
7. Lakṣmī, spouse of Viṣṇu, "Who lives in the lotus".
8. The energy of active power of a Deva, worshipped as His wife under

त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी।
निराकाराऽपि साकारा कस्त्वां वेदितुमर्हति।। १५।।

tvameva sūkṣmā sthūlā tvaṁ vyaktāvyaktasvarūpiṇī/
nirākārā'pi sākārā kastvāṁ veditumarhati//

त्वमित्यादि। सूक्ष्मा परमाणुरूपा। स्थूलरूपत्वात् व्यक्तम् परमाणुरूपत्वाच्चाव्यक्तं स्वं रूपं विद्यते यस्याः तथात्वम्। वस्तुतो निराकाराऽपि आकृतिशून्याऽपि त्वं साकारा आकारविशिष्य भवसि। अतः त्वां वेदितुं ज्ञातुं कोऽर्हति योग्यो भवति न कोऽपीत्यर्थः।

Thou art both subtle[1] and gross, manifested and veiled, though in Thyself formless, yet Thou hast form. Who can understand Thee ?[2]

उपासकानां कार्यार्थं श्रेयसे जगतामपि।
दानवानां विनाशाय धत्से नानाविधास्तनूः।। १६।।

upāsakānāṁ kāryārthaṁ śreyase jagatāmapi/
dānavānāṁ vināśāya dhatse nānāvidhāstanūḥ//

ननु वस्तुतो यदि निराकारैवाहं तर्हि किमर्थं नानाविधमाकारं दधामि तत्राह उपासकानामित्यादि।

---

various names. Each Deva necessarily has His Śakti. See Woodroffe's *Śakti and Śakta* and *Garland of Letters.*

1. Sūkṣmā; subtle as the Paramāṇu and therefore Avyaktā. As gross She is Vyaktā.
2. Bhagavatī as Mūlaprakṛti is subtile (Sūkṣmā) unmanifest (Avyaktā), and formless (Nirākārā). As Śakti appearing (Āvirbhūtā) from out of Mūlaprakṛti; as the threefold Nāda or Mahat-Tattva issuing from Śakti; as the threefold Bindu or the three Ahaṅkāras (Sāttvika, Rājasika, Tāmasika or Vaikārika, Taijasa, Bhūtādika) issuing from the threefold Nāda; as Śabdajñāna, Sparśajñāna, Rūpajñāna, Gandhajñāna (of the Apañcīkṛta Tanmātras) issuing from Sāttvika Ahaṅkāra; as Śabdaśakti, Sparśa-śakti, etc., (of the same) issuing from Rājasika Ahaṅkāra; as Śabdaśakti, Sparśa-śakti, etc., (of the same) issuing from Rājasika Ahaṅkāra; as the Apañcīkṛta Tanmātras issuing from Tāmasika Ahaṅkāra; as the Bhūtas and their compounds which make up clay and so forth—She is Vyakta, Sthūlā and Sākārā (Tarkālaṅkāra). According to Rāghava Bhaṭṭa *(Śāradā-Tilaka,* I, 19, 20) the Devas issue from Vaikārika-Ahaṅkāra, the Indriyas from the Rājasika and the Tanmātras from Bhūtādika. Nirākārā and the other first mentioned terms are apparently used in a relative sense.

For the helping of the worshipper, the good of the world, and the destruction of the Dānavas,[1] Thou dost assume various forms[2].

चतुर्भुजा त्वं द्विभुजा षड्भुजाऽष्टभुजा तथा।
त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी।। १७।।

caturbhujā tvaṁ dvibhujā ṣaḍbhujā'ṣṭabhujā tathā/
tvameva viśvarakṣārthaṁ nānāśastrāstradhāriṇī//

Thou art four-armed, two-armed, six-armed, and eight-armed, and holdest various missiles and weapons for the protection of the Universe[3].

तत्तद्रूपविभेदेन मन्त्रयन्त्रादिसाधनम्।
कथितं सर्वतन्त्रेषु भावाश्च कथितास्त्रयः।। १८।।

tattadrūpavibhedena mantrayantrādisādhanam/
kathitaṁ sarvatantreṣu bhāvāśca kathitāstrayaḥ//

ता नानाविधास्तनूरेव दर्शयन्नाह चतुर्भुजेत्यादि।

In various Tantras I have spoken of the Sādhana of different Mantras[4] and Yantras,[5] and the like appropriate to the respective different forms assumed by Thee as also to the three different dispositions of men[6].

पशुभावः कलौ नास्ति दिव्यभावोऽपि दुर्लभः।
वीरसाधनकर्म्माणि प्रत्यक्षाणि कलौ युगे।। १९।।

paśubhāvaḥ kalau nāsti divyabhāvo'pi durlabhaḥ/
vīrasādhanakarmmāṇi pratyakṣāṇi kalau yuge//

In this Kali Age there is no Paśu-bhāva; Divyabhāva is

---

1. A class of Asuras, sons of Danu, daughter of Dakṣa and Kaśyapa, There are sixty-one, of which eighteen are principal.
2. Here the question "If I am in reality formless (Nirākārā) then why do I assume different forms?" is anticipated and answered.
3. Gives some of the forms assumed by the Devī.
4. See Woodroffe's *Śakti and Śākta* and *Garland of Letters.*
5. Diagramas (see *Ibid.*)
6. That is, the Paśu, Vīra, and Divya dispositions (see *ibid.*).

difficult of attainment, but the practices relating to Vīra-sādhana[1] yield visible fruit.

कुलाचारं विना देवि कलौ सिद्धिर्न जायते।
तस्मात् सर्वप्रयत्नेन साधयेत् कुलसाधनम्।। २०।।

kulācāraṁ vinā devi kalau siddhirna jāyate/
tasmāt sarvaprayatnena sādhayet kulasādhanam//

In this Kali Age, O Devī! success is achieved by Kauli a worship[2] alone, and therefore should it be performed with every care.

कुलाचारेण देवेशि ब्रह्मज्ञानं प्रजायते।
ब्रह्मज्ञानयुतो मर्त्त्यो जीवन्मुक्तो न संशयः।। २१।।

kulācāreṇa deveśi brahmajñānaṁ prajāyate/
brahmajñānayuto marttyo jīvanmukto na saṁśayaḥ//

अथ पशुभावादिप्रसङ्गात् कलौ युगे वीरभावस्यैव विद्यमानत्वेन प्रत्यक्षफल-दायकानि वीरसाधनकर्माण्येव साधनीयानीत्येवाह पशुभाव इत्यादिभिः।

By it, O Devī! is acquired knowledge of Brahman, and the mortal who has gained it, is of a surety whilst living[3] freed from future births and exonerated from the performance of all religious rites.

ज्ञानेन मेध्यमखिलममेध्यं ज्ञानतो भवेत्।
ब्रह्मज्ञाने समुत्पन्ने मेध्यामेध्यं न विद्यते।। २२।।

jñānena medhyamakhilamamedhyaṁ jñānato bhavet/
brahmajñāne samutpanne medhyāmedhyaṁ na vidyate//

मेध्यम् पवित्रम्।

According to human knowledge the same thing appears to

1. The worship suited to men in whom the passionate Guṇa (Rajas) prevails. See as to this passage Introduction to Vol VI, *Tāntrik Texts*. Tarkālaṅkāra's note is that as in the Kaliyuga Vīrabhāva alone exists, the rules of Vīrasādhana alone yield immediate fruit and should be practised.
2. Kulācāra.
3. Jīvanmukha.

be pure and same impure,[1] but when Brahma-jñāna has been acquired there is nothing either pure or impure.

यो जानाति परं ब्रह्म सर्वव्यापि सनातनम्।
किमस्त्यमेध्यं तस्याग्रे सर्वं ब्रह्मेति जानतः।। २३।।

yo jānāti paraṁ brahma sarvavyāpi sanātanam/
kimastyamedhyaṁ tasyāgre sarvaṁ brahmeti jānataḥ//

For to him who knows that the Brahman is in all things and eternal, what is there that can be impure?

त्वं सर्वरूपिणी देवी सर्वेषां जननी परा।
तुष्टायां त्वयि देवेशि सर्वेषां तोषणं भवेत्।। २४।।

tvaṁ sarvarūpiṇī devī sarveṣāṁ jananī parā/
tuṣṭāyāṁ tvayi deveśi sarveṣāṁ toṣaṇaṁ bhavet//

य इति। सनातनम् सर्वदैकरूपम्।

Thou art in the form of all, and above all Thou art the Mother of all. If Thou art pleased, O Queen of the Devas! then all are pleased[2].

सृष्टेरादौ त्वमेकाऽऽसीत् तमोरूपमगोचरम्।
त्वत्तो जातं जगत् सर्वं परब्रह्मसिसृक्षया।। २५।।

sṛṣṭerādau tvamekā''sīt tamorūpamagocaram/
tvatto jātaṁ jagat sarvaṁ parabrahmasisṛkṣayā//

अगोचरम् आकृतिशून्यत्वात् वाङ्मनसयोरप्यविषयभूतम्।

Before the Beginning of things Thou didst exist in the form

---

1. For him who is endowed with Brahma-jñāna, who sees the Brahman in everything, there is no distinction.
Jñānena medhyam akhilam amedhyaṁ jñānato bhavet,
Brahma-jñāne samutpanne medhyāmedhyaṁ na vidyate.
2. The Devī exists in the form of all things (Sarvarūpiṇī) and is the true nature of all things (Sarvasvarūpā). As Mūlaprakṛti She is the Mother (Jananī) of all. She is Viśva Virāṭ, Taijasa Hiraṇyagarbha, Avyākṛta Prājña and Avyakta. She is the Root of the whole universe. As by watering the roots, the branches, leaves, flower and fruits of a tree are nourished, in the same way if She is pleased then Brahmā, Viṣṇu and others are all pleased (Tarkālaṅkāra).

of Tamas which is beyond both speech and mind, and of Thee by the creative desire of the Supreme Brahman was the entire Universe born[1].

महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत्।
निमित्तमात्रं तद्ब्रह्म सर्वकारणकारणम्।। २६।।

mahattattvādibhūtāntaṁ tvayā sṛṣṭamidaṁ jagat/
nimittamātraṁ tadbrahma sarvakāraṇakāraṇam//

महदित्यादि। भूतान्तं पृथिवीपर्य्यन्तम्। सर्वकारणकारणम् सर्वेषां महदादीनां कारणानामपि कारणं निमित्तभूतम्।

---

1. The *Maitrī Upaniṣad* (v. 52) says : Tamo vā idaṁ agra āsīt : tatpara syāt : tatpareṇeritaṁ : viṣamatvaṁ prayāti : etad vai rajas : tadrajaḥ khalvīritam viṣamatvaṁ prayāti : etad vai sattvasya rūpaṁ: tat sattvaṁ eva īritaṅg rasaḥ.
Verily this was at first Tamas alone. It abode in the Supreme. Then being set in motion by the Supreme it passes into inequality (loss of equilibrium). This is Rajas. This Rajas being moved passes into inequality. Then is the form of (or condition which is) Sattva. This Sattva being set in motion there is Rasa (Rasa = Cidānandaprakāśa). On this Tarkālaṅkāra says that the word Tamas here means Mūla-prakṛti : that is at the time of Pralaya (Dissolution) Tamo-Guṇa retracts (Saṁhāra) the whole world. Then Sattva-Guṇa as manifested is merged in Rajas and Rajas in Tamas which alone remains and then merges in Mūlaprakṛti. By this I understand him to mean that Rajas works to suppress Sattva which becomes latent to bring into full action Tamas when all manifestation ceases. Then before the beginning of the next "Creation" or Production (Sṛṣṭi) there is stir (Kṣobha) in the Guṇas of Prakṛti. Tamo Guṇa appears first : then Rajas : then Sattva. In the *Sārada* this Tamas has been called Śakti : *cf.* "Eternal Śiva is Nirguṇa and Saguṇa. The first is He who is Prakṛter anyaḥ or the other of Prakṛti", that is, "He and She are one but here He is considered as other than Her. (Rāghava Bhaṭṭa says Prakṛteḥ is used in the genitive not ablative case). Saguṇa is He who is with Kalā (that is, Mūlaprakṛti). From Paramaśiva who is Saccidānanda and Sakala issued Śakti, from Śakti issued Nāda and from Nāda Bindu". Here the Paramaśiva who is united with Kalā or Mūla-prakṛti Śakti is Tamo Guṇa. Some also call it Mūla Ajñāna. By Nāda is meant Mahat-tattva which is threefold according to the Guṇas. These three Nādas are Avyakta Maheśvara, Avyaka Brahmā and Avyakta Viṣṇu.

This Universe, from Mahat,[1] down to the gross elements,[2] has been created by Thee, since Brahman, Cause of all causes, is but the efficient Cause[3].

सदूपं सर्वतोव्यापि सर्वमावृत्य तिष्ठति।
सदैकरूपं चिन्मात्रं निर्लिप्तं सर्ववस्तुषु।। २७।।

sadrūpaṁ sarvatovyāpi sarvamāvṛtya tiṣṭhati/
sadaikarūpaṁ cinmātraṁ nirliptaṁ sarvavastuṣu//

सदूपमित्यादि। सदूपं सर्वदा स्थायिस्वरूपम्। सर्वमावृत्य निश्शेषं पदार्थमावेष्ट्य सर्ववस्तुषु स्थितमपि निर्लिप्तमसम्बद्धम्।

It is Pure Being, Changeless, Omnipresent, Pure Consciousness unattached to,[4] yet existing in all things.

न करोति न चाऽश्नाति न गच्छति न तिष्ठति।
सत्यं ज्ञानमनाद्यन्तमवाङ्मनसगोचरम्।। २८।।

na karoti na cā'śnāti na gacchati na tiṣṭhati/
satyaṁ jñānamanādyantamavāṅmanasagocaram//

नेत्यादि। न चाश्नाति न च भुङ्क्ते। सत्यम् यथार्थस्वरूपम्। ज्ञानं समस्त-पदार्थावबोधः तत्स्वरूपम्। अनाद्यन्तम् च विद्यते आदिः कारणम् अन्तो नाशश्च यस्य तथाभूतम्।

It acts not, neither does It enjoy. It moves not, neither is It motionless. It is true Being[5] and Consciousness, without beginning or end, Ineffable and Incomprehensible.[6]

---

1. Mahat-Tattva. This is the cosmic stuff of experience. See not to v.11, *ante*.
2. Earth, Water, Fire, Air and Ether.
3. Nimitta—that is, Instrumental or Efficient Cause, as opposed to Upādāna or Material Cause. Prakṛti is the latter, whilst Puruṣa is the former. Prakṛti cannot move without the Puruṣa. The proximity of the latter affects the Rajo guṇa or stirring passionate quality in Prakṛti, and with this stirring the Evolution of matter commences. Under the influence of the gaze of Puruṣa, Prakṛti commences the world-dance.
4. Nirlipta, as a drop of water of the lotus-leaf. The creator unlike the creature is not affected by His Māyā.
5. Satya : that is, as Hariharānanda says, Yathārthasvarūpaṁ; that is, as I is in Itself, the true, that is, lasting Reality.
6. Parama-brahma is not creator and has no activity. Prakṛti like iron

तदिच्छमात्रमालम्व्य त्वं महायोगिनी परा।
करोषि पासि हंस्यन्ते जगदेतच्चराचरम्।। २९।।

tadicchāmātramālamvya tvaṁ mahāyoginī parā/
karoṣi pāsi haṁsyante jagadetaccarācaram//

Thou the Supreme Yoginī[1] dost, moved by His mere desire,[2] create, protect, and withdraw this world with all that moves and is motionless therein.

तव रूपं महाकालो जगत्संहारकारकः।
महासंहारसमये कालः सर्वं ग्रसिष्यति।। ३०।।

tava rūpaṁ mahākālo jagatsaṁhārakārakaḥ/
mahāsaṁhārasamaye kālaḥ sarvaṁ grasiṣyti//

तदित्यादि। तदिच्छमात्रम् परब्रह्मण इच्छामेव। अन्ते प्रलयकाले।

Mahākāla,[3] the Dissolves of the Universe, is Thy form. At the Dissolution of things, it is Kāla Who will devour all.

कलनात् सर्वभूतानां महाकालः प्रकीर्त्तितः।
महाकालस्य कलनात् त्वमाद्या कालिका परा।। ३१।।

kalanāt sarvabhūtānāṁ mahākālaḥ prakīrttitaḥ/
mahākālasya kalanāt tvamādyā kālikā parā//

कलनादित्यादि। कलनात् ग्रसनात्।

---

moved by the magnet (Puruṣa) creates, upholds, and dissolved by the mere presence of Parama-Brahma. The proximity of the spring season is the mere efficient (Nimita mātra) of the blossoming of the leaves and flowers on the trees. In the same way the Supreme Brahman is the mere efficient in creation and so forth, the three Guṇas being the material cause (Upādānakāraṇa)—Tarkālaṅkāra.

1. Mahā-yoginī : Mahā-yoginī is a title of Śiva. Yoginī is derived from Yoga Śabda with the suffix *nin*. Here Yoga means the collectivity of all that is. Yoginī is She who shines therein (see commentary to v. 2, ch. IV, *Yoginīhṛdaya*). That commentary says that Yoginī is Tripura-sundarī who is Svasamvit. Her redness is Her Vimarśa.
2. Icchā.
3. A Tāmasik form of Śiva as He who dissolves all, under which He is represented as of a black colour of terrific aspect. The term comes from Mahā=Great, and Kāla=to swallow.

And by reason of this[1] He is called Mahākāla, and since Thou devourest Mahā-Himself, it is Thou who art the Supreme Primordial Kālikā.[2]

कालसंग्रसनात् काली सर्वेषामादिरूपिणी।
कालत्वादादिभूतत्वादाद्या कालीति गीयते।। ३२।।

kālasaṅgrasanāt kālī sarveṣāmādirūpiṇī/
kālatvādādibhūtatvādādyā kālīti gīyate//

आदिरूपिणी कारणस्वरूपा।

Because Thou devourest Kāla, Thou art Kālī, because Thou art the Origin of and devourest all things Thou art called the Ādyā Kālī[3].

पुनः स्वरूपमासाद्य तमोरूपं निराकृतिः।
वाचातीतं मनोगम्यं त्वमेकैवाऽवशिष्यसे।। ३३।।

punaḥ svarūpamāsādya tamorūpaṁ nirākṛtiḥ/
vācātītaṁ manogamyaṁ tvamekaivā'vśiṣyase//

पुनरित्यादि। निराकृति आकारशून्यम्। वाचातीतम् अतिक्रान्तवाक्। मनोऽगम्यम् मनसोऽप्यप्राप्यम्।

Resuming after dissolution Thine own nature, dark and, formless,[4] ineffable and inconceivable Thou alone remainest as the One.

साकाराऽपि निराकारा मायया बहुरूपिणी।
त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका।। ३४।।

sākārā'pi nirākārā. māyayā bahurūpiṇī/
tvaṁ sarvādiranādistvaṁ kartrī hartrī ca pālikā//

साकारेत्यादि। सर्वादिः सर्वेषां कारणभूता सर्वकारणत्वादेव न विद्यते आदिः कारणं यस्यास्तथाभूता त्वमसि।

1. Kalanāt sarva-bhūtānāṁ=by reason His devouring all gross or material existence.
2. Ādyā Kālikā.
3. Primeval Kālī. Mūlaprakṛti united with Turīya Brahman is worshipped as Ādyā Kālī (Tarkālaṅkāra).
4. Her Svarūpa is Tamorūpa.

Though having a form, yet art Thou formless; though Thyself without beginning, multiform by the power of Māyā,[1] Thou art the Beginning of all, Creatrix, Protectress, and Destructress that Thou art.

अतरते कथितं भद्रे ब्रह्ममन्त्रेण दीक्षितः।
यत्फलं समवाप्नोति तत्फलं तव साधनात्।। ३५।।

atarate kathitaṁ bhadre brahmamantreṇa dīkṣitaḥ/
yatphalaṁ samavāpnoti tatphalaṁ tava sādhanāt//

तव साधनतो ब्रह्मत्वलाभे इदमेव कारणमस्तीत्याह अत इत्यादिना।

Hence it is, O Gentle One! that I have said to Thee that whatsoever fruit is attained by the initiate in the Brahma-Mantra, the same may be had by the Sādhana of Thee.

नानाऽऽचारेण भावेन देशकालाधिकारिणाम्।
विभेदात् कथितं देवि कुत्रचिद्गुप्तसाधनम्।। ३६।।

nānā''cāreṇa bhāvena deśakālādhikāriṇām/
vibhedāt kathitaṁ devi kutracidguptasādhanam//

अथ साधनं केन वर्त्मनेति मदीयं साधनं परं कीदृशं वर्त्तते इति च यत् परमेश्वर्य्या पृष्टं तत्र मत्कथितेनैव मार्गेण सर्वं कर्म साधनीयं मदुक्तवर्त्मना नित्यनैमित्तिककर्मणां यत् साधनं तदेव तावकीनं साधनमित्युत्तरं दातुमुपक्रमते नानाचारेणेत्यादि। नानाभावेन च। विभेदात् विशेषात्। कुत्रचित् तन्त्रादिषु।

According to the differences in place, time, and capacity of the worshippers I have, O Devī! spoken of Sādhana suited to the mode of life governing them and their dispositions[2].

---

1. By and of which the universe is created.
2. All men are not to follow the same form of Sādhana; as men differ in their character and ability so does the Sādhana. It is useless to presribe a high Vedāntik Sādhana for an ignorant and untrained intellect, what is prescribed for it is what it can understand and carry out. There are therefore differences in Ācāra, that is, the Rules governing conduct, way of life such as Veda, Vaiṣṇava and Śaiva Ācāras. There are also differences of disposition (Bhāva) namely Paśu, Vīra and Divya. Thus no Paśu is component for Gupta-Sādhana or the secret ritual, the form of Sādhana must be determined after referenceto all the circumstances of the particular case. This is the doctrine of Adhikāra or competency. See note 1, p. 137.

ये यत्राधिकृता मर्त्यास्ते तत्र फलभागिनः।
भविष्यन्ति तरिष्यन्ति मानुषा गतकिल्विषाः।। ३७।।

ye yatrādhikṛtā marttyāste tatra phalabhāginaḥ/
bhviṣyanti triṣyanti mānuṣā gatakilviṣāḥ//

य इति। यत्र गुप्तसाधने व्यक्तसाधने वा।

Where men perform that worship which they are competent[1] to perform, there they participate in the fruits of worship, and being freed from sin will cross the Ocean of Being.

बहुजन्मार्जितैः पुण्यैः कुलाचारे मतिर्लभेत्।
कुलाचारेण पूतात्मा साक्षाच्छिवमयो भवेत्।। ३८।।

bahujanmārjjitaiḥ puṇyaiḥ kulācāre matirlabhet/
kulācāreṇa pūtātmā sākṣācchivamayo bhavet//

अथ प्रवले कलौ युगे कुलमार्गेणैव सर्वं कर्म साधनीयमिति प्रतिपादनाय तमेव मार्गं स्तोतुमना महादेवः पूर्वं तन्मार्गवर्त्तिनं जनं प्रशंसति बहुजन्मेत्यादिभिः। साक्षाच्छिवमयः साक्षाच्छिवस्वरूपः।

By merit acquired in many previous births the mind inclines to Kaula doctrine, and he whose soul is purified by such worship himself becomes Śiva[2].

यत्रास्ति भोगबाहुल्यं तत्र योगस्य का कथा।
योगेऽपि भोगविरहः कौलस्तूभयमश्नुते।। ३९।।

yatrāsti bhogabāhulyaṁ tatra yogasya kā kathā/
yoge'pi bhogavirahaḥ kaulastūbhayamaśnute//

---

1. Ye yatrādhikṛtā martyās te tatra phala-bhāginaḥ. Thus a Vaiṣṇavā should not follow Śaiva practice, and only a Kaulika Tāntrika is privileged to perform its rites. By *yatra*, Bhāratī says, is meant either secret or overt worship. Man's mode of worship, it is said, should be according to his *Adhikāra*, or competency, and it is only if he worships within his *Adhikāra* that he will enjoy the fruit of his worship within his *Adhikāra* that he will enjoy the fruit of his worship, and thereby be freed from his sins and attain Liberation. As to Adhikāra see "Alleged Conflict of Śāstras" by Arthur Avalon, p. 224, *Śakti and Śākta*, 5th Edn., based on Bhāskararāya's commentary on the *Nityāṣoḍaśika Tantra*.
2. Bahu-janmārjitaiḥ puṇyaiḥ kulācāre matir bhavet,
Kulācāreṇa pūtātmā sākṣāt śivamayo bhavet.

यत्रेति। यत्र साधने। भोगविरहः भोगाभावः। उभयमश्नुते योगं भोगञ्च लभते।

Where there is abundance of enjoyment, of what use is it to speak of Yoga,[1] and where there is Yoga there is no enjoyment, but the Kaula[2] enjoys both[3].

एकश्चेत् कुलतत्त्वज्ञः पूजितो येन सुव्रते।
सर्वे देवाश्च देव्यश्च पूजिता नात्र संशयः।। ४०।।

ekaścet kulatattvajñaḥ pūjito yena suvrate/
sarve devāśca devyaśca pūjitā nātra saṁśayaḥ//

If one honours but one person versed in the knowledge of the essence of Kula doctrine,[4] then all the Devas and Devīs are worshipped—there is no doubt of that.

---

1. See A. Avalon's *Serpent Power.*
2. Kaula Tāntrika. See for his Ācāra the *Tantrasāra.*
3. Yatrāsti bhoga-bāhulyaṁ tatra yogasya kā kathā.
   Yoge'pi bhogavirahaḥ Kaulastūbhayam aśnute.
   This is a fundamental principle of the Tantrik method. The Kaula thus enjoys both Bhoga and Yoga, the worship being with enjoyment. Yoga is the union of Prāṇa and Apāna, of seed and ovum, of "Sun" and "Moon," of Nāda and Bindu, of Jīvātmā and Paramātmā. So also the *Rudra-yāmala* and the *Maṅgala-rāja-stava* say : "Where there is wordly enjoyment there is no Liberation; where there is Liberation, there is no worldly enjoyment. But in the case of excellent devotees of Śrīsundarī both Liberation and Enjoyment are in the hollow of their hands."
4. He who acquires divine knowledge (Brahma-tattva) becomes to longer subject to change, the bond which holds him to worldly things is cut. The Kula-tattva-jña is one versed in the knolwedge of Kula. Kula means Brahma sanātanam, as the *Kulārṇava Tantra* states : "Na kulaṁ kulamityāhuḥ kulaṁ Brahma sanātanam—" *i.e.,* by Kula is not meant family dignity, but the Sanātana Brahman. It is also said : "Kulaṁ Kuṇḍalinī śaktir Akulaṁ tu Maheśvaraḥ." Kuṇḍalī is Kula, the Maheśvara is Akula, She is Śakti and He who has mastered knowledge concerning Kuṇḍalinī is Brahma tattvajña and Brahman Itself in so far as he is a realiser. For Brahman is Caitanya United with Śakti and Kuṇḍalinī is Śakti united with Caitanya. To the understanding they are one and the same. It is only to limited knowledge that they appear to be two and separate.

पृथिवीं हेमसम्पूर्णां दत्त्वा यत् फलमाप्नुयात्।
तस्मात् कोटिगुणं पुण्यं लभते कौलिकार्चनात्।। ४१।।

pṛthivīṁ hemasampūrṇāṁ dattvā yat phalamāpnuyāt/
tasmāt koṭiguṇaṁ puṇyaṁ labhate kaulikārcanāt//

एक इत्यादि। पूजिताः तेनेति शेषः।

The merit gained by honouring a Kaulika is ten million times that which is acquired by giving away the world with all its gold.

श्वपचोऽपि कुलज्ञानी ब्राह्मणादतिरिच्यते।
कुलाचारविहीनस्तु ब्राह्मणः श्वपचाधमः।। ४२।।

śvapaco'pi kulajñānī brāhmaṇādatiricyate/
kulācāravihīnastu brāhmaṇaḥ śvapacādhamaḥ//

श्वपच इत्यादि। अतिरिच्यते उत्तमतावत्त्वाद्विशिष्यते।

A Cāṇḍāla versed in the knowledge of Kaulika doctrine excels a Brāhmaṇa, and a Brāhmaṇa who is wanting in such knowledge is beneath even a Cāṇḍāla[1].

कौलधर्म्मात् परो धर्म्मो नास्ति ज्ञाने तु मामके।
यस्यानुष्ठानमात्रेण ब्रह्मज्ञानी नरो भवेत्।। ४३।।

kauladharmmāt paro dharmmo nāsti jñāne tu māmake/
yasyānuṣṭhānamātreṇa brahmajñānī naro bhavet//

I know of no Dharma superior to that of the Kaulas, by adherence to which man attains Divine Experience[2].

सत्यं व्रबीमि ते देवि हृदि कृत्वाऽवधारय।
सर्वधर्म्मोत्तमात् कौलात् परो धर्म्मो न विद्यते।। ४४।।

satyaṁ vrabīmi te devi hṛdi kṛtvā'vadhāraya/
sarvadharmmottamāt kaulāt paro dharmmo na vidyate//

---

1. One of the degraded castes engaged in work on the cremation-ground bone-collecting, and the like. Their touch is pollution.
2. Kaula-dharmāt paro dharmo nāsti jñāne tu māmake,
Yasyānuṣṭhāna-mātreṇa Brahma-jñāni naro bhavet.
The second lines gives the reason for the ascertion made in the first. He has divine experience (Brahmajñāna).

कौलधर्मस्य सर्वधर्मोत्तमत्वे हेतुं दर्शयन्नाह यस्यानुष्ठानमात्रेणेत्यादि।

I am telling Thee the truth, O Devī! Lay it to the heart and ponder over it, There is no doctrine superior to the Kaulika doctrine, the most excellent of all.

अयन्तु परमो मार्गो गुप्तोऽस्ति पशुसङ्कटे।
व्यक्तीभविष्यत्यचिरात् संवृत्ते प्रवले कलौ।। ४५।।

ayantu paramo mārgo gupto'sti paśusaṅkaṭe/
vyaktībhaviṣyatycirāt saṁvṛtte pravale kalau//

This is the most excellent path kept hidden by reason of the crowd of Paśus,[1] but when the Kali Age advances this pathway will be revealed.

कलिकाले बृद्धे तु सत्यं सत्यं मयोच्यते।
न स्थास्यति विना कौलान् पशवो मानवा भुवि।। ४६।।

kalikāle bṛddhe tu satyaṁ satyaṁ mayocyate/
na sthāsyati vinā kaulān paśavo mānavā bhuvi//

अयमित्यादि पशुसङ्कटे पशुसमूहे। सम्बृत्ते सम्यक् प्रवृत्ते।

Verily and verily I say unto you that when the Kali Age reaches the fullness of its strength there will be no Paśus, and all men on earth will be followers of the Kaulika doctrine.

यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा।
न स्थास्यति वरारोहे तदैव प्रवलः कलिः।। ४७।।

yadā tu vaidikī dīkṣā dīkṣā paurāṇikī tathā/
na sthāsyati varārohe tadaiva pravalaḥ kaliḥ//

---

1. Men of the animal disposition in whom Tamas Guṇa prevails. See A. Avalon's *Śakti and Śakta*. A man who is Pāśa-baddha that is bound by the eight fetters (Pāśa) that is Kula, Śīla, Moha, Lajjā, Ghṛṇā, Dayā, Varṇa, Bhaya and devoid of true knowledge of the Real (Tattva-jñāna), is a Paśu. The latter is of three kinds; best (Uttama), middling (Madhyama) and low or worst (Adhama). The first are those who faithfully follow Vedācara, Vaiṣṇavācāra, and Śaivācāra and are not hostile to any Devatā. The last are those who are hostile to the Devas and act as they please in neglect of the injunctions of Dharma Śāstra. The second class are between these two. Kulamārga is Kept hidden by reason of the great number of these three classes of Paśu.

अथ तत्तद्युगविधेयाचारप्रसङ्गेन संक्षेपतः कलियुगप्रवलतालक्षणानि कथयति यदा त्वित्यादिभिः। हे वरारोहे उत्तमे।

O beauteous One![1] know that when Vedic and Purāṇic initiations cease then the Kali Age has become strong.

यदा तु पुण्यपापानां परीक्षा वेदसम्भवा।
न स्थास्यति शिवे शान्ते तदैव प्रवलः कलिः॥ ४८॥

yadā tu puṇyapāpānāṁ parīkṣā vedasambhavā/
na sthāsyati śive śānte tadaiva pravalaḥ kaliḥ//

शान्ते हे संयतचित्ते।

O Śivā ! O Peaceful One! when virtue and vice are no longer judged by the Vedic rules, then know that the Kali Age has become strong.

क्वचिच्छिन्ना क्वचिद्भिन्ना यदा सुरतरङ्गिणी।
भविष्यति कुलेशानि तदैव प्रवलः कलिः॥ ४९॥

kvacicchinnā kvacidbhinnā yadā surataraṅgiṇī/
bhaviṣyti kuleśāni tadaiva pravalaḥ kaliḥ//

सुरतरङ्गिणी गङ्गा।

O Sovereign Mistress of Kaula doctrine! when the Heavenly Stream[2] is at some places broken, and at others diverted from its course, then know that the Kali Age has become strong.

यदा तु म्लेच्छजातीया राजानो धनलोलुपाः।
भविष्यन्ति महाप्रज्ञो तदैव प्रवलः कलिः॥ ५०॥

yadā tu mlecchajātīyā rājāno dhanalolupāḥ/
bhaviṣyanti mahāprajño tadaiva pravalaḥ kaliḥ//

O wise One! when kings of the Mleccha race[3] become

---

1. *Lit.* one with beautiful hips. Vv. 46-55 give the signs (Lakṣaṇa) of the prevalence of Kali Yuga.
2. The Ganges—Gaṅgā.
3. Mleccha is a term applied to all non-Āryan peoples, such as the English, the term Ārya, according to Hindu notions, being confined to the people of Āryāvarta.

excessively covetous, then know that the Kali Age has become strong.

यदा स्त्रियोऽतिदुर्दान्ताः कर्कशाः कलहे रताः।
गर्हिष्यन्ति च भर्त्तारं तदैव प्रवलः कलिः।।५१।।

yadā striyo'tidurdāntāḥ karkaśāḥ kalahe ratāḥ/
garhiṣyanti ca bharttāraṁ tadaiva pravalaḥ kaliḥ//

When women become difficult of control, heartless and quarrelsome, and disparagators of their husbands, then know that the Kali Age has become strong.

यदा तु मानवा भूमौ स्त्रीजिताः कामकिङ्कराः।
द्रुह्यन्ति गुरुमित्रादीन् तदैव प्रवलः कलिः।।५२।।

yadā tu mānavā bhūmau strījitāḥ kāmakiṅkarāḥ/
druhyanti gurumitrādīn tadaiva pravalaḥ kaliḥ//

यदा त्वित्यादि। अतिदुर्दान्ताः अतिदुःखेन दम्यन्ते याः तथाभूताः अतिदुःखेन दमनीया इत्यर्थः। कर्कशाः कठोराः। गर्हिष्यन्ति निन्दिष्यन्ति।

When men become subject to women and slaves of lust, oppressors of their friends and Gurus,[1] then know that the Kali Age has become strong.

यदा क्षौणी स्वल्पफला तोयदाः स्तोकवर्षिणः।
असम्यक्फलिनो वृक्षास्तदैव प्रवलः कलिः।।५३।।

yadā kṣauṇī svalpaphalā toyadāḥ stokavarṣiṇaḥ/
asamyakphalino vṛkṣāstadaiva pravalaḥ kaliḥ//

स्तोकवर्षिणः स्वल्पवर्षणशीलाः।

When the fertility of the earth has gone and yields a poor harvest, when the clouds yield scanty rain, and trees give meagre fruit, then know that the Kali Age has become strong.

भ्रातरः स्वजनामात्या यदा धनकणेहया।
मिथः सम्प्रहरिष्यन्ति तदैव प्रवलः कलिः।।५४।।

1. Guru includes, besides spritual teachers, other who are deserving of respect. Thus mother and father are called Mahā-gurus, and the husband is the Mahā-guru of the wife.

bhrātaraḥ svajanāmātyā yadā dhanakaṇehayā/
mithaḥ sampraharisyanti tadaiva pravalaḥ kaliḥ//

धनकणेहया वित्तलेशाकाङ्क्षया।

When brothers, kinsmen and companions, prompted by the desire for some trifle, will strike one another, then know that the Kali Age has become strong.

प्रकटे मद्यमांसादौ निन्दादण्डविवर्ज्जते।
गूढपानं चरिष्यन्ति तदैव प्रबलः कलिः।।५५।।

prakaṭe madyamāṁsādau nindādaṇḍavivarjjite/
gūḍhapānaṁ cariṣyanti tadaiva prabalaḥ kaliḥ//

प्रकटे इत्यादि। प्रकटे प्रव्यक्ते मद्यमांसादौ निन्दादण्डविवर्ज्जितेऽपि सति यदा गूढपानं जनाश्चरिष्यन्ति तदैव प्रवलः कलिर्ज्ञातव्यः।

Even when the open partaking of flesh and liquor will pass without condemnation and punishment, yet secret drinking will still prevail, then know that the Kali Age has become strong[1].

सत्यत्रेताद्वापरेषु यथा मद्यादिसेवनम्।
कलावपि तथा कुर्यात् कुलवर्त्मानुसारतः।।५६।।

satyatretādvāpareṣu yathā madyādisevanam/
kalāvapi tathā kuryāt kulavartmānusārataḥ//

सत्यत्रेतेत्यादि। यथा मद्यादिसेवनम् प्रकाशतः कृतवानिति शेषः।

As in the Satya, Tretā, and Dvāpara Ages wine and the like[2] could be taken (openly), so they may be taken in the Kali Age in accordance with the Kaulika Dharma[3].

ये कुर्वन्ति कुलाचारं सत्यपूता जितेन्द्रियाः।
व्यक्ताचारा दयाशीला न हि तान् बाधते कलिः।।५७।।

---

1. This eating and drinking is the eating and drinking of non-Kaulas (see next verse), for the sake of animal appetite only.
2. Madyādi : That is wine, meat and the like. Hariharānanda Bhāratī says that in the first three Ages wine and the like were taken openly (Prakāśataḥ).
3. Tāntrika doctrine of the Kaulas, or Kulācāra. As to Kula see note to verse 40 *ante*.

ye kurvanti kulācāraṁ satyapūtā jitendriyāḥ/
vyaktācārā dayāśīlā na hi tān bādhate kaliḥ//

नहि तान् वाधते तान्न पीडयति।

The Kali Age cannot harm those who are purified by truth, who have conquered their passions and senses, who are open in their ways, without deceit, are compassionate and follow the Kaula[1] doctrine.

गुरुशुश्रूषणे युक्ता भक्ता मातृपदाम्बुजे।
अनुरक्ताः स्वदारेषु न हि तान् बाधते कलिः।। ५८।।

guruśuśrūṣaṇe yuktā bhaktā mātṛpadāmbuje/
anuraktāḥ svadāreṣu na hi tān bādhate kaliḥ//

गुर्वित्यादि। युक्ताः सङ्गताः। अनुरक्ताः अनुरागवन्तः।

The Kali Age cannot harm those who are devoted to the service of their Guru, to the lotus of their mothers' feet, and to their own wives.

सत्यव्रताः सत्यनिष्ठाः सत्यधर्म्मपरायणाः।
कुलसाधनसत्या ये न हि तान् बाधते कलिः।। ५९।।

satyavratāḥ satyaniṣṭhāḥ satyadharmmaparāyaṇāḥ/
kulasādhanasatyā ye na hi tān bādhate kaliḥ//

कुलसाधनसत्याः कुलसाधने यथार्थावधायिनः।

The Kali Age cannot harm those who are vowed to and grounded in Truth, adherents of the true Dharma,[2] and faithful to the performance of Kaulika rites and duties.

कुलमार्गेण तत्त्वानि शोधितानि च योगिने।
ये दद्युः सत्यवचसे न हि तान् बाधते कलिः।। ६०।।

kulamārgeṇa tattvāni śodhitāni ca yogine/
ye dadyuḥ satyavacase na hi tān bādhate kaliḥ//

तत्त्वानि मद्यमांसादीनि।

The Kali Age cannot harm those who give to the truthful

1. Tāntrika doctrine of the Kaulas, or Kulācāra.
2. Law of conduct.

Kaulika-Yogī the elements of worship,[1] which have been previously purified by Kaulika rites.

हिंसामात्सर्यरहिता दम्भद्वेषविवर्ज्जिताः।
कुलधर्म्मेषु निष्ठा ये न हि तान् बाधते कलिः।। ६१।।

hiṁsāmātsaryarahitā dambhadveṣavivarjjitāḥ/
kuladharmmeṣu niṣṭhā ye na hi tān bādhate kaliḥ//

The Kali Age cannot harm those who are free of malice, envy, hypocrisy, and hatred, and who are firm in the faith of Kaulika[2] Dharma.

कौलिकैः सह संसर्गं वसतिं कुलसाधुषु।
कुर्वन्ति कौलसेवां ये न हि तान् बाधते कलिः।। ६२।।

kaulikaiḥ saha saṁsargaṁ vastiṁ kulasādhuṣu/
kurvanti kaulasevāṁ ye na hi tān bādhate kaliḥ//

The Kali Age cannot harm those who keep the company of Kaulikas, or live with Kaulika devotees,[3] or serve the Kaulikas.

नानावेशधराः कौलाः कुलाचारेषु निश्चलाः।
सेवन्ते त्वां कुलाचारैर्न हि तान् बाधते कलिः।। ६३।।

nānāveśadharāḥ kaulāḥ kulācāreṣu niścalāḥ/
sevante tvāṁ kulācārairna hi tān bādhate kaliḥ//

The Kali Age cannot harm those Kaulikas who, whatever they may appear outwardly to be,[4] yet remain firm in their

1. Tattva : meant fish, wine, parched food, and woman after purification by the Tāntrika ritual (Śodhana).
2. *Vide ante.*
3. Sādhus, such as practise Śmaśāna-sādhana (worship in the cremation-ground), Śava-sādhana (worship seated on a scope), Latā-sādhanā, etc., are called Kula-sādhus.
4. Nānā-veṣa-dharāḥ—literally, having different dress or sectarian marks, etc. This is often understood to mean and may mean that the Vāmācārīs open professions are different from and help to conceal their adherence to, the secret doctrine. But another inner meaning is said to be, not that the Kaula is enjoined to practise hyposcirsy, but that a man way be a Śākta at heart, whatever his apparent sect may be. Thus there are Gossains who are known to be Vaiṣṇavas, but who are in fact Śākteyas. *Cf. Nityā, Tantra,* chap. iii; also *Niruttara Tantra,*

adherence to Kaula[1] Ācāra, and worship Thee according to its doctrine.

स्नानं दानं तपस्तीर्थं व्रतं तर्पणमेव च।
ये कुर्वन्ति कुलाचारैर्न हि तान् बाधते कलिः।। ६४।।

snānaṁ dānaṁ tapastīrthaṁ vrataṁ tarpaṇameva ca/
ye kurvanti kulācārairna hi tān bādhate kaliḥ//

The Kali Age cannot harm those who perform their ablutions, charities, penances, pilgrimages, devotions,[2] and offerings of water[3] according to the rules of Kulācāra[4].

जीवसेकादिसंस्काराः पितृश्राद्धादिकाः क्रियाः।
ये कुर्वन्ति कुलाचारैर्न हि तान् बाधते कलिः।। ६५।।

jīvasekādisaṁskārāḥ pitṛśrāddhādikāḥ kriyāḥ/
ye kurvanti kulācārairna hi tān bādhate kaliḥ//

हिंसेति। हिंसामात्यसर्यरहिताः प्राणवियोगानुकूलव्यापारो हिंसा अन्यशुभद्वेषो मात्सर्यम् ताभ्यां रहिताः। वसतिं निवासम्।

The Kali Age cannot harm those who perform the ten purificatory ceremonies,[5] such as the blessing of the womb,[6] obsequial ceremonies of their fathers,[7] and other rites according to Kaulika ritual.

कुलतत्त्वं कुलद्रव्यं कुलयोगिनमेव च।
नमस्कुर्वन्ति ये भक्त्या न हि तान् बाधते कलिः।। ६६।।

---

chap. i; also *Tantrasāra*, Kulācāra-Prakaraṇa, which says : "Śāktas in their heart and outwardly Śaivas, and in assemblies as Vaiṣṇavas, the Kaulas go about in this world in difference guises." The reference is made to "assemblies," because Vaiṣṇavas worship in assemblies, that is congregational worship.

1. *Vide ante.*
2. Vrata.
3. Tarpaṇa.
4. *Vide ante.*
5. Saṁskāra (see *post*, verses 83-90, and Chapter IX).
6. The Jīvaseka or Garbhādhāna ceremony, from Garbha (womb) and Ādhāna (placing upon), the placing of seed in the womb described in Chapter IX, verse 107.
7. Śrāddha (see note, ch. III, 2).

kulatattvaṁ kuladravyaṁ kulayoginameva ca/
namaskurvanti ye bhaktyā na hi tān bādhate kaliḥ//

कुलतत्त्वम् स्त्रीकुसुमादि। कुलद्रव्यम् मद्यमांसादि।

The Kali Age cannot harm those who respect the Kula-tattva, Kula-dravya[1] and Kula-yogī[2].

कौटिल्यानृतहीनानां स्वच्छानां कुलमार्गिणाम्।
परोपकारव्रतिनां साधूनां किङ्करः कलिः।। ६७।।

kauṭilyānṛtahīnānāṁ svacchānāṁ kulamārgiṇām/
paropakāravratināṁ sādhūnāṁ kiṅkaraḥ kaliḥ//

कौटिल्येत्यादि। परोपकारव्रतिनाम् परोपकाररूपं व्रतमस्त्येषामिति परोपकारव्रतिनः तेषाम्।

The Kali Age is but the slave of those who are free of all crookedness and falsehood, men of candour, devoted to the good of others, who follow Kaulika ways.

कलेर्दोषसमूहस्य महानेको गुणः प्रिये।
सत्यप्रतिज्ञकौलानां ज्ञेयः सङ्कल्पमात्रतः।। ६८।।

kalerdoṣasamūhasya mahāneko guṇaḥ priye/
satyapratijñakaulānāṁ jñeyaḥ saṅkalpamātrataḥ//

In spite of its many blemishes, the Kali Age possesses one great merit, that from the mere resolve[3] of a Kaulika if sincere, desired result ensues.

---

1. The Tattva is ordinarily used in the sense of Pañca-makāra, as in verse 60, but the commentator Bhāratī says that Kula-dravya here refers to these, and that in this context Kula-tattvas are five kinds of Tāntrika "flowers"—viz., (1) Vajra-puṣpa, (2) Svayambhūkusuma, (3) Kundapuṣpa, (4) Cola-puṣpa, (5) Sārva-kālika-puṣpa. The word "flower" is (as in English) used symbolically for the Ṛtu as to which see Chapter V, verse 174, where the meaning of (2), (3), (4), is given. Sarvakālikapuṣpa, which literally means "the flower of all seasons," is of any kind—that is, is not, as in (2), (3), (4), confined to the Ṛtu which first appears and of any particular woman. According to Kulacūḍāmaṇi No. (1) is used in drawing on a plate of gold the Yantra of Tārā.
2. Kulamārgī.
3. Saṅkalpa.

अपरे तु युगे देवि पुण्यं पापञ्च मानसम्।
नृणामासीत् कलौ पुण्यं केवलं न तु दुष्कृतम्।। ६९।।

apare tu yuge devi puṇyaṁ pāpañca mānasam/
nṛṇāmāsīt kalau puṇyaṁ karūvalaṁ na tu duṣkṛtam//

In the other Ages, O Devī! effort of will produced both religious merit and demerit, but in the Kali Age men by intention acquire merit only, and not demerit[1].

कुलाचारविहीना ये सततासत्यभाषिणः।
परद्रोहपरा ये च ते नराः कलिकिङ्कराः।। ७०।।

kulācāravihīnā ye satatāsatyabhāṣiṇaḥ/
paradrohaparā ye ca te narāḥ kalikiṅkarāḥ//

The slaves of the Kali Age, on the other hand, are those who know not Kulācāra,[2] and who are ever untruthful and the persecutors of others.

कुलवर्त्मस्वभक्ता ये परयोषित्सु कामुकाः।
द्वेष्टारः कुलनिष्ठानां ते ज्ञेयाः कलिकिङ्कराः।। ७१।।

kulavartmasvabhaktā ye parayoṣitsu kāmukāḥ/
dveṣṭāraḥ kulaniṣṭhānāṁ te jñeyāḥ kalikiṅkarāḥ//

They too are the slaves of the Kali Age who have no faith in Kulācāra,[2] who lust after others' wives, and oppress the faithful followers of Kaulika[2] doctrine.

युगाचारप्रसङ्गेन कलेः प्रावल्यलक्षणम्।
संक्षेपात् कथितं भद्रे प्रीतये तव पार्वति।। ७२।।

---

1. Apare tu yuge devī puṇyaṁ ca mānasaṁ.
Nṛṇām āsīt kalau puṇyaṁ kevalaṁ na tu duṣ-kṛtaṁ.
The Śloka is Stuti-vāda, or honorific speech and means that in former Ages men's intensions had result in good or evil as they wished, but in the present Age, whilst good intensions are quickly realised, from bad intentions evil is slow.to result; for the Kali Age, though a degraded Age, is also a favoured one. The child himself may be a weakling, but the greater its infirmities the greater the Mother's help and favours.
2. *Vide ante.* See *Kulārṇava.*

yugācāraprasaṅgena kaleḥ prāvalyalakṣaṇam/
saṅkṣepāt kathitaṁ bhadre prītaye tava pārvati//

कलेरिति। दोषसमूहस्य दोषसमूहवतः। अपरे सत्यत्रेतादौ।

In speaking of the customs of the different Ages, I have, O Gentle One! O Pārvatī ! briefly recounted to please Thee the signs of the dominance of the Kali Age.

प्रकटेऽत्र कलौ देवि सर्वे धर्म्माश्च दुर्वलाः।
स्थास्यत्येकं सत्यमात्रं तस्मात् सत्यमयो भवेत्।। ७३।।

prakaṭe'tra kalau devi sarve dharmmāśca durvalāḥ/
sthāsyatyekam satyamātraṁ tasmāt satyamayo bhavet//

When the Kali Age is made manifest, all Dharma[1] is enfeebled and Truth alone remains; therefore should one be truthful[2].

सत्यधर्म्मं समाश्रित्य यत् कर्म्म कुरुते नरः।
तदेव सफलं कर्म्म सत्यं जानीहि सुव्रते।। ७४।।

satyadharmmaṁ samāśritya yat karmma kurute naraḥ/
tadeva saphalaṁ karmma satyaṁ jānīhi suvrate//

कलेर्युगस्य प्रावल्ये सति सत्येनैव प्रव्यक्तः कुलाचारो विधातव्य इत्यभिधातुकामो महादेवः सत्यं प्रशंसिप्यन्नाह प्रकटेऽत्रेत्यादि।

O Thou Virtuous One! know this for certain, that whatsoever man does with Truth[3], that bears,[4] fruit.

न हि सत्यात् परो धर्म्मो न पापमनृतात् परम्।
तस्मात् सर्वात्मना मर्त्यः सत्यमेकं समाश्रयेत्।। ७५।।

na hi satyāt paro dharmmo na pāpamanṛtāt param/
tasmāt sarvātmanā marttyaḥ satyamekam samāśrayet//

---

1. Sarve dharmāḥ, all observances prescribed for the maintenance of the individual and community.
2. Tasmātsatyamayo bhavet; that is, should become one with Truth, realise it in all his being. Bhāratī says that in this and the following verse Mahādeva desires to say that when Kali Yuga is dominant then Kulācāra should be practised openly.
3. Satya=dharma.
4. Saphalaṁ-Karma.

नहीत्यादि। अनृतात् असत्यात्। सर्वात्मना सर्वप्रयत्नेन। आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः। समाश्रयेत् सम्यक् सेवेत।

There is no Dharma higher than Truth,[1] there is no sin greater than falsehood; therefore should man seek protection under Truth with all his soul.

सत्यहीना वृथा पूजा सत्यहीनो वृथा जपः।
सत्यहीनं तपो व्यर्थमूषरे वपनं यथा।। ७६।।

satyahīnā vṛthā pūjā satyahīno vṛthā japaḥ/
satyahīnaṁ tapo vyarthamūṣare vapanaṁ yathā//

Worship without Truth is useless, and so too without Truth is the Japa[2] of Mantras and the performance of Tapas.[3] It is in such cases just as if one sowed seed in salt earth.

सत्यरूपं परं ब्रह्म सत्यं हि परमं तपः।
सत्यमूलाः क्रियाः सर्वाः सत्यात् परतरो न हि।। ७७।।

satyarūpaṁ paraṁ brahma satyaṁ hi paramaṁ tapaḥ/
satyamūlāḥ kriyāḥ sarvāḥ satyāt parataro na hi//

Truth is the appearance of the Supreme Brahman; Truth is the most excellent of all Tapas[4]; every act is rooted in Truth. Than Truth there is nothing more excellent.

अतएव मया प्रोक्तं दुष्कृते प्रवले कलौ।
कुलाचारोऽपि सत्येन कर्त्तव्यो व्यक्तभावतः।। ७८।।

ataeva mayā proktaṁ duṣkṛte pravale kalau/
kulācāro'pi satyena karttavyo vyaktabhāvataḥ//

ऊषरे क्षारमृत्तिकायुक्तदेशे। अतएव सर्वेषां कर्म्मणां सत्यमूलत्वादेवेत्यर्थः। दुष्कृते पापिनि।

Therefore has it been said by Me that when the sinful Kali Age is dominant, Kaula ways[5] should be practised truthfully

---

1. Na hi satyāt paro dharmaḥ.
2. Recitation.
3. Austerities (see Ch. LV 21, and notes).
4. Ibid.
5. Kulācāra.

and without concealment[1].

गोपनाद्धीयते सत्यं न गुप्तिरनृतं विना।
तस्मात् प्रकाशतः कुर्यात् कौलिकः कुलसाधनम्।।७९।।

gopanāddhīyate satyaṁ na guptiranṛtaṁ vinā/
tasmāt prakāśataḥ kuryāt kaulikaḥ kulasādhanam//

हीयते हीनं भवति त्यक्तं भवतीत्यर्थः।

Truth is divorced from concealment. There is no concealment without untruth. Therefore is it that the Kaulika-sādhaka should perform his Kaulika-sāḍhana openly.

कुलधर्म्मस्य गुप्त्यर्थं नानृतं स्याज्जुगुप्सितम्।
यदुक्तं कुलतन्त्रेषु न शस्तं प्रवले कलौ।।८०।।

kuladharmmasya guptyarthaṁ nānṛtaṁ syājjugupsitam/
yaduktaṁ kulatantreṣu na śastaṁ pravale kalau//

ननु कुलधर्म्मस्य गुप्त्यर्थं नानृतं स्याज्जुगुप्सितमिति कुलतन्त्रेषु भवतैवोक्तं तत्कथमिदानीमुच्यते तस्मात् प्रकाशतः कुर्यात् कौलिकः कुलसाधनमित्यत आह। कुलधर्म्मस्येत्यादि।

What I have said in other Kaulika Tantras about the concealment of Kaulika-dharma not being blameworthy is not applicable when the Kali Age becomes strong[2].

कृते धर्म्मश्चतुष्पादः त्रेतायां पादहीनकः।
द्विपादो द्वापरे देवि पादमात्रं कलौ युगे।।८१।।

---

सन्ध्यां समाचरेन्मन्त्री तान्त्रिकीं शृणु कथ्यते।। ४४।।

vaidikīṁ tāntrikīñcaiva yathānukramayogataḥ/
sandhyāṁ samācarenmantrī tāntrikīṁ śṛṇu kathyate//

वैदिकीमिति। ततो मन्त्री साधको यथानुक्रमयोगतोऽनुक्रमेणैव वैदिकीं तान्त्रिकीञ्च सन्ध्यां समाचरेत् कुर्यात्। तयोर्मध्ये तान्त्रिकीं सन्ध्यां त्वं शृणु मया कथ्यते।

The worshipper of the Mantra should then perform both the Vaidika and Tāntrika forms of Sandhyā[6] in their respective order. Listen while I now describe to you the Tāntrika Sandhyā.

आचम्य पूर्ववत्तोयैस्तीर्थान्यावाहयेच्छिवे।। ४५।।

ācamya pūrvavattoyaistīrthānyāvāhayecchive//

---

1. Śuddha-vāsasī.
2. Tāntrikī Gāyatrī Mantra is given later in this Chapter.
3. The sectarian mark of the forehead or between the eyebrows.
4. A mark consisting of three lines on the forehead, back, head, and shoulders, or three horizontal lines across the forehead, worn by Śaivas or Śāktas. The *Prāṇatoṣiṇī* (2nd Ed., 198) gives a full account of these marks which are also dealt with in *Kālāgnirudropaniṣad*.
5. Literally, drop, point; here, a mark like the point Anusvāra.
6. The rite here described.

तान्त्रिकीं सन्ध्यामेवाह आचम्येत्यादिभिः। हे शिवे पूर्ववदाचम्य तोये जले तीर्थान्यावाहयेत्।

After rinsing his mouth in the manner described, he should, O Blessed One! invoke into the water the Waters of the holy River's thus :

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।। ४६।।

gaṅge ca yamune caiva godāvari sarasvati/
narmade sindhu kāveri jale'smin sannidhiṁ kuru//

ननु केन मन्त्रेण कानि वा तीर्थान्यावाहयेदित्यपेक्षायामाह गङ्गे चेत्यादि। सन्निधिम् आसत्तिम्।

Mantra

O Gaṅgā, Yamunā, Godāvarī, Sarasvatī, Narmadā, Sindhu, Kāverī, be in this water.[1]

मन्त्रेणानेन मतिमान् मुद्रयाऽङ्कुशसज्ञया।
आवाह्य तीर्थं सलिले मूलं द्वादशधा जपेत्।। ४७।।

mantreṇānena matimān mudrayā'ṅkuśasajñayā/
āvāhya tīrthaṁ salile mūlaṁ dvādaśadhā japet//

मन्त्रेणेति। मतिमान् साधकोऽनेन अनन्तरमेवोक्तेन मन्त्रेणाङ्कुशसंज्ञया मुद्रया सलिले जले तीर्थमावाह्य मूलं मन्त्रं सलिले एव द्वादशधा जपेत्। अङ्कुशमुद्रा यथा ज्ञानार्णवे।

दक्षमुष्टिं विधायाथ तर्ज्जन्यङ्कुशरूपिणी।
अङ्कुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमेति।

The intelligent worshipper having invoked the sacred Rivers with this Mantra, and made the Aṅkuśa-mudrā, should do Japa with the Mūla-mantra,[3] twelve times.

---

1. The vocative forms in *e* and *i* are not given.
2. Aṅkuśa is a hook used to drive an elephant. The first finger is bent at the second joint in the shape of a hook, the first being closed.
   Cf. Jñānārṇava Tantra :
   Dakṣamuṣṭiṁ vidhāyātha tarjanyaṅkuśa-rūpiṇī.
   Aṅkuśākhyā mahā-mudrā trailokyākarṣaṇakṣamā.
3. *Vide ante*, note under v. 33.

ततस्तत्तोयतो बिन्दूंस्त्रिधा भूमौ विनिक्षिपेत्।
मध्यमानामिकायोगान्मूलोच्चारणपूर्वकम्।। ४८ ।।

tatastattoyato bindūṁstridhā bhūmau vinikṣipet/
madhyamānāmikāyogānmūloccāraṇapūrvakam//

तत इत्यादि। ततः परं मूलमन्त्रस्योच्चारणं पूर्वं यत्र कर्म्मणि तत् मूलोच्चारणपूर्वकं मध्यमानामिकायोगात्तत्तोयतो विन्दून् त्रिधा त्रिवारं भूमौ विनिक्षिपेत्।

Let him uttering the Mūla-mantra, and with the middle and third[1] fingers joined together throw drops of that water thrice upon the ground.

सप्तवारं स्वमूर्द्धानमभिषिच्य ततो जलम्।
वामहस्ते समादाय छादयेद्दक्षपाणिना।। ४९ ।।

saptavāraṁ svamūrddhānamabhiṣicya tato jalam/
vāmahaste samādāya chādayeddakṣapāṇinā//

सप्तवारमिति। मूलोच्चारणपूर्वकं मध्यमानामिकोयोगात् तेनैव जलेन सप्तवारं स्वमूर्द्धानमात्मीयं मस्तकमभिषिच्य ततः परं वाहमस्ते जलं समादाय गृहीत्वा दक्षपाणिनाऽऽच्छादयेत्।

He should then sprinkle his head seven times with the water, and taking some in the palm of his left hand cover it up with his right.

ईशानवायुवरुणवह्नीन्द्रबीजपञ्चकम् ।
प्रजप्य वेदधा तोयं दक्षहस्ते समानयेत्।। ५० ।।

īśānavāyuvaruṇavahnīndrabījapañcakam /
prajapya vedadhā toyaṃ dakṣahaste samānayet//

ईशानेत्यादि। दक्षपाणिनाऽऽच्छाद्य च ईशानवायुवरुणवह्नीन्द्रस्वामिके हँ यँ वँ रँ लमित्येतद्बीजपञ्चकं वेदधा चतुर्वारं प्रजप्य तत्तोयं दक्षहस्ते समानयेत्।

Then inwardly reciting the Bīja of Iśāna,[2] Vāyu,[3]

1. The ring finger.
2. Iśāna is the name of Śiva, and the presiding Deva of the Mantra Haṁ.
3. Lord of the element of Air, and the presiding Deva of the Mantra Yaṁ. "His noise comes rending and resounding, moving onward he makes all things ruddy. He comes propelling the dust of the earth. The gusts of air rush after him, and congregate upon him as women

Varuṇa,[1] Vahni,[2] and Indra,[3] four times, the water should be transferred to the right palm[4].

वीक्ष्य तेजोमयं ध्यात्वा चेडयाऽऽकृष्य साधकः।
देहान्तःकलुषं तेन रेचयेत् पिङ्गलाख्यया।।५१।।

vīkṣya tejomayaṁ dhyātvā ceḍayā''kṛṣya sādhakaḥ/
dehāntaḥkaluṣaṁ tena recayet piṅgalākhyayā//

वीक्ष्येति। साधको जनो दक्षहस्ते समानीतं तज्जलं वीक्ष्य विलोक्य तेजोमयं तेजोरूपं ध्यात्वा ईडया नाड्या आकृष्य च पिङ्गलाख्यया नाड्या तेन जलेन देहान्तःकलुषं शरीरान्तःपापं रेचयेन्निष्कर्षयेत्।

Looking at the water in his hand and meditating upon the water as Fire,[5] the worshipper should draw it through the nose by Iḍā,[6] expel it through Piṅgalā[7] (into his plam), and so wash away all inward impurity.

निष्कृष्य पुरतो वज्रशिलायामस्त्रमुच्चरन्।
त्रिवारं ताडयन् मन्त्री हस्तौ प्रक्षालयेत्ततः।।५२।।

niṣkṛṣya purato vajraśilāyāmastramuccaran/
trivāraṁ tāḍayan mantrī hastau prakṣālayettataḥ//

---

in an assembly. Hasting forward, he never reels. Friend of the waters first born, holy, in what place was he born! His sounds have been heard, but his form is not seen" (*Hymn to Vāyu*, Muir, O.S.T., verse 146).

1. Varuṇa, originally Deva of the Heavens, and regarded later in the Purāṇas as Lord of the Waters (Jala-pati), whose Mantra is Vaṁ (see as to Varuṇa, Muir, O.S.T., verses 58, 64, 73, 75, and Viṣṇu Purāṇa).
2. Agni, or Vahni (he who receives the Homa), is the presiding Deva of Fire, whose Mantra is Raṁ.
3. Indra, Deva of the Firmament, King of Celestials, presiding over the Mantra Laṁ. He is Svarga-pati, Lord of Heaven (Svāḥ), whose home is on Mount Meru, in the City of gems and gold built by Viśvakarmā, amid shady gardens of fragrant flowers and luscious fruits, inhabited by beautiful Apsarās and resounding with song and music. The five Bījas given are those of the Devatās of the five Cakras in the body from Viśuddha to Mūlādhāra.
4. The whole Mantra is then Haṁ, Yaṁ, Vaṁ, Raṁ, Laṁ.
5. Tejomaya.
6. That is, the left nostril.
7. Or right nostril.

निष्कृष्येति। मन्त्री साधक एवं देहान्तःकलुषं निष्कृष्य पुरतोऽग्रे मनःकल्पितायां वज्रशिलायामस्त्रं फडिति मन्त्रमुच्चरन् जपन् सन् त्रिवारं ताडयेत् आहन्यात्। ततोऽनन्तरं हस्तौ प्रक्षालयेद्धावेत्।

The worshipper should then three times[1] dash the water (so expelled into his palm) against an (imaginary) adamant[2] at the same time uttering the Astra-Mantra,[3] and then let him wash his hands.

आचम्योक्तेन मन्त्रेण सूर्यायार्घ्यं निवेदयेत्।। ५३।।

ācamyoktena mantreṇa sūryāyārghyaṁ nivedayet//

आचम्येति। तत उक्तेन मन्त्रेणाचम्य सूर्यायार्घ्यं निवेदयेद्दद्यात्।

Then rinsing his mouth, oblation of water should be offered to the Sun with the following.

तारमायाहंस इति घृणिसूर्य ततःपरम्।
इदमर्घ्यं तुभ्यमुक्त्वा दद्यात् स्वाहेत्युदीरयन्।। ५४।।

tāramāyāhaṁsa iti ghṛṇisūrya tataḥparam/
idamarghyaṁ tubhyamuktvā dadyāt svāhetyudīrayan//

Mantra

Oṁ Hrīṁ Haṁsa. To Thee, O Sun, full of heat, shining, effulgent, I offer this oblation. Svāhā[4].

ततो ध्यायेन्महादेवीं गायत्रीं परदेवताम्।
प्रातर्मध्याह्नसायाह्ने त्रिरूपां गुणभेदतः।। ५५।।

tato dhyāyenmahādevīṁ gāyatrīṁ paradevatām/
prātarmadhyāhnasāyāhne trirūpāṁ guṇabhedataḥ//

---

1. In other Tantras, and as a matter of practice, it is only once.
2. Vajra-Śilā. The process is known as "Agha-marṣaṇa," or destruction of sin. Water is expelled with the sins through Piṅgalā, and then for the destruction of the latter dashed against an imagined adamant. In practice the water is dashed against the left palm, which the Sādhaka conceives to be of adamantine hardness. Tarkālaṅkāra inclines to the view that the Mantra Phaṭ should be thrice repeated and the water dashed once only.
3. That is, the Weapon-Mantra, or "Phaṭ".
4. Oṁ Hrīṁ Haṁsa, gṛṇisūrya idaṁ arghyaṁ tubhyaṁ svāhā.

ननु केन मन्त्रेण सूर्यायार्घ्यं निवेदनीयमत आह तारेत्यादि। पूर्वं तारमायाहंस इत्युक्त्वा ततःपरं घृणिसूर्येत्युक्त्वा ततश्च परमिदमर्घ्यं तुभ्यमित्यक्त्वा ततोऽनन्तरं स्वाहेत्युदीरयन् कीर्त्तयन् साधकः सूर्यायार्घ्यं दद्यात्। ओँ ह्रीँ हंस घृणिसूर्य इदमर्घ्यं तुभ्यं स्वाहेति मन्त्रेणार्घ्यं निवेदयेदित्यर्थः।

Then let him meditate upon the great Devī Gāyatrī,[1] the Supreme Devī, whose form changes in three ways in the morning, midday and evening according to the difference of the three Qualities[2].

प्रातर्ब्राह्मीं रक्तवर्णां द्विभुजाञ्च कुमारिकाम्।
कमण्डलुं तीर्थपूर्णमच्छमालाञ्च विभ्रतीम्।
कृष्णाजिनाम्बरधरां हंसारूढां शुचिस्मिताम्।।५६।।

prātarbrāhmīṁ raktavarṇāṁ dvibhujāñca kumārikām/
kamaṇḍaluṁ tīrthapūrṇamacchamālāñca vibhratīm/
kṛṣṇājināmbaradharāṁ haṁsārūḍhāṁ śucismitām//

रज आदिगुणभेदात् प्रातर्मध्याह्नसायाह्ने त्रिरूपत्वं प्रदर्शयन् गायत्र्या ध्यानमेवाह प्रातर्ब्राह्मीमित्यादिभिः। प्रातरिति। रक्तवर्णाम् रक्तो लोहितो वर्णो यस्यास्ताम्। द्विभुजां द्वौ भुजौ बाहू यस्यास्तथाभूताम्। तीर्थपूर्णं गङ्गादितीर्थजलैः पूरितं कमण्डलुम् अच्छमालां स्वच्छमाल्यञ्च पाणिभ्यां विभ्रतीं दधतीम्। कृष्णाजिनाम्बरधरां नीलचर्मरूपं वस्त्रं परिदधतीम्। हंसारूढां हंसः पक्षिविशेषस्तमारूढाम्। शुचिस्मितां शुचि पवित्रं शुभ्रं वा स्मितमीषद्धासो यस्यास्ताम्। कुमारिकां कन्यकाम्। ब्राह्मीं ब्रह्मणः शक्तिम्। एवम्भूतां गायत्रीं देवीं प्रातःकाले ध्यायेत्। अग्रेऽप्येवमेवान्वयः कर्त्तव्यः।

Dhyāna

In the morning meditate upon Her in Her Brāhmī form,[3] as a Maiden of ruddy hue, with a pure smile, with two hands holding a gourd[4] full of holy water in one hand and in the other

1. The Devī of the Gāyatrī Mantra. In the Purāṇas, Gāyatrī is represented as Consort of Brahmā. Gāyatrī is also Vāk, Mother of the Vedas. See Woodroffe's *Garland of Letters*.
2. Guṇa, or qualities—*viz.*, Sattva, Rajas, Tamas. In her Sāttvika form she is represented as Vaiṣṇavī; in her Rājasika form as Brāhmī; and in her Tāmasika form as Śaivī.
3. Rājasika a Brāhmī. The Śakti of Brahmā who is generally pictured as a red man with four hands, seated on a Haṁsa, dressed in white.
4. Kamaṇḍalu.

a string of crystal beads, clad in the skin of a black antelope, seated on a Swan.

मध्याह्ने तां श्यामवर्णां वैष्णवीञ्च चतुर्भुजाम्।
शङ्खचक्रगदापद्मधारिणीं गरुडासनाम्।। ५७।।

madhyāhne tāṁ śyāmavarṇāṁ vaiṣṇavīñca caturbhujām/
śaṅkhacakragadāpadmadhāriṇīṁ garuḍāsanām//

मध्याह्न इति। तां गायत्रीम्।

पीनोत्तुङ्गकुचद्वन्द्वां वनमालाविभूषिताम्।
युवतीं सततं ध्यायेन्मध्ये मार्त्तण्डमण्डले।। ५८।।

pīnottuṅgakucadvandvāṁ vanamālāvibhūṣitām/
yuvatīṁ satataṁ dhyāyenmadhye mārttaṇḍamaṇḍale//

पीनेति। पीनं वृहत्तुङ्गमुन्नतं कुचद्वन्द्वं यस्याः तथाभूताम्।

At midday meditate upon Her in Her Vaiṣṇavī form,[1] of a dark blue colour,[2] youthful, with full and rising breasts, situated in the Solar Disc, with four hands holding the conch-shell, discus, mace, and lotus, seated on Garuḍa, garlanded with flowers[3] to the knees.

सायाह्ने वरदां देवीं गायत्रीं संस्मरेद् यतिः।
शुक्लां शुक्लाम्बरधरां वृषासनकृताश्रयाम्।। ५९।।

sāyāhne varadāṁ devīṁ gāyatrīṁ saṁsmared yatiḥ/
śuklāṁ śuklāmbaradharāṁ vṛṣāsanakṛtāśrayām//

सायाह्ने इत्यादि। यतिः निर्जितेन्द्रियव्यूहः। "ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च

---

1. Sāttvika as Vaiṣṇavī. Viṣṇu is pictured as of a dark blue colour, four-armed, holding the articles mentioned, riding upon the bird Garuḍa, dressed in yellow robes. The *Mahābhārata* pictures Him as seated in Vaikuṇṭha, the heaven of Viṣṇu, on a seat glorious as the midday sun, resting on white lotuses with his consort Lakṣmī, who shines like a continued blaze of lightning, and from whose body the fragrance of the lotus extends 800 yojanas away.
2. Śyāma-varṇā. According to Commentator on *Ṣaṭcakranirūpaṇa*, v. 21, it means of the colour of gold.
3. Vanamālā which does not mean garland of forest or wild flowrs but a garland of this particular size extending from neck to knee :
Ājānulambiṇī mālā sarvartukusumojjvalā.
madhye sthūlakadambāḍhyā vanamāleti kīritā.

ते'' इत्यमरः। वृषासनकृताश्रयाम् वृषरूपमासनं यस्य स वृषासनः शिवः स एव कृत आश्रयो निजाधारो यया तथाभूताम्। अथवा वृषरूपं यदासनं तदात्मकः कृत आश्रयो यया तथाभूताम्।

त्रिनेत्रां वरदां पाशं शूलञ्च नृकरोटिकाम्।
विभ्रतीं करपद्मैश्च वृद्धां गलितयौवनाम्।। ६०।।

trinetrāṁ varadāṁ pāśaṁ śūlañca nṛkaroṭikām/
vibhratīṁ karapadmaiśca vṛddhāṁ galitayauvanām//

त्रिनेत्रमिति। नृकरोटिकाम् नरकपालम्। गलितयौवनां ध्वस्ततारुण्याम्।

In the evening the Yati should meditate upon Her as of a white colour, clad in white raiment, old and long past her youth, with three eyes, beneficent, propitious, seated on a Bull, holding in Her lotus-like hands a noose, a trident, and a skull[1].

एवं ध्यात्वा महादेव्यै जलानामञ्जलित्रयम्।
दत्वा जपेत्तु गायत्रीं दशधा शतधाऽपि वा।। ६१।।

evaṁ dhyātvā mahādevyai jalānāmañjalitrayam/
datvā japettu gāyatrīṁ daśadhā śatadhā'pi vā//

एवमित्यादि। महादेव्यै गायत्र्यै दशधा शतधाऽपि वा दशवारं शतवारं वेत्यर्थः।

And making the gesture of granting boons.

Having thus meditated on the great Devī Gāyatrī, and offered water three times with the hollow of his joined hands, the worshipper should, make Japa with the Gāyatrī mantra either ten or a hundred times.

गायत्रीं शृणु देवेशि वदामि तव भावतः।
आद्यायै पदमुच्चार्य विद्महे तदनन्तरम्।। ६२।।

gāyatrīṁ śṛṇu deveśi vadāmi tava bhāvataḥ/
ādyāyai padamuccārya vidmahe tadanantaram//

---

1. Tāmasika as Śaivī. Each Deva or Devī has His or Her Vāhana or vehicle. In this case the Bull Nandī. Śiva is always represented of a white colour, and is described in the Śiva-stotra as shining like a mountain of silver (Rajata-giri-nibha). Yati is the self-controlled worshipper.

गायत्रीमित्यादिना गायत्रीं वक्तुमुपक्रमते। भावतः प्रीतितः।

Listen now, O Queen of the Devas ! while I out of my love for Thee recite the Gāyatrī.

परमेश्वर्यै धीमहि तन्नः काली प्रचोदयात्।
एषा तु तव गायत्री महापापप्रणाशिनी।। ६३।।

parameśvaryai dhīmhi tannaḥ kālī pracodayāt/
eṣā tu tava gāyatrī mahāpāpapraṇāśinī//

तां गायत्रीमेवाह आद्यायै इत्यादिना। पूर्वमाद्यायै इति पदमुच्चार्य तदनन्तरं विद्महे इति पदमुच्चरेत्। तदनन्तरं परमेश्वर्यै धीमहि तन्नः काली प्रचोदयादित्युच्चरेत्। योजनया आद्यायै विद्महे परमेश्वर्यै धीमहि तन्नः काली प्रचोदयादित्याकारा गायत्र्यासीत्। एतद्गायत्र्यर्थस्त आद्यायै परमेश्वर्यै आद्यां परमेश्वरीं प्राप्तुं यां वयं विद्महे मन्यामहे धीमहि चिन्तयामश्च तत् जगत्कारणत्वेन अतिप्रसिद्धा काली नोऽस्मान् प्रचोदयात् प्रेरयेत् धर्म्मार्थकाममोक्षेषु विनियोजयेदित्यर्थ इति।

After the word "Ādyāyai" say "Vidmahe," and then "Parameśvaryyai ca dhimahi; tannaḥ Kālī pracodayāt"[1].This is Thy Gāyatrī which destroys all great sins.

त्रिसन्ध्यमेतां प्रजपन् सन्ध्यायाः फलमाप्नुयात्।
ततस्तु तर्पयेद्भद्रे देवर्षिपितृदेवताः।। ६४।।

trisandhyametāṁ prajapan sandhyāyāḥ phalamāpnuyāt/
tatastu tarpayedbhadre devaravṣipitṛdevatāḥ//

त्रिसन्ध्यमिति। एताम् केवलां तव गायत्रीम्। ततस्तु गायत्रीजपादनन्तरं तु।

The inward recitation of this Vidyā[2] thrice daily obtains

---

1. "Let us think upon Ādyā; let us meditate on Parameśvarī (the Supreme Devī). May Kālī direct us (in the path of Dharma, Artha, Kāma, and Mokṣa)". Ādyā, Parameśvarī, and Kālī are one and the same. To the Śākta reciting this Gāyatrī the Ādyā is the only Divinity he thinks of, knows, and contemplates. To Her alone his whole soul is bent with a prayer for the attainment of the fourfold aim of sentient being. Bhāratī reads : "May Kālī Whom we seek to know and on Whom we meditate that we may attain the Ādyā Parameśvarī, may She who is verily the Cause of this universe, direct us in the path of Dharma, Artha, Kāma and Mokṣa."
2. Feminine Mantra.

the fruit of the performance of Sandhyā. Water should then be offered to the Devas, Ṛṣis,[1] and the Pitṛs[2].

प्रणवं सद्वितीयाख्यां तर्पयामि नमः पदम्।
शक्तौ तु प्रणवे मायां नमःस्थाने द्विठं वदेत्।। ६५।।

praṇavaṁ sadvitīyākhyāṁ tarpayāmi namaḥ padam/
śaktau tu praṇave māyāṁ namaḥsthāne dviṭhaṁ vadet//

ननु केन केन मन्त्रेण देवर्षिपितृदेवतास्तर्पयितव्या इत्याकाङ्क्षायां तर्पणमन्त्रमाह प्रणवमित्यादिना। पूर्वं प्रणवमोङ्कारं वदेत्। ततः सद्वितीयाख्यां द्वितीयया विभक्त्या सहितामाख्यां नामधेयं वदेत्। ततश्च परं तर्पयामीति नम इति च पदं वदेत्। शक्तौ तु शक्तिविषये तु प्रणवे प्रणवस्थाने मायां ह्रीमिति बीजं वदेत्। नमःस्थाने द्विठं स्वाहेति पदं वदेत्। एतेन ओँ देवांस्तर्पयामि नम इति मन्त्रेण देवान् ओमृषींस्तर्पयामि नम इत्यनेन ऋषीन् ओँ पितृस्तर्पयामि नम इति मन्त्रेण पितॄन् ह्रीँ आद्यां कालीं तर्पयामि स्वाहेत्यनेनाद्यां कालीं तर्पयेदिति ज्ञापितम्।

First say the Praṇava,[3] and then the name of the Deva (the Ṛṣi or the Pitṛ) in the accusative case, and after that the words "Tarpayāmi namaḥ".[4] When however, oblation is offered to Śakti, the Māyā Bīja[5] should be said in place of the Praṇava, and in lieu of Namaḥ the Mantra Svāhā[6].

1. Seer.
2. Forefathers.
3. Oṁ.
4. "Him I satisfy : Namaḥ". The Mantra for the offering is given in the verse which follows and runs : Oṁ Devān tarpayāmi Namaḥ, Oṁ Ṛṣīn tarpayāmī Namaḥ, Oṁ Pitrīn tarpayāmī Namaḥ, Hrīṁ Ādyāṁ Kālīṁ tarpayāmī Svāhā, for Devas, Ṛṣis, Pitṛs and Ādyā Śakti respectively (Bhāratī). Tarkālaṁkāra says the mode of Tarpaṇa is not fully given, but following the authority of other Tantras it should be done with the Tattva Mudrā (formed by the union of the thumb and ring finger of the left hand). In doing Tarpaṇa (as in Rahasya tarpaṇa) to a male Devatā it should be done in the Sādhaka's own head within a triangle the apex of which is upwards and to a female Devatā in the heart the triangle having its apex downward. The triangle so placed is symbolic and the Yonī or Cause of all.
5. That is, Hrīṁ.
6. That is, the Devas, Ṛṣis and Pitṛs are worshipped with the Mantra prefixed by Oṁ, and ending with Namaḥ but a Devī with Hrīṁ, or what ever Her Bīja may be, concluding with Svāhā.

मूलान्ते सर्वभूतान्ते निवासिन्यै पदं वदेत्।
सर्वस्वरूपां ङेयुक्तां सायुधाऽपि तथा पठेत्।। ६६।।

सावरणां सचतुर्थीं तद्वदेव परात्पराम्।
आद्यायै कालिकायै त इदमर्घ्यं ततो द्विठः।। ६७।।

mūlānte sarvabhūtānte nivāsinyai padaṁ vadet/
sarvasvarūpāṁ ṅeyuktāṁ sāyudhā'pi tathā paṭhet//
sāvaraṇāṁ sacaturthīṁ tadvadeva parātparām/
ādyāyai kālikāyai ta idamarghyaṁ tato dviṭhaḥ//

मूलान्त इत्यादि। मूलस्य ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेति मन्त्रस्यान्ते यत् सर्वभूतेति पदं तस्यान्ते निवासिन्यै इति पदं वदेत्। ततो ङेयुक्तां सर्वस्वरूपां वदेत्। ततः तथा ङेयुक्ता सायुधेत्यपि पदं वदेत्। ततः तद्वदेव सचतुर्थीमेव परात्परां वदेत्। ततः आद्यायै कालिकायै ते इदमर्घ्यमिति वदेत्। ततो द्विठः स्वाहेति पदं वदेत्। सकलपदयोजनया ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा सर्वभूतनिवासिन्यै सर्वस्वरूपायै सायुधायै सावरणायै परात्परायै आद्यायै कालिकायै ते इदमर्घ्यं स्वाहेति मन्त्र आसीत्।

After reciting the Mūla-mantra,[1] say "Sarva-bhūta-nivāsinyai" and then "Sarva-svarūpā" and "Sāyudhā" in the dative singular, as also "Sāvaraṇā" and "Parātparā," and then "Ādyāyai, Kālikāyai, te, idam arghyam : Svāhā". (When the Mantra will be :)[2]

Mantra

Hrīṁ, Śrim, Krīṁ, to Thee the Supreme Devī, Thou Who dwelleth in and art in the form of all things, Who art surrounded by Thy attendant Devatās, and Who bearest all Thy insignia, Who art above even the most high, to Thee, Who art the Ādyā Kālikā, I offer this oblation : Svāhā.

अनेनार्घ्यं महादेव्यै दत्त्वा मूलं जपेत् सुधीः।
यथाशक्ति जपं कृत्वा देव्या वामकरेऽर्पयेत्।। ६८।।

1. The primary Mantra—that is, "Hrīṁ, Śrīṁ, Krīṁ, Parameśvarī Svāhā." Śiva proceeds to describe the formation of the Mantra for offering oblation.
2. The Mantra is thus : "Hrīṁ, Śrīṁ, Krīṁ, Parameśvarī, Svāhā : Sarva-bhūta-nivāsinyai Sarva-svarūpāyai Sāyudhāyai Sāvaraṇāyai Parātparāyai Ādyāyai Kālikāyai te idam arghyaṁ : Svāhā."

anenārghyaṁ mahādevyai dattvā mūlaṁ japet sudhīḥ/
yathāśakti japaṁ kṛtvā devyā vāmakare'rpayet//

अनेनेति। अनेनानन्तरमेवोक्तेन मन्त्रेण महादेव्यै अर्घ्यं दत्त्वा सुधीर्धीरः साधको मूलं मन्त्रं जपेत्। यथाशक्ति जपं कृत्वा च जपजन्यं फलं देव्या वामकरेऽर्पयेत् दद्यात्।

Having offered this Arghya to the Mahādevī, the self-controlled Sādhaka should make Japa with the Mūla-mantra with all his powers, and then place the Japa in the left hand of the Devī[1].

प्रणम्य देवीं पूजार्थं जलमादाय साधकः।
नत्वा तीर्थं पठन् स्तोत्रं देवताध्यानतत्परः।। ६९।।

यागमण्डपमागत्य पाणिपादौ विशोधयेत्।
ततो द्वारस्य पुरतः सामान्यार्घ्यं प्रकल्पयेत्।। ७०।।

praṇamya devīṁ pūjārthaṁ jalamādāya sādhakaḥ/
natvā tīrthaṁ paṭhan stotraṁ devatādhyānatatparaḥ//
yāgamaṇḍapamāgatya pāṇipādau viśodhayet/
tato dvārasya puratah sāmānyārghyaṁ prakalpayet//

प्रणम्येति। ततः साधको देवीं प्रणम्य पूजार्थं जलमादाय गृहीत्वा तीर्थं नत्वा च स्तोत्रं पठन् देवताध्यानतत्परः सन् यागमण्डपं यजनगृहमागत्य पाणिपादौ विशोधयेत् धावेत्। ततो द्वारस्य पुरतोऽग्रे सामान्यार्घ्यं प्रकल्पयेत् रचयेत्।

Then let the Sādhaka bow to the Devī, take such water as is needed for the worship, bowing to the water whence he has drawn it, and proceed to the place of worship,[2] earnestly meditating on and reciting hymns of praise to the Devī meanwhile. On his arrival there let him wash his hands and feet, and then make in front of the door the Sāmānyārghya[3].

त्रिकोणवृत्तभूबिम्बं मण्डलं रचयेत् सुधीः।
आधारशक्तिं संपूज्य तत्राऽऽधारं नियोजयेत्।। ७१।।

---

1. That is, the merit of it is offered to Her.
2. Yāga-maṇḍapa.
3. Sāmānyārghya, the common or universal oblation—that is, the oblation which is to serve for the whole ritual worship which follows. The following verse to the seventy-fourth explain it.

trikoṇavṛttabhūbimbaṁ maṇḍalaṁ racayet sudhīḥ/
ādhāraśaktiṁ saṁpūjya tatrā''dhāraṁ niyojayet//

ननु सामान्यार्घ्यं किं नामेत्यत आह त्रिकोणेत्यादि। सधीर्विचक्षणः त्रिकोणञ्च वृत्तञ्च भूबिम्बं चैतेषां समाहारः त्रिकोणवृत्तभूबिम्बं मण्डलं रचयेत्। पूर्वं त्रिकोणं ततस्तद्बहिरभितो वृत्तं वर्त्तुलं ततस्तद्बहिर्भूबिम्बं चतुष्कोणञ्च मण्डलं कुर्यादित्यर्थः। तत्र रचिते मण्डले ओँ आधारशक्तये नम इति मन्त्रेण गन्धपुष्पादिभिराधारशक्तिं संपूज्य सामान्यार्घ्यं पात्रस्थापनाय तस्मिन्नेव रचिते मण्डले कमप्याधारं नियोजयेत् स्थापयेत्।

The Sādhaka should draw a triangle, and outside it a circle, and outside the circle a square, and after worshipping the Ādhāra-śakti place the vessel on the figure[1].

अस्त्रेण पात्रं प्रक्षाल्य हृन्मन्त्रेण प्रपूर्य च।
निक्षिप्य गन्धं पुष्पञ्च तीर्थान्यावाहयेत्ततः।। ७२।।

astreṇa pātraṁ prakṣālya hṛnmantreṇa prapūrya ca/
nikṣipya gandhaṁ puṣpañca tīrthānyāvāhayettataḥ//

अस्त्रेणेति। अस्त्रेण फडिति मन्त्रेण पात्रं प्रक्षाल्याऽऽधारे संस्थाप्य च हृन्मन्त्रेण नमोमन्त्रेण जलैः प्रपूर्य च तत्र गन्धं चन्दनादिकं पुष्पञ्च निक्षिप्य ततःपरं तत्र तीर्थान्यावाहयेत्।

Let him wash the vessel with the Weapon-Mantra,[2] and while filling it with water let him say the Heart-Mantra.[3] Then, throwing flowers and perfume into the water, let him invoke the waters of the holy places into it.

आधारपात्रतोयेषु वह्न्यर्कशशिमण्डलम्।
पूजयित्वा तद्दशधा मायाबीजेन मन्त्रयेत्।। ७३।।

ādhārapātratoyeṣu vahnyarkaśaśimaṇḍalam/
pūjayitvā taddaśadhā māyābījena mantrayet//

---

1. That is the worship is to be of the Śakti which supports the vessel of oblation—Ādhāra-śakti. The worship is done with scents, flowers and the like and with the Mantra Oṁ. Ādhāra-śaktaye Namaḥ (Oṁ obeisance to the Śakti of support) for the universe is sustained in and by Her.
2. That is the Astra-Mantra or Phaṭ.
3. Hṛn-Mantra, or Namaḥ—said in the heart.

आधारेति। ततः आधारश्च पात्रञ्च तान्याधारयपात्रतोयानि तेषु वह्न्यर्कशशिमण्डलं पूजयित्वा आधारे वह्निमण्डलं पात्रेऽर्कमण्डलं तोये च शशिमण्डलं वक्ष्यमाणमन्त्रेण गन्धपुष्पादिभिरर्च्चयित्वेत्यर्थः। दशधा दशवारं मायाबीजेन ह्रीमितिबीजेन तज्जलं मन्त्रयेत्।

Worshipping Fire, Sun, and Moon in the water of the vessel, let him say[1] the Māyā Bīja[2] over it ten times.

प्रदर्शयेद्धेनुयोनिं सामान्यार्घ्यमिदं स्मृतम्।
ततस्तज्जलपुष्पैश्च पूजयेद् द्वारदेवताः।। ७४।।

pradarśayeddhenuyoniṁ sāmānyārghyamidaṁ smṛtam/
tatastajjalapuṣpaiśca pūjayed dvāradevatāḥ//

प्रदर्शयेदिति। ततः तस्योपरि धेनुयोनी मुद्रे प्रदर्शयेत्। इदमेव सामान्यार्घ्यं स्मृतम्। ततःपरं तज्जलपुष्पैः सामान्यार्घ्यसम्बन्धितोयकुसुमैर्द्वारदेवताः पूजयेत्। धेनुमुद्रा यथा।

अन्योन्याभिमुखाश्लिष्य कनिष्ठानामिका पुनः।
तथा च तर्जनीमध्या धेनुमुद्राऽमृतप्रदेति।।

The Dhenu and Yoni Mudrās[3] should then be shown.[4] This is known as Sāmānyārghya.[5] With the water and flowers of this oblation the Devatā of the entrance to the place of worship should be worshipped.

गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा।
गङ्गाञ्च यमुनाञ्चैव लक्ष्मीं वाणीं ततो यजेत्।। ७५।।

gaṇeśaṁ kṣetrapālañca vaṭukaṁ yoginīṁ tathā/
gaṅgāñca yamunāñcaiva lakṣmīṁ vāṇīṁ tato yajet//

---

1. Mantrayet, by which the power of the Mantra is discharged into it.
2. That is, Hrīṁ.
3. The Yoni-Mudrā—symbolical of the sexual organ of woman—is used in the Durgā and Kālī-Pūjā. The little finger is placed on little finger, the first finger on first finger, and the thumb on thumb. The knuckles of second and third fingers of each hand are bent, and rest on one another. A triangular Yantra is thus formed, of which the first fingers are the apex and the others the base. The Dhenu (Cow) Mudrā representing the udder of a cow is show when offering food water, etc., to the Devatā chaning it to Amṛta. See, *post*, VI, verses 137-138.
4. That is, over the vessel containing the Arghya.
5. *Vide*, p. 191 note 3.

या द्वारदेवताः पूजयेत्ता एव दर्शयन्नाह गणेशमित्यादि। गां गणेशाय नम इति मन्त्रेण गणेशम् क्षां क्षेत्रपालाय नम इति मन्त्रेण क्षेत्रपालम् वां कटुकाय नम इत्यनेन वटुकम् यां योगिन्यै नम इत्यनेन योगिनीम् गां गङ्गायै नम इत्यनेन गङ्गाम् यां यमुनायै नम इति मन्त्रेण यमुनाम् श्रीँ लक्ष्म्यै नम इत्यनेन लक्ष्मीम् ऐँ सरस्वत्यै नम इति मन्त्रेण वाणीं गन्धपुष्पादिभिर्यजेत् पूजयेत्।

They are Gaṇeśa, Kṣetrapāla,[1] Vaṭuka,[2] Yoginī,[3] Gaṅgā, Yamunā, Lakṣmī, and Vaṇī[4].

किञ्चित् स्पृशन् वामशाखां वामपादपुरःसरम्।
स्मरन् देव्याः पदाम्भोजं मण्डपं प्रविशेत् सुधीः।। ७६ ।।

kiñcit spṛśan vāmaśākhāṁ vāmapādapuraḥsaram/
smaran devyāḥ padāmbhojaṁ maṇḍapaṁ praviśet sudhīḥ//

किञ्चिदिति। ततो वामशाखां द्वारस्थितचतुष्काष्ठानां मध्ये वामं काष्ठं किञ्चित् स्पृशन् देव्याः पदाम्भोजञ्च स्मरन् सुधीः साधको वामपादपुरःसरं यथा स्यात् तथा मण्डपं देवीय जनमण्डपं देवीयजनमन्दिरं प्रविशेत्।

The Sādhaka, lightly touching that part of the door-frame which is on his left, should then enter the place of worship with his left foot forward, meditating the while on the lotus-feet of the Devī.

नैर्ऋत्यां दिशि वास्त्वीशं ब्रह्माणञ्च समर्चयन्।
सामान्यर्घ्यस्य तोयेन प्रोक्षयेद्यागमन्दिरम्।। ७७।।

nairṛtyāṁ diśi vāstvīśaṁ brahmāṇañca samarcayan/
sāmānyarghyasya toyena prokṣayedyāgamandiram//

नैर्ऋत्यामित्यादि। मण्डपं प्रविश्य च तत्रैव नैर्ऋत्यां दिशि प्रणवादिनमोऽन्तेन मन्त्रेण गन्धपुष्पादिभिर्वास्त्वीशं ब्रह्माणं च समर्चयन् पूजयन् सन् सामान्यसार्घ्यस्य तोयेन यागमन्दिरं प्रोक्षयेत् प्रसिञ्चेत्।

---

1. The Deva protector of the ground. The Mantra for His worship is Kṣāṁ Kṣetrapālāya Namaḥ and for Vaṭuka Vāṁ Vaṭukāya Namaḥ.
2. One of the manifestations of Bhairava.
3. Yoginī is an influence or force recognised in Hindu Astrology which shifts from place to place in all the eight directions, like N., N.E., E., S.E., S., S.W., W., N.W.
4. Lakṣmī, or Śakit of Viṣṇu, and Vāṇī or Sarasvatī, Śakti of Brahmā.

Then, after worship of the presiding Devatā of the site, and of Brahmā in the south-west corner, the place of worship should be cleansed with water taken from the common offering[1].

अनन्तरं साधकेन्द्रो दिव्यदृष्ट्यवलोकनैः।
दिव्यानुत्सारयेद्विघ्नानस्त्राद्भिश्चान्तरीक्षगान्।। ७८।।

anantaraṁ sādhakendro divyadṛṣṭyavalokanaiḥ/
divyānutsārayedvighnānastrādbhiścāntarīkṣagān//

Let the good Sādhaka then by steadily gazing[2] in front of him with winkless eyes remove all celestial obstacles,[3] and by the repetition of the Weapon-Mantra[4] and sprinkling of water remove all obstacles in the Antarīkṣa[5].

पार्ष्णिघातत्रिभिर्भौमानिति विघ्नान्निवारयेत्।
चन्दनागुरुकस्तूरीकर्पूरैर्यागमण्डपम् ।।७९।।
धूपयेत् स्वोपवेशार्थं चतुरस्रं त्रिकोणकम्।
विलिख्य पूजयेत्तत्र कामरूपाय हृन्मनुः।।८०।।

pārṣiṇadhātatribhirbhaumāniti vighnānnivārayet/
candanāgurukastūrīkarpūrairyāgamaṇḍapam //
dhūpayet svopaveśārthaṁ caturasraṁ trikoṇakam/
vilikhya pūjayettatra kāmarūpāya hṛnmanuḥ//

अनन्तरमिति। अनन्तरं ततःपरमेव साधकेन्द्रो दिव्यदृष्ट्यवलोकनैः निमेषशून्या दृष्टिर्दिव्यदृष्टिस्तयाऽवलोकनैर्निरीक्षणैः। दिवि भवा दिव्यास्तान् विघ्नानुत्सारयेन्निवारयेत्। अन्तरिक्षगान् गगनगत् विघ्नांस्तु अस्त्राद्भिः फडिति मन्त्रेण जलैश्चोत्सारयेत्। भौमान् भूमिभवान् विघ्नांस्तु पार्ष्णिघातत्रिभिः त्रिभिः

---

1. Sāmānyārghya.
2. Divya-dṛṣṭi—literally, "celestial gaze," which is achieved by practice of the process of Haṭha Yoga called Trāṭaka. The Sādhaka without winking, gazed at some minute object until tears start from his eyes. Practice in Trāṭaka secures Divya-dṛṣṭi (see the Second Upadeśa of the *Gheraṇḍa Saṁhitā*). A Deva's eyes do not wink. The gaze is steady. The Sādhaka's must be that.
3. Divya-vighna—those obstructive being which originate from Svaḥ.
4. Astra-Mantra, or Phaṭ.
5. the Plane Bhuvaḥ, between earth and heaven (Svaḥ).

पादतलाघातैर्निवारयेत्। ततो यागमण्डपं चदनागुरुकस्तूरीकर्पूरैर्धूपयेत् वासयेत्। ततः स्वोपवेशार्थं त्रिकोणकं तद्वहिश्चतुरस्रं चतुष्कोणञ्च मण्डलं विलिख्य तत्र लिखिते मण्डले तदधिष्ठातृदैवतं कामरूपं कामरूपाय हृत् कामरूपाय नम इति यो मनुर्मन्त्रस्तेन गन्धपुष्पादिभिः पूजयेत्।

Striking the ground three times with his heel, let him drive away all earthly obstacles, and then fill the place of worship with the incense of burning sandal, fragrant Aguru,[1] saffron and camphor. He should then mark off a rectangular space as his seat, draw a triangle within it, and therein worship Kāma-rūpa with the

Mantra

To Kāma-rūpa[2] Namaḥ.

तत्राऽऽसनं समास्तीर्य काममाधारशक्तितः।
कमलासनाय नमो मन्त्रेणैवासनं यजेत्।। ८१।।

tatrā''sanaṁ samāstīrya kāmamādhāraśaktitaḥ/
kamalāsanāya namo mantreṇaivāsanaṁ yajet//

तत्रेति। ततस्तत्र मण्डले आसनमास्तीर्याच्छाद्य पूर्वं कामं क्लीमिति बीजमुच्चार्य ततः आधारशक्तीति वदेत्। आधारशक्तितश्च परं कमलासनाय नम इति वदेत्। योजनया क्लीमाधारशक्तिकमलासनाय नम इति मन्त्रो जातः। अनेनैव मन्त्रेणासनं तदधिष्ठातृदैवतं यजेत्।

Then for his seat spreading a mat[3] over it, let him worship the Ādhāra-Śakti[4] of the Mat with the

Mantra

Klīṁ, Obeisance to the Ādhāra-Śakti of the lotus-seat[5].

उपविश्यासने विद्वान् प्राङ्मुखो वाप्युदङ्मुखः।
बद्धवीरासनो मन्त्री विजयां परिशोधयेत्।। ८२।।

---

1. Aguru a kind of aromatic wood obtainable in the Garo hills—much used in worship.
2. Who is the Presiding Divinity or Adhiṣṭhātṛ Deva of the place.
3. Āsana, generally, a mat of Kuśa grass.
4. Śakti of the support.
5. Klīṁ, Adhāra-śakti-kamalāsanāya Namaḥ—that is, the power of support of the lotus-seat.

upviśyāsane vidvān prāṅmukho vāpyudaṅmukhaḥ/
baddhavīrāsano mantrī vijayāṁ pariśodhayet//

विजयां भङ्गाम्।

The Sādhaka well versed in Mantra should then seat himself according to the "Vīrāsana posture,"[1] with his face towards the East or the North, and should purify the Vijayā[2] with the following :

तारं मायां समुच्चार्य अमृते अमृतोद्भवे।
अमृतवर्षिणि ततोऽमृतमाकर्षय द्विधा।।८३।।

सिद्धिं देहि ततो ब्रूयात् कालिकां मे ततः परम्।
वशमानय ठद्वन्द्वं संविदाशोधने मनुः।।८४।।

tāraṁ māyāṁ samuccārya amṛte amṛtodbhave/
amṛtavarṣiṇi tato'mṛtamākarṣaya dvidhā//
siddhiṁ dehi tato brūyāt kālikāṁ me tataḥ param/
vaśamānaya ṭhadvandvaṁ saṁvidāśodhane manuḥ//

ननु केन मन्त्रेण विजयां परिशोधयेदित्यपेक्षायां तच्छोधनमन्त्रमेवाह तारमित्यादि-द्वाभ्याम्। पूर्वं तारं प्रणवं मायां ह्रीमिति बीजञ्च समुच्चार्य ततःपरम् अमृते अमृतोद्भवे अमृतवर्षिणि इति ब्रूयात्। ततोऽमृतामिति ब्रूयात्। ततो द्विधा द्विवारमाकर्षयेति ब्रूयात्। ततश्च सिद्धिं देहीति ब्रयात्। ततःपरं कालिकां मे इति ब्रूयात्। ततश्च वशमानयेति ठद्वन्द्वं स्वाहेति ब्रूयात्। सकलपदयोजनया ओँ ह्रीँ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमा-कर्षयाकर्षय सिद्धिं देहि कालिकां मे वशमानय स्वाहेति मन्त्रो जातः। संविदाशोधाने भङ्गायाः शोधनेऽयमेव मनुः प्रोक्तः।

Mantra

Oṁ, Hrīṁ, Ambrosia, that springeth from ambrosia, Thou that showerest ambrosia, draw ambrosia for me again and again. Bring Kālikā within my control. Give Success; Svāhā.[3]

---

1. Baddha-vīrāsana. *Cf. Gheraṇḍa Saṁhitā :*
   Ekapādam athaikasmin vinyased ūrusaṁṣṭitaṁ
   Itarasmiṁ statā paścād vīrāsanam udāhṛtam.
2. That is, the narcotic Bhāṅg (hemp) or siddhi, as it is called in Beṅgālī, and which is ued in all ceremonies.
3. "Amṛte amṛtodbhava amṛta-varṣiṇi amṛtam ākarṣayā-karṣaya : siddhim dehi : Kālikām me vaśam-ānaya svāhā".

This is the Mantra for the consecration of Vijayā.

मूलमन्त्रं सप्तवारं प्रजप्य विजयोपरि।
आवाहन्यादिमुद्राञ्च धेनुयोनी प्रदर्शयेत्।। ८५।।

mūlamantraṁ saptavāraṁ prajapya vijayopari/
āvāhanyādimudrāñca dhenuyonī pradarśayet//

मूलमन्त्रमिति। विजयोपरि मूलमन्त्रं सप्तवारं प्रजप्य आवाह्यते यया सा आवाहनी मुद्रा सा मुद्रा आदिर्यस्याः सा आवाहन्यादिः सा चासौ मुद्रा चेत्यावाहन्यादिमुद्रा ताम्। धेनुयोनी च मुद्रे विजयोपरि प्रदर्शयेत्। आवाहन्यादिमुद्रा यथा दक्षिणमूर्तिसंहितायाम्।

पुटाञ्जलिमधः। कुर्यादियमावाहनी भवेत्।
इयन्तु विपरीतेन तदा वै स्थापनी भवेत्।।
ऊर्द्ध्वाङ्गुष्ठमुष्टिभ्यां तदेयं सन्निधापनी।
अन्ताङ्गुष्ठकमुष्टिभ्यां तदेयं सन्निरोधिनीति।

Then inwardly reciting the Mūla-mantra[1] seven times over the Vijayā, show the Dhenu,[2] the Yoni,[3] the Āvāhanī,[4] and other[5] Mudrās.

गुरुं पद्मे सहस्रारे यथा सङ्केतमुद्रया।
त्रिधैव तर्पयेद्देवीं हृदि मूलं समुच्चरन्।। ८६।।

guruṁ padme sahasrāre yathā saṅketamudrayā/
tridhaiva tarpayeddevīṁ hṛdi mūlaṁ samuccaran//

---

1. *Vide* p. 190 note 1.
2. The Cow-Mudrā. The two little and ring fingers are joined, the latter crossing one another. The two middle cross one another, and join two index fingers. See note under v. 74.
3. *Vide ante*, note 3 under v. 74.
4. The two hands joined together, showing the palms with two thumbs turned in—the gesture with which honoured guests are received.
5. The other Mudrās referred to, but not mentioned in the text, are—(1) Āvāhanī, (2) Sthāpanī, (3) Sannidhāpanī, (4) Sannirodhinī, and (5) Sammukhīkaraṇī. These are meant by Āvāhaṇī and others. *Cf. Dakṣiṇamūrti Sasṁhitā*. These are gestures of—(1) invoking and welcoming, (2) placing, (3) fixing or placing on a seat, (4) restraining or detaining, and (5) confronting. All these gestures are made by the fingers and palms.

गुरुमिति। ऐँ अमुकानन्दनाथं श्रीगुरुं तर्पयामि नमः इति मन्त्रेण सङ्केतमुद्रया गुरूपदिष्टया तत्त्वमुद्रया सहस्रारे सहस्रदले पद्मे गुरुं यथावत्रिधा विजयया तर्पयेत्। मूलं मन्त्रं समुच्चरन् सन् ह्रीँ आद्यां कालीं तर्पयामि स्वाहेति मन्त्रेण तत्त्वमुद्रयैव हृदये देवीं विजयया त्रिधैव तर्पयेत्।

Then satisfy the Guru in the Lotus of a thousand petals[1] by thrice offering him the Vijayā with the Saṅketa-Mudrā, and the Devī in the heart by thrice offering the Vijayā with the same Mudrā, and reciting the Mūla-mantra[2].

वाग्भवं वदयुग्मञ्च वाग्वादिनि पदं ततः।
मम जिह्वाग्रे स्थिरीभव सर्वसत्ववशङ्करि।
स्वाहान्तेनैव मनुना जुहुयात् कुण्डलीमुखे।। ८७।।

vāgbhavaṁ vadayugmañca vāgvādini padaṁ tataḥ/
mama jihvāgre sthirībhava sarvasatvavaśaṅkari/
svāhāntenaiva manunā juhuyāt kuṇḍalīmukhe//

वाग्भवमिति। पूर्वं वाग्भवम् ऐमिति बीजं वदेत्। ततो वदयुग्मं वदेत्। ततो वाग्वादिनि इति पदं वदेत्। ततो मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि इति वदेत्। योजनया ऐँ वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करि मन्त्रो जातः। स्वाहान्तेनैवामुना मनुना कुण्डलीमुखे विजयां जुहुयात् दद्यात्।

Then offer oblations to the mouth of the Kuṇḍalī,[3] with the Vijayā reciting the following

---

1. That is, the Saharāra Lotus in the head. The Mantra when bowing to the Guru is Oṁ Śrīgurubhyo Namaḥ; to Gaṇeśa Oṁ Gaṇeśāya Namaḥ; to Ādyā-Kālikā-Śakti Oṁ Sanātanyai Ādyāyai Kālyai Namaḥ (Bhāratī). Other lengthier Mantras are given by Tarkālaṅkāra.
2. Bhāratī says : Reciting the Mantra, "Aiṁ *(name of Guru)* Ānanda-nātha—Śrī-guru-Śrī-pādukāṁ tarpayāmi : Namaḥ", and with the peculiar gesture (Saṅketa-Mudrā) taught by the Guru, the Guru should be satisfied three times by (offer of) Vijayā (Bhāṁ) and reciting the Mūla-mantra—*i.e.* "Hrīṁ Ādyāṁ Kālīṁ tarpayāmi : Svāhā"—and with the Saṁketa Mudrā the Devī should be satisfied three times in the heart. The Saṅketa Mudrā in the text is the Tattva-Mudrā taught by the Guru.
3. That is, the Śakti Kuṇḍalinī, as to whom see A. Avalon's *Serpent Power*. Oblation is made to Kuṇḍalī by the Sādhaka, placing the Vijayā in his own mouth.

Mantra

Aiṁ (O Devī Sarasvatī), Thou Who controllest all life, do Thou inspire me, do Thou inspire me, and remain ever on the tip of my tongue. Svāhā[1].

स्वीकृत्य संविदां वामकर्णोद्ध्वें श्रीगुरुं नमेत्।
दक्षिणे च गणेशानमाद्यां मध्ये सनातनीम्।
कृताञ्जलिपुटो भूत्वा देवीध्यानपरायणः।। ८८।।

svīkṛtya saṁvidāṁ vāmakarṇorddhve śrīguruṁ namet/
dakṣiṇe ca gaṇeśānamādyāṁ madhye sanātanīm/
kṛtāñjaliputo bhūtvā devīdhyānaparāyaṇaḥ//

स्वीकृत्येपि। एवं संविदां भङ्गां स्वीकृत्य गृहीत्वा वामकर्णस्योद्ध्वंदेशे ओँ श्रीगुरुभ्यो नम इति मन्त्रेण श्रीगुरुं नमेत्। दक्षिणे दक्षिणकर्णस्थोद्ध्वंदेशे ओँ गणेशाय नम इति मन्त्रेण गणेशानं नमेत्। ओँ सनातन्यै आद्यायै काल्यै नम इत्यनेन मध्ये ललाटदेशे सनातनीमाद्यां कालिकां नमेत्।

After drinking the Vijayā[2] he should bow to the Guru, placing his folded palms over the left ear, then to Gaṇeśa, placing his folded palms over his right ear, and lastly to the Eternal Ādya Devī[3] by placing his folded palms in the middle of his forehead, and should meditate meanwhile on the Devī.

पूजाद्रव्याणि सर्वाणि दक्षिणे स्थापयेत् सुधीः।
वामे सुवासितं तोयं कुलद्रव्याणि यानि च।। ८९।।

pūjādravyāṇi sarvāṇi dakṣiṇe sthāpayet sudhīḥ/
vāme suvāsitaṁ toyaṁ kuladravyāṇi yāni ca//

पूजेति। पूजाद्रव्याणि पुष्पादीनि। कुलद्रव्याणि मद्यादीनि।

The Sādhaka should place the articles necessary for worship[4] on his right, and scented water and other Kula articles[5] on his left.

---

1. Aiṁ vada Vāgvādini mama jīvhāgre sthirī-bhava sarva-sattva-vaśaṅkari : Svāhā."
2. Bhāṁ.
3. The primordial Devī.
4. Pūjā-dravya, that is, flowers and the like.
5. Kula-dravya—*i.e.* wine, etc.

अस्त्रान्तमूलमन्त्रेण सामान्यार्घ्योदकेन च।
संप्रोक्ष्य सर्ववस्तूनि वेष्टयेज्जलधारया।
वह्निबीजेन देवेशि वह्नेः प्राकारमाचरेत्।। ९०।।

astrāntamūlamantreṇa sāmānyārghyodakena ca/
saṁprokṣya sarvavastūni veṣṭayejjaladhārayā/
vahnibījena deveśi vahneḥ prākāramācaret//

अस्त्रान्तेति। ततः अस्त्रान्तमूलमन्त्रेण फडन्तेन मूलमन्त्रेण सामान्यार्घ्योदकेन च सर्ववस्तूनि संप्रोक्ष्याभिषिञ्चय जलधारया वेष्टयेत्। हे देवेशि ततो वह्निबीजेन रमिति-बीजेन वह्नेः प्राकारमावरणमाचरेत् कुर्यात्।

Saying the Mūla-mantra terminated by the Weapon-Mantra,[1] let him take water from the common offering and sprinkle the articles of worship with it, and then enclose himself and the articles in a circle of water.[2] After that, O Queen of Devas! let him by the Vahni Bīja[3] surround them with a wall of Fire.

पुष्पं चन्दनसंयुक्तमादाय करयोर्द्वयोः।
अस्त्रेण घर्षयित्वा तत् प्रक्षिपेत् करशुद्धये।। ९१।।

puṣpaṁ candanasaṁyuktamādāya karayordvayoḥ/
astreṇa gharṣayitvā tat prakṣipet karaśuddhaye//

पुष्पमिति। ततः करशुद्धये चन्दनसंयुक्तं पुष्पं द्वयोः करयोरादाय गृहीत्वा अस्त्रेण फडिति मन्त्रेण तत् पुष्पं घर्षयित्वा प्रक्षिपेत्।

Then for the purification of the palms of his hands he should take up a flower which has been dipped in sandal paste, rub it between the palms, reciting the while the Mantra Phaṭ, and then throw it away (to his left).

---

1. Phaṭ.
2. That is, water is taken in the hand, and a few drops allowed to drop at a time while the hand makes a circle. A streak of water is thus made to surround (according to the text) the articles of worship. According, however, to Tarkālaṅkāra's Bengali translation, the worshipper (Sādhaka) surrounds both himself and the articles with the water.
3. That is, Raṁ, The Bīja of Fire.

तर्जनीमध्यमाभ्याञ्च वामपाणितले शिवे !
ऊर्द्ध्वोर्द्ध्वतालत्रितयं दत्वा दिग्बन्धनं ततः।
अस्त्रेण छोटिकाभिश्च भूतशुद्धिमथाऽऽचरेत्।। ९२।।

tarjanīmadhyamābhyāñca vāmapāṇitale śive
ūrddhvorddhvatālatritayaṁ datvā digbandhanaṁ tataḥ/
astreṇa choṭikābhiśca bhūtaśuddhimathā''caret//

तर्जनीति। हे शिवे ततः तर्जनीमध्यमाभ्यामङ्गुलिभ्यां वामपाणितले ऊर्द्ध्वोर्द्ध्वं तालत्रितयं दत्त्वा ततोऽस्त्रेण फडिति मन्त्रेण छोटिकाभिरङ्गुलिध्वनिभिश्च दिग्बन्धनमाचरेत्। अथ दिग्बन्धनादनन्तरं भूतशुद्धिमाचरेत्।

Then in the following manner let him fence all the quarters : so that no obstructions proceed from them.[1] Join the first and second fingers of the right hand, and tap the palm of the left hand three times, each time after the first with greater force, thus making a loud sound, and then snap the fingers while uttering the Weapon-mantra[2].

स्वाङ्के निधाय च करावुत्तानौ साधकोत्तमः।
मनो निवेश्य मूले च हुङ्कारेणैव कुण्डलीम्।। ९३।।
उत्थाप्य हंसमन्त्रेण पृथिव्या सहितां तु ताम्।
स्वाधिष्ठानं समानीय तत्वं तत्वे नियोजयेत्।। ९४।।

svāṅke nidhāya ca karāvuttānau sādhakottamaḥ/
mano niveśya mūle ca huṅkāreṇaiva kuṇḍalīm//
utthāpya haṁsamantreṇa pṛthivyā shitāṁ tu tām/
svādhiṣṭhānaṁ samānīya tatvaṁ tatve niyojayet//

भूतशुद्ध्याचरणप्रकारमेवाह स्वाङ्के इत्यादिभिः। साधकोत्तमः स्वाङ्के स्वक्रोडे उत्तानौ करौ निधाय संस्थाप्य मूले मूलाधारचक्रे च मनो निवेश्य हूङ्कारेणैव कुण्डलीमुत्थाप्य हंसमन्त्रेण हंसः इत्यात्मकेनैव मन्त्रेण पृथिव्या सहितां तां कुण्डलीं शक्तिं स्वाधिष्ठानं स्वाधिष्ठानचक्रं समानीय तत्त्वं पृथिव्यादिकं तत्त्वे जलादौ नियोजयेत् विलापयेत्।

He should then proceed to purify the elements of his body.[3]

---

1. This is the Dig-bandhana Fire.
2. Astra—that is, "Phaṭ".
3. This is the Bhūta-śuddhi rite in which the component element of the body are purified by an imagined process similar to the reals Kuṇḍalinī Yoga. See A. Avalon's *Serpent Power* and *Śakti and Sākta.*

The good Sādhaka should place his hands in his lap with the palms upwards, and fix his mind on the Mūlādhāra Cakra[1] and rouse Kuṇḍalinī by uttering the Bīja." Hūṁ ". Having so roused Her, he should lead Her with Pṛthivī[2] by means of the Haṁsa Mantra to the Svādhiṣṭhāna Cakra,[3] and there unite[4] the Tattva (of Pṛthivī or Earth and so forth) with the Tattva (of Jala or Water and the rest)[5].

गन्धादिघ्राणसंयुक्तां पृथिवीमप्सु संहरेत्।
रसादिजिह्वया सार्द्धं जलमग्नौ विलापयेत्।। ९५।।

gandhādighrāṇasaṁyuktāṁ pṛthivīmapsu saṁharet/
rasādijihvayā sārddhaṁ jalamagnau vilāpayet//

Then let him dissolve Pṛthivī as also odour, and the organ of Smell into the Tattva of Water.[6] Dissolve Water and Taste, as also the sense of Taste itself,[7] into the Tattva of Fire.

रूपादिचक्षुषा सार्द्धमग्निं वायौ विलाप्य च।
स्पर्शादित्वग्युतं वायुमाकाशे प्रविलापयेत्।। ९६।।

rūpādicakṣuṣā sārddhamagniṁ vāyau vilāpya ca/
sparśāditvagyutaṁ vāyumākāśe pravilāpayet//

---

1. The lowest of the six Cakras in the human body (see *Serpent Power*).
2. Earth element. The Pṛthivī Tattva together with whatever there is in the Mūlādhāra is brought up and dissolved in the Jala-tattva. The Tattva in each of the lower centres is first united with and then dissolved into that in a higher.
3. The Cakra next above the Mūlādhāra at the sexual organs (see *Serpent Power*). In actual Yoga the Vāyu is gently driven up the middle of the Suṣumnā Nāḍī, by the Haṁsa Mantra and Pṛthivī, which is in the Mūlādhāra, is absorbed in Kuṇḍalī.
4. Niyojayet=Vilāpayet.
5. Here commences the description of the rite of Bhūta-śuddhi.
6. The Guṇa of Pṛthivī is smell. This Guṇa and the sense of smell is dissolved in Water. Odour is the objective and the sense of Smell the subjective side of Pṛthivī. Both are dissolved in "water" in the Svādhiṣṭhāna.
7. The tongue. The objective physical quality of Water affects as us Taste. Subjectively the Tattva is the sense of Taste through the organ the tongue.

पृथिव्यादेस्तत्वस्य जलादितत्वे विलापनप्रकारमेव दर्शयन्नाह गन्धादीत्यादि। गन्ध आदिर्यस्य तद्गन्धादि एवम्भूतञ्च तद्घ्राणं नासा चेति गन्धादिघ्राणे तेन संयुक्तां पृथिवीम् अप्सु जलेषु संहरेत् विलापयेत्। घ्राणादीति पाठे तु घ्रायते नासिकया गृह्यते यः स घ्राणो गन्ध एव। जलादिकमप्यग्न्यादावेवमेव विलापयेत्।

Dissolve Fire and Form, and the sense of Sight itself,[1] into Air.

Let Air and all connected therewith[2] and Touch, as also the sense of Touch itself be dissolved into Ether[3].

अहङ्कारे हरेद् व्योम सशब्दं तन्महत्यपि।
महत्तत्वञ्च प्रकृतौ तां ब्रह्मणि विलापयेत्।। ९७।।

ahaṅkāre hared vyoma saśabdaṁ tanmahatyapi/
mahattatvañca prakṛtau tāṁ brahmaṇi vilāpayet//

अहङ्कार इति। अहङ्कारे सशब्दं शब्दसहितं व्योम आकाशं हरेत् विलापयेत्। तत् अहङ्कारतत्वं महति महत्तत्त्वे हरेत्। महत्तत्त्वञ्च प्रकृतौ विलापयेत्। तां प्रकृतिं ब्रह्मणि विलापयेत्।

Dissolve Ether along with Sound into Ahaṅkāra[4] and the latter into Mahat,[5] Mahat itself into Prakṛti, and Prakṛti Herself into Brahman.

इत्थं विलाप्य मतिमान् वामकुक्षौ विचिन्तयेत्।
पुरुषं कृष्णवर्णञ्च रक्तश्मश्रुविलोचनम्।। ९८।।
रक्तचर्मधरं क्रुद्धमङ्गुष्ठपरिमाणकम्।
सर्वपापस्वरूपञ्च सर्वदाऽधोमुखस्थितम्।। ९९।।

itthaṁ vilāpya matimān vāmakukṣau vicintayet/
puruṣaṁ kṛṣṇavarṇañca raktaśmaśruvilocanam//
raktacarmadharaṁ kruddhamaṅguṣṭhaparimāṇakam/
sarvapāpasvarūpañca sarvadā'dhomukhasthitam//

1. The eyes. Both objective Fire and Form and subjective Vision are dissolved in Air.
2. Everything that can be touched.
3. Vyoma—that is, the void in which Ether is.
4. The "I-making" faculty of Consciousness, from which the five subtle elements (already in the worship ideally dissolved) proceed.
5. Mahat, or the Mahat-tattva, that is, Buddhi.

इत्थमिति। मतिमान् साधक इत्थममुना प्रकारेण पृथिव्यादितत्त्वं विलाप्य वामकुक्षौ वामे उदरे कृष्णवर्णं सर्वपापस्वरूपं पुरुषं विचिन्तयेत्। रक्तश्मश्रुविलोचनमित्यादिनि द्वितीयान्तपदानि सर्वपापस्वरूपस्य पुरुषस्यैव विशेषणानि। रक्तश्मश्रुविलोचनम् रक्ते लोहितवर्णे श्मश्रुविलोचने यस्य तथाभूतम्।

Let the Sādhaka, having thus dissolved all the Tattvas,[1] then think of a black man in the left cavity of his abdomen the embodiment of all sin.[2] He is of the size of a thumb, with red beard and red eyes, holding a sword and shield, angry, with his head ever held low.

ततस्तु वामनासायां यं बीजं धूम्रवर्णकम्।
सञ्चिन्त्य पूरयेत्तेन वायुं षोडशमात्रया।
तेन पापात्मकं देहं शोषयेत् साधकाग्रणीः।। १००।।

tatastu vāmanāsāyāṁ yaṁ bījaṁ dhūmravarṇakam/
sañjintya pūrayettena vāyuṁ ṣoḍaśamātrayā/
tena pāpātmakaṁ dehaṁ śoṣayet sādhakāgraṇīḥ//

ततस्त्विति। ततोऽनन्तरन्तु वामनासायां धूम्रवर्णकं यं बीजं सञ्चिन्त्य तदेव बीजं जपन् साधकस्तेन वामनासारन्ध्रेण षोडशमात्रया वायुं पूरयेदाकर्षेत्। साधकाग्रणीः साधकोत्तमस्तेन पूरितेन वायुना पापात्मकं पापमात्मनि स्वस्मिन् यस्य एवम्भूतदेहं शोषयेत्।

Then the foremost of Sādhakas should meditate on the smoky-coloured Vāyu Bīja[3] as in his left nostril, and as he inhales through that nostril mentally repeat it sixteen times, and thus dry the sinful body.

नाभौ रं रक्तवर्णञ्च ध्यात्वा तज्जातवह्निना।
चतुःषष्ट्या कुम्भकेन दहेत् पापरतान्तनूम्।। १०१।।

---

1. There are altogether twenty-five Tattvas, categories, principles, or elements in the Sāṅkhya Philosophy. The twenty-three emenations from Prakṛti are dissolved into Her who is one with Brahman.
2. Pāpātamakam deham=pāpam ātmani svasmin yaṣya evaṁ bhūtam deham (Bhāratī)—the body wherein sin abides. This is the Pāpapuruṣa See "Sinful body" next verse.
3. That is, Yaṁ. The colour Dhūmra is smoky grey—the reddish colour of fire seen through smoke. Vāyu is a friend of fire because it is necessary to and fans it.

nābhau raṁ raktavarṇañca dhyātvā tajjātavahninā/
catuḥṣaṣṭyā kumbhakena dahet pāparatāntanūm//

नाभाविति। ततो नाभौ रक्तवर्णं रमिति बीजं ध्यात्वा तदेव बीजं जपन्नपि तज्जातवह्निना ततो रमिति बीजादुत्पन्नेनाग्निना चतुःषष्ट्या कुम्भकेन पापरतां निजां तनूं दहेत्।

Next, meditating on the red Bīja of Agni[1] which is in the navel, the (Sādhakas) body with all its sinful inclinations should be burnt up by the fire born of the Bīja, assisted by sixty-four Kumbhakas[2].

ललाटे वारुणं बीजं शुक्लवर्णं विचिन्त्य च।
द्वात्रिंशता रेचकेन प्लावयेदमृताम्भसा।। १०२।।

lalāṭe vāruṇaṁ bījaṁ śuklavarṇaṁ vicintya ca/
dvātriṁśatā recakena plāvayedamṛtāmbhasā//

ललाटे इति। ततो ललाटे शुक्लवर्णं वारुणं वमिति बीजं सञ्चिन्त्य तदेव बीजं जपन्नपि द्वात्रिंशता रेचकेनामृताम्भसा वारुणबीजच्युतेनामृतरूपेण जलेन दग्धां तनूं प्लावयेत्।

Then, thinking of the white Varuṇa-Bīja[3] in his forehead, let him bathe (the body which has been so burnt) with the nectar-like water dropping from the Varuṇa-Bīja by thirty-two repetitions thereof whilst exhaling[4].

आपादशीर्षपर्यन्तमाप्लाव्य तदनन्तरम्।
उत्पन्नं भावयेद्देहं नवीनं देवतामयम्।। १०३।।

āpādaśīrṣaparyantamāplāvya tadanantaram/
utpannaṁ bhāvayeddehaṁ navīnaṁ devatāmayam//

---

1. That is, Raṁ—Bīja is Fire.
2. Kumbhaka. The technical name of inspiration is Pūraka : of expiration, Recaka; and the restraining or holding of breath is known as Kumbhaka. Here, then, there are to be sixty-four Kumbhakas, at the same time sixty-four repetitions of the Agni Bīja, that is, the period is one requiring sixty-four repetitions of the Bīja.
3. That is, Vaṁ—Bīja of Water.
4. Recaka, which is also repetitions of Varuṇa-Bīja, is to be performed thirty-two times.

आपादेति। एवमापादशीर्षपर्यन्तं देहमाप्लाव्य तदनन्तरं देवतामयं देवतादेहस्वरूपं नवीनमुत्पन्नं देहं भावयेत् चिन्तयेत्।

Having thus bathed the whole body from feet to head, let him consider that a new born Deva body has come into being.

पृथ्वीबीजं पीतवर्णं मूलाधारे विचिन्तयन्।
तेन दिव्यावलोकेन दृढीकुर्यान्निजां तनूम्।। १०४।।

pṛthvībījaṁ pītavarṇaṁ mūlādhāre vicintayan/
tena divyāvalokena dṛḍhīkuryānnijāṁ tanūm//

पृथ्वीति। ततो मूलाधारे पीतवर्णं लमित्याकारकं पृथ्वीबीजं विचिन्तयन् सन् तेन लमिति-बीजेन दिव्यावलोकेन च निजां तनूं दृढीकुर्यात्।

Then, thinking of the yellow Bīja of the Earth[1] as situate in the Mūlādhāra circle,[2] let him strengthen his body by that Bīja and by a steadfast and winkless gaze[3].

हृदये हस्तमादाय आँ ह्रीँ क्रौँ हंस उच्चरन्।
सोऽहं मन्त्रेण तद्देहे देव्याः प्राणान् निधापयेत्।। १०५।।

---

1. Pṛthivī-Bīja—Laṁ.
2. The Mūlādhāra Lotus, two digits below the sexual organ and two digits above the anus.
तानेवाखण्डादीन् पञ्चमन्त्रान् क्रमतो दर्शयति अखण्डैकेत्यादि। हे कुलरूपिणि अखण्डैकरसानन्दाकरे पूर्णप्रधानानुरागानन्दजनके परसुधात्मनि श्रेष्ठसुरास्वरूपेऽत्र वस्तुनि स्वच्छन्दस्फुरणां स्वतन्त्रां विस्फूर्त्तिं निधेहि स्थापय। "गुणे रागे द्रवे रस" इत्यमरः।

Mantras

O Kula-rūpiṇī![4] infuse its natural joy[5] into this excellent

---

1. The particular Devatā of the worshipper : here Kālī.
2. Abhimantrayet.
3. The first word of the next verse.
4. Image of Kula : Brahma-rūpiṇī (*cf.* Kula=Sanātana Brahman).
5. Svacchanda-Sphuraṇām—The words are difficult to translate but the sense seems as stated. Svacchanda=of one's own will independently, spontaneous; natural; Sphuraṇa=bursting forth and joy. That is the joy or thrill which is a form of Brahman bliss.

wine which is the source of uniform and unbroken bliss joy.[1]

अनङ्गस्थामृताकारे शुद्धज्ञानकलेवरे।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि।। ३९।।

anaṅgasthāmṛtākāre śuddhajñānakalevare/
amṛtatvaṁ nidhehyasmin vastuni klinnarūpiṇi//

अनङ्गेत्यादि। हे अनङ्गस्थामृताकारे कामस्थामृतस्वरूपे हे शुद्धज्ञानकलेवरे शुद्धज्ञानरूपशरीरे त्वं क्लिन्नरूपिणि स्तिमितरूपिण्यस्मिन् सुरारूपे वस्तुनि अमृतत्वं निधेहि स्थापय।

Thou who art Pure Jñāna art also the nectar which is in Anaṅga,[2] place into this liquid substance ambrosia[3] which is Brahma bliss.

तदूपेणैकरस्यञ्च कृत्वाऽर्घ्यं तत्स्वरूपिणि।
भूत्वा कुलामृताकारं मयि विस्फुरणं कुरु।। ४०।।

tadrūpeṇaikarasyañca kṛtvā'rghyaṁ tatsvarūpiṇi/
bhūtvā kulāmṛtākāraṁ mayi visphuraṇaṁ kuru//

तदूपेणेत्यादि। हे तत्स्वरूपिणि तत्तत्स्वरूपशालिनि त्वं तदूपेण प्रधानमाधुर्य-रसरूपेणार्घ्यमर्चार्थं मद्यमैकरस्यं प्रधानमाधुर्यरसविशिष्टं कृत्वा कुलामृताकारं सुधारूपं वस्तु च भूत्वा मयि विस्फुरणं विस्फूर्तिं कुरु।

---

1. Akhaṇḍaīkarasānandākare parasudhātmani.
Svacchandasphuraṇām atra nidhehi kularūpiṇi.
2. A name of Kāma=God of Love. That is the Svarūpa of the nectar which is in Kāma. Kāma is here the cosmic Kāma, the Will or Desire which produced the universe with all its desires. It is nectar for Nectar is the source of life and joy accompanies it. This cosmic Will is in the individual sexual desire from which proceeds individual life. The interpretation adopted is that of Hariharānanda Bhāratī. Tarkālaṅ-kāra's runs as follows : Although this liquid substance if for those who have desire do Thou yet place in iot the nectar which is Brahman Bliss.
3. Amṛta=here Brahmānanda (Bhāratī).
Anaṅgasthāmṛtākāre śuddhajñānakalevare.
Amṛtatvaṁ nidhehyasmin vastuni klinnarūpiṇi.

O Thou, who art That![1] do Thou make[2] this Arghya one in substance with That, and having become the Kulāmṛta,[3] manifest in me.[4].

ब्रह्माण्डरससम्भूतमशेषरससम्भवम् ।
आपूरितं महापात्रं पीयूषरसमावह।। ४१ ।।

brahmāṇḍarasasambhūtamaśeṣarasasambhavam /
āpūritaṁ mahāpātraṁ pīyūṣarasamāvaha//

ब्रह्माण्डेत्यादि। हे देवि सुरया पूरितं महापात्रं प्रति ब्रह्माण्डरससम्भूतं ब्रह्माण्डे ये रसास्तेभ्यः सञ्जातमतएवाशेषरससम्भवम् अशेषस्य सर्वस्य रसस्य सम्भवो यत्र तथाभूतं पीयूषरसमावहाऽऽनय।

Bring into this great cup, which is full of wine, the essence of ambrosia produced from the essence of all that is in this world with all its differing kinds of taste[5].

अहन्तापात्रभरितमिन्दन्तापरमामृतम् ।
पराहन्तामये वह्नौ होमस्वीकारलक्षणम्।। ४२ ।।

ahantāpātrabharitamindantāparamāmṛtam /
parāhantāmaye vahnau homasvīkāralakṣaṇam//

अहन्तेत्यादि। अहन्ताऽहम्भावः तदूपे पात्रे भरितं धारितं यदिदन्तापरमामृतम् इदन्ता मदीयमिदं मदीयमिदभित्येतद्भावः तदूपं यत् परममृतं तस्य पराहन्तामये परा

1. Tatsvarūpiṇī=Tattatsvarūpaśālinī (Bhāratī).
2. Tadrūpeṇa eka-rasyaṁ kṛtvā arghyaṁ=Having unified this Arghya with That. Eka-rasyaṁ=State o being in the same Rasa (emotion, sentiment). Tadrūpeṇa=Pradānamādurya-rūpeṇa (Bhāratī) that is, with supreme Bliss. Ekarasyaṁ=Pradhāna mādhurya-viśiṣṭam, *i.e.*, endowed with supreme Bliss. Arghyam=the consecrated wine. The Sādhaka here invokes Brahman bliss into the wine he is about to use for the purpose of his Sādhanā. Tat=Brahman=Supreme Bliss. The Sādhaka prays that through that wine he may be united with that Bliss.
3. Consecrated wine.
4. *i.e.*, Bring me joy.
   Tadrūpeṇaikarasyaṁ ca kṛtvārghyaṁ tatsvarūpiṇi.
   Bhūtvā kulāmṛtākāram mayi viśphuraṇaṁ kuru.
5. Brahmāṇḍarasa-sambhūtam aśeṣa-rasa-sambhavaṁ
   Āpūritaṁ mahāpātraṁ pīyūṣa-rasam āvaha.

याऽहन्ताऽम्भावस्तदूपे वह्नौ होमस्वीकारलक्षणं कुर्यात्। अहन्तारूपपात्रसहितं तत्स्थापितेदन्तारूपपरमामृतं पराहन्तारूपे वह्नौ जुहुयादित्यर्थः।

I offer as oblation into the Fire of the Supreme Self (Parāhaṁtāmaye) the excellent nectar of Thisness (Idaṁtā)[1] with which the cup of I-ness is filled. (Ahaṁtā-pātrabharitam).

इत्यामन्त्र्य ततस्तस्मिन् शिवयोः सामरस्यकम्।
विभाव्य पूजयेद्धूपदीपावपि च दर्शयेत्।। ४३।।

ityāmantrya tatastasmin śivayoḥ sāmarasyakam/
vibhāvya pūjayeddhūpadīpāvapi ca darśayet//

इतीति। इति एतैः पञ्चभिर्मन्त्रैर्मद्यमामन्त्र्य ततोऽनन्तरं तस्मिन्मद्ये शिवयोः शिवायाः शिवस्य च सामरस्यमैकरस्यं विभाव्य विचिन्त्य तन्मद्यं पूजयेत् तस्योपरि धूपदीपावपि च दर्शयेत्।

Having thus consecrated the wine with the Mantra, think of the union[2] in it of Śiva and Śivā[3] and worship it by waving lights and burning incense-sticks before it[4].

---

1. Ahaṁtāpātra-bharitaṁ idaṁtāparamāmṛtaṁ :
Parāhaṁtāmaye vahnau homa-svīkāra-lakṣaṇaṁ.
Aham=I. Ahantā="I-ness" (Ahaṁkāra). Idaṁ=this. Idaṁtā=Thisness. These two as duality are offered to the one supreme Self beyond "I" and "This". See as to Idaṁtā, *Taitt.-Up. Cf.* Jñānārṇava Tantra, XXI, v. 25.
A is the first and Ha the last letter of the alphabet, Ma (M) being the usual terminal; Aham then represents all the letters of the alphabet which is the manifested Śabda Brahman. Aham=Jīvātmā; Parāham= Brahman. So it is said Tato'haṁnāma abavat. (*Br.-Up.*, 1, 4, 1; 5, 5, ; When a man is asked "who are you?" (Kastvam) he replies "it is I" (Aham) and then gives his name. When he says Aham or I he affirms that he is Brahman. He refers to his individual self when he gives his name. "This" arises when the Ātamā as "I" posits itself over against it. Idaṁtā=universe which is in the Aham and yet appears separate from it. Parāhaṁtā=the Supreme "I-ness" as Paramātmā. By this Mantra the Sādhaka endeavours to realise the oneness of the individual self (Ahaṁtā) with the Supreme Self (Parāhaṁtā). The joy (Ānanda) which is in the wine is a form of the supreme Bliss (Paramānanda) of which it is a manifestation.
2. Sāmarasya=Eka-rasya (*vide* p. 147, note. 2).
3. Śiva and His Śakti.
4. Ārati.

इति श्रीपात्रसंस्कारः कथितः कुलपूजने।
अकृत्वा पापभाङ्मन्त्री पूजा च विफला भवेत्।। ४४।।

iti śrīpātrasaṁskāraḥ kathitaḥ kulapūjane/
akṛtvā pāpabhāṅmantrī pūjā ca viphalā bhavet//

इतीति। अकृत्वा श्रीपात्रसंस्कारमिति शेषः।

This is the consecration of the Śrī-pātra[1] in Kaulika worship. Without such purification the disciple is guilty of sin, and the worship is fruitless[2].

घटश्रीपात्रयोर्मध्ये पात्राणि स्थापयेद्बुधः।
गुरुपात्रं भोगपात्रं शक्तिपात्रमतः परम्।। ४५।।

ghaṭaśrīpātrayormadhye pātrāṇi sthāpayedbudhaḥ/
gurupātraṁ bhogapātraṁ śaktipātramataḥ param//

ननु घटश्रीपात्रयोर्मध्ये किंकिं पात्रं स्थापयेत् तत्राह गुरुपात्रमित्यादि।

योगिनीवीरपात्रे च बलिपात्रं ततः परम्।
पाद्याचमनयोः पात्रं श्रीपात्रेण नव क्रमात्।
सामान्यार्घ्यस्य विधिना पात्राणां स्थापनञ्चरेत्।। ४६।।

yoginīvīrapātre ca balipātraṁ tataḥ param/
pādyācamanayoḥ pātraṁ śrīpātreṇa nava kramāt/
sāmānyārghyasya vidhinā pātrāṇāṁ sthāpanañcaret//

श्रीपात्रेण सह नव पात्राणि क्रमात् स्थापयेत्। ननु केन विधिना पात्राणि स्थापयेत् तत्राह सामान्यार्घ्यस्येत्यादि।

The wise one should then, according to the rules prescribed for the placing of the common offering,[3] place between the jar and the Śrī-pātra, the Guru-pātra, the Bhoga-pātra, the Śakti-pātra, the Yogin-pātra, the Vīra-pātra, the Bali-pātra, the Pādya-pātra and the the Ācamanya-pātra[4] making nine cups in all.

---

1. See p. 211, note 1.
2. See as, to pañca-tattva, Woodroffe's *Śakti and Śākta.*
3. Sāmānyārghya.
4. The Bhoga-pātra, Śakti-pātra, Yoginī-pātra, Vīra-pātra, Bali-pātra, Pādya-pātra, and Ācamanīya-pātra (see Ullāsa, x, 148) are cups used for different purposes in the Cakra ritual. The use to which they are put are set out in the Text.

कलशस्थामृतेनैव त्रिभागं परिपूर्य च।
माषप्रमाणं पात्रेषु शुद्धिखण्डं नियोजयेत्।। ४७।।

kalaśasthāmṛtenaiva tribhāgaṁ paripūrya ca/
māṣapramāṇaṁ pātreṣu śuddhikhaṇḍaṁ niyojayet//

कलशस्थेत्यादि। कलशस्थामृतेनैव तेषां पात्राणां त्रिभागं परिपूर्यमाषप्रमाणं शुद्धिखण्डं मांसादिखण्डं पात्रेषु नियोजयेत् स्थापयेत्।

Then, filling the cups three-quarters full of wine from the jar, a morsel of Śuddhi[1] of the size of a pea should be placed in each of them.

वामाङ्गुष्ठानामिकाभ्याममृतं पात्रसंस्थितम्।
गृहीत्वा शुद्धिखण्डेन दक्षया तत्त्वमुद्रया।
सर्वत्र तर्पणं कुर्यात् विधिरेषः प्रकीर्त्तितः।। ४८।।

vāmāṅguṣṭhānāmikābhyāmamṛtaṁ pātrasaṁsthitam/
gṛhītvā śuddhikhaṇḍena dakṣayā tattvamudrayā/
sarvatra tarpaṇaṁ kuryāt vidhireṣaḥ prakīrttitaḥ//

वामेत्यादि। वामाङ्गुष्ठानामिकाभ्यां दक्षया च तत्त्वमुद्रया शुद्धिखण्डेन सहितं पात्रसंस्थितममृतं गृहीत्वा सर्वत्र तर्पणं कुर्यात्। सर्वत्र तर्पणे एष विधिः प्रकीर्त्तितः।

Then, holding the cup between the thumb and the fourth finger of the left hand, taking[2] the morsel of Śuddhi[3] in the right hand, and making the Tattva-mudrā, Tarpaṇa should be done. This is the practice which has been enjoined.

श्रीपात्रात् परमं बिन्दुं गृहीत्वा शुद्धिसंयुतम्।
आनन्दभैरवं देवं भैरवीञ्च प्रतर्पयेत्।। ४९।।

śrīpātrāt paramaṁ binduṁ gṛhītvā śuddhisaṁyutam/
ānandabhairavaṁ devaṁ bhairavīñca pratarpayet//

श्रीपात्रादिति। श्रीपात्राच्छुद्धिसंयुतं परमं बिन्दुं गृहीत्वा हसक्षमलवरयूम्

---

1. See p. 272, note 1.
2. Bhāratī adds : "With the wine from the cup"—Pātra-sthitāmṛtam. In the Tattva-mudrā the thumb and fourth finger are joined. *Jñānārṇava-Tantra*, XVI, 135.
3. See p. 272, note 1.

आनन्दभैरवाय वषट् आनन्दभैरवं तर्पयामि नम इत्यनेनानन्दभैरवं देवं सहक्षमलवरयीम् आनन्दभैरव्यै वौषट् आनन्दभैरवीं तर्पयामि स्वाहेत्यनेनानन्दभैरवीञ्च प्रतर्पयेत्।

Taking an excellent drop of wine from the Śrī-pātra and a piece[1] of Śuddhi,[2] Tarpaṇa[3] should be made to the Deva Ānanda-Bhairava and the Devī Ānanda-Bhairavī[4].

गुरुपात्रामृतेनैव तर्पयेद् गुरुसन्ततिम्।
सहस्रारे निजगुरुं सपत्नीकं प्रतर्प्य च।
वाग्भवाद्यस्वस्वनाम्ना तद्वद्गुरुचतुष्टयम्।।५०।।

gurupātrāmṛtenaiva tarpayed gurusantatim/
sahasrāre nijagurum sapatnīkaṁ pratarpya ca/
vāgbhavādyasvasvanāmnā tadvadgurucatuṣṭayam//

गुर्वित्यादि। गुरुपात्रामृतेनैव गुरुसन्ततिं गुरुसमूहं तर्पयेत्। ननु केन मन्त्रेण कुत्र वा स्थाने गुरुसन्ततिं तर्पयेत्तत्राह सहस्रारे इत्यादि। सहस्रारे पद्मे सपत्नीकं निजगुरुं प्रतर्प्य वाग्भवम् ऐँ बीजमाद्यं यस्य तथाभूतेन स्वस्वनाम्ना निजगुरुणा सह गुरुचतुष्टयं तद्वन्निजगुरुवत् प्रतर्पयेत्। यथा ऐँ सपत्नीकममुकानन्दनाथं श्रीगुरुं तर्पयामि नम इत्यनेन निजगुरुम् ऐँ सपत्नीकं परमगुरुन्तर्पयामि नम इति परमम् ऐँ सपत्नीकं परापरगुरुन्तर्पयामि नम इति परापरगुरुम् ऐँ सपत्नीकं परमेष्टिगुरुंतर्पयामि नम इति परमेष्टिगुरुं प्रतर्पयेदिति।

Then, with the wine in the Guru-pātra, should be offered oblations to the line of Gurus :[5] in the first place to the Sādhaka's own Guru seated together with his wife on the lotus of a thousand petals, and then in the same way to the other three Gurus who are the Parama Guru, the Parāpara Guru, the

1. The practice is to take it between the thumb and third finger of the right hand.
2. See p. 272, note 1.
3. Oblation. Made for the satisfaction of the Devatās or Pitṛs, the word being derived from Tṛp=to please or gratify.
4. The Mantra for this Tarpaṇa is as given under ch. v, verses 201 and 202 with the words Ānanda-bhairavam tarpayāmī Namaḥ in the case of Ānandabhairava and Ānandabhairavīm tarpayāmī Namaḥ in the case of the Devī.
5. Guru-santati. The Parama-Guru is the Guru's own Guru; Parā-para-Guru is the Guru of the latter; Parameṣṭī Guru is the Guru of the last.

Parameṣṭi-Guru successively.[1] In offering oblations to the four Gurus, the Vāgbhava-Bīja[2] should first be pronounced, followed in each case by the name of each of the four Gurus[3].

ततः स्वहृदयाम्भोजे भोगपात्रामृतेन च।
आद्यां कालीं तर्पयामि निजबीजपुरःसरम्।।५१।।

tataḥ svahṛdayāmbhoje bhogapātrāmṛtena ca/
ādyāṁ kālīṁ tarpayāmi nijabījapuraḥsaram//

Then, with wine from the Bhoga-pātra, the worshipper should, in the lotus of his heart, offer oblations to the Ādyā-Kālī. In this oblation Her own Bīja[4] should precede, and Svāhā should follow Her name.[5] This should be done thrice.

स्वाहान्तेन त्रिधा मन्त्री तर्पयेदिष्टदेवताम्।
शक्तिपात्रामृतैस्तद्वदङ्गावरणतर्पणम् ।।५२।।

svāhāntena tridhā mantrī tarpayediṣṭadevatām/
śaktipātrāmṛtaistadvadaṅgāvaraṇatarpaṇam //

तत इत्यादि। ततोऽनन्तरं निजबीजपुरःसरं यथास्यात्तथा स्वाहान्तेन स्वाहारूपेणान्तेन सहाद्यां कालींतर्पयामीत्युच्चरन्मन्त्री साधको भोगपात्रामृतेन स्वहृदयाम्भोजे इष्टदेवतां

---

1. See last note. The Guru is seated in the twelve-petalled lotus in the region of the Saharāra.
2. *i.e.*, Aiṁ.
3. It is customary also to add the Guru's wife's name, the wife being the Śakti. The Mantra thus runs Aiṁ Saśaktika-Guru Śrī (name)+ ānandanatha+name of Guru's wife+devyāṁbā śrī pādukāṁ tarpayāmī Namaḥ and so with Parama-guri and the rest. In doing Tarpaṇa to a Devatā the nectar should be held in the left hand, the fingers of which are formed into the Tattva-mudrā. The Śuddhi is in the right hand the fingers being in Tattva-mudrā. The Śuddhi is in the right hand th fingers being in Tattva-mudrā. The two hands are then brought together and carried to the Brahma-randhra and offering made thereon. On the Brahma-randhra previously draw a reversed triangle if the Devatā is female and upturned if male.
4. *i.e.*, Krīṁ.
5. Krīṁ Ādyāṁ Kālīṁ tarpayāmi Svāhā. Bhāratī says that the Mantra for the Tarpaṇa of the Devī is—Hrīṁ, Śrīṁ, Krīṁ, Parameśvara Svāhā Ādyāṁ Kālīṁ tarpayāmi Svāhā.

त्रिधा त्रिवारंतर्पयेत्। ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा आद्यां कालींतर्पयामि स्वाहेति मन्त्रेण तर्पयेदित्यर्थः। ततः शक्तिपात्रामृतैस्तद्वदेवाङ्गावरणतर्पणं कुर्यात्। अङ्गदेवतास्तर्पयामि स्वाहेत्यनेनाङ्गदेवताः आवरणदेवतास्तर्पयामि स्वाहेत्यनेनावरणदेवताश्च तर्पयेदित्यर्थः।

Next, with wine taken from the Śakti-pātra, oblation should be similarly offered to the Aṅga Devatās and the Āvaraṇa Devatās[1] of the Devī.

योगिनीपात्रसंस्थेन सायुधां सपरीकराम्।
सन्तर्प्य कालिकामाद्यां वटुकेभ्यो बलिं हरेत्।।५३।।

yoginīpātrasaṁsthena sāyudhāṁ saparīkarām/
santarpya kālikāmādyāṁ vaṭukebhyo baliṁ haret//

योगिनीत्यादि। योगिनीपात्रसंस्थेनामृतेन ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा सायुधां सपरीकरामाद्यां कालीं तर्पयामि स्वाहेति मन्त्रेण सायुधामायुधविशिष्टां सपरीकरां परिवारसहितामाद्यां कालिकां सन्तर्प्य वटुकेभ्यो बलिं हरेत् दद्यात्।

Then, with the wine in the Yoginī-pātra, oblation should be offered to the Ādyā-Kālikā carrying all her weapons and with all Her followers.

Then should follow the sacrifice to the Vaṭukas[2].

---

1. The word is Aṅgāvaraṇa=Aṅga+Āvaraṇa—that is, the Devatā of both classes (Bhakta, 226). By Aṅga is here meant the six limbs (Ṣaḍaṅga), of the Mūla devatā considered as Devatās, *e.g.*, Aṅgīnityā and Aṅganityā and by Āvaraṇa-Devatās, the attendant Devatās (see verse 96 *post*).
2. Between the Tarpaṇa to the Devī, as in verse 53, and before the sacrifice to Vaṭuka, the practice is to perform—(1) Tattva-śuddhi, which is done by seven Mantras, in each of which the following pentads : Prāṇa, Apāna, Vyāna, Udāna, Samāna-Pṛthivī, Ap, Tejas, Vāyu, Ākāśa—Prakṛti, Ahaṁkāra, Buddhi, Manas, Śrotra—Tvak, Cakṣu, Jihvā, Ghrāṇa, Vacas-Pāṇi, Pāda, Pāyu, Upastha, Śabda-Sparśa, Rasa, Rūpa, Gandha, Ākāśa-Vāyu, Tejas, Salila, Bhūmi Ātmā are mentioned by name, with the prayer that the same may be purified, and a declaration by the worshipper that he is the Jyotiḥ (light) and free from sins; (Jyotiḥ aham virajā vipāpmā) and (2) Tattva-svikāra;' and (3) Bindu-Svīkāra. (See Bhakta's edition, at p. 226.) These rites are describe as p. 261. Verse 54 describes the mode of sacrifice.

स्ववामभागे सामान्यं मण्डलं रचयेत् सुधीः।
सम्पूज्य स्थापयेत्तत्र सामिषान्नं सुधान्वितम्।।५४।।

svavāmabhāge sāmānyaṁ maṇḍalaṁ racayet sudhīḥ/
sampūjya sthāpayettatra sāmiṣānnaṁ sudhānvitam//

वटुकादिभ्यो बलिदानस्य विधिमाह स्ववामभागे इत्यादि। सुधीः धीरः स्ववामभागे सामान्यञ्चतुष्कोणं मण्डलं रयेयेत्। तन्मण्डलं सम्पूज्य तत्र मण्डले चतुर्दिक्षु तन्मध्ये च सुधान्वितं सुरासंयुक्तं सामिषान्नं मांसादिसहितमन्नं स्थापयेत्।

The wise Sādhaka should draw on his left an ordinary rectangular figure, and after worshipping it, place therein food with wine, meat, and other things.

वाङ्मायाकमलावञ्च वटुकाय नमः पदम्।
सम्पूज्य पूर्वभागे च वटुकस्य बलिं हरेत्।।५५।।

vāṅmāyākamalāvañca vaṭukāya namaḥ padam/
sampūjya pūrvabhāge ca vaṭukasya baliṁ haret//

वाङ्मायेत्यादि। वाङ्मायाकमलावञ्च ऐँ ह्रीँ श्रीँ सहितं वँ चेति बीजमुक्त्वा वटुकाय नम इति पदं वदेत्। योजनया ऐँ ह्रीँ श्रीँ वँ वटुकाय नम इति मन्त्रो जातः। अनेनैव मन्त्रेण मण्डलस्य पूर्वभागे वटुकं सम्पूज्य तत्रैव एषः सुधामिषान्वितान्नवलिः ऐँ ह्रीँ श्रीँ वँ वटुकाय नम इति मन्त्रेण वटुकस्य बलिं हरेत् दद्यात्।

With the Bījas of Vāk, Māyā, Kamalā,[1] prefixed to the Mantra :

"Vaṁ,[2] Salutation to Vaṭuka,[3]

---

1. *i.e.*, Aiṁ, Hrīṁ, Śrīṁ.
2. *i.e.*, Bīja of Vaṭuka.
3. Aiṁ, Hrīṁ, Śrīṁ, Vaṁ, Vaṭukāya Namaḥ.
Summarising Tarkālaṅkāra's Commentary : in Tattva-Svīkāra a tringale is drawn on the palm of the right hand. A piece of Śuddhi of the size of a pea is a placed upon it. This is taken up with thumb and middle finger of left hand. Uttering the Mūla-mantra together with the word Śiva, Śakti, Śadāśiva, Īśvara, Vidyā, Kalā, the Sādhaka says "I purity the gross body with Ātmā-Tattva" (that is, the Tattvas of the 36 Tattvas from Prakṛti to Pṛthivī). Then he consumes the Śuddhi. He next takes up anothe piece of Śuddhi and uttering the Mūla-mantra together with the words Māyā, Niyati, Śuddha-vidyā, Rāga, Puruṣa says "I purify the subtle body of Vidyā-Tattva" (that is the Tattvas

Vaṭuka should be worshipped in the East of the rectangle, and then offering should be made to him.

ततस्तु यां योगिनीभ्यः स्वाहा याम्यां हरेद्बलिम्।। ५६ ।।

tatastu yāṁ yoginībhyaḥ svāhā yāmyāṁ haredvalim//

ततस्त्विति। ततोऽनन्तरम् एषः सुधामिषान्वितान्नवलिर्यों योगिनीभ्यः स्वाहेति मन्त्रेण याम्यां मण्डलस्य दक्षिणे भागे योगिनीभ्यो वलि हरेत्।

Then, with the

Mantra

"Yaṁ to the Yoginīs Svāhā,"

offering should be made to the Yoginī,[1] on the South,

षड्दीर्घयुक्तं सम्वर्त्तं क्षेत्रपालाय हृन्मनुः।
अनेन क्षेत्रपालाय बलिं दद्यात्तु पश्चिमे।। ५७ ।।

ṣaḍdīrghayuktaṁ samvarttaṁ kṣetrapālāya hṛnmanuḥ/
anena kṣetrapālāya baliṁ dadyāttu paścime//

---

from Māyā to Puruṣa of the 36 Tattvas). He consumes the Śuddhi. Then he takes a third piece of Śuddhi and saying the mantra as before with the words commenceing with Prakṛti and ending with Bhūmi says "With the Śiva Tattva (*i.e.*, the Tattvas of the 36 commencing with Śiva-Tattva and ending with Sadvidyā Tattva) I purify my paradeha" (that is, causal body). Then saying the Mūla-mantra and all the 36 Tattvas, the vowels and consonants, says "I purify the Jīva the Āśraya of which (in which) are the Tattvas with all the Tattvas." In Bindu-Svīkāra, the Sādhaka realises that Kuṇḍalinī extends from the Mūlādhāra to the tip of the tongue and so meditating on Her becomes filled with Her presence (Tanmayo bhavet : that is, becomes Her). Then taking the Bindu from the Boghapātra uttering meanwhile the appropriate Mantra he should say "The liquid burns (Jvalati) I am the Light (Jyotiḥ). The Light is flaming (Jyotiḥ jvalati). Brahma am I (Brahmāhamasmi) He I am (So'ham) I am I (Aham eva aham). I make offering (Juhomi) Svāhā. Then taking the Bindu he says "I will speak of the Pratyakṣa Brahma, of Ṛtam Satyam. May He protect me. May he protect the speaker. May he protect me, May he protect the speaker. Svāhā." Then having taken Bindu as before he says : Oṁ Chandasām ṛṣayo yacchando bhamṛtā bhūvasā mandro medhayā spṛṇotu bhuvi sruvam meṇopāyatu Svāhā.

1. See p. 237, note 5.

षडित्यादि। षड्दीर्घयुक्तं सम्बर्त्तं क्षकारमुक्त्वा ततः क्षेत्रपालायेत्युक्त्वा ततो हृत् नम इति वदेत्। सर्वपदयोजनया क्षाँ क्षीँ क्षूँ क्षैँ क्षौँ क्षँः क्षेत्रपालाय नम इति मनुर्जातः। एषः सुधामिषान्वितान्नवलिरित्याद्येनानेनैव मनुना मण्डलस्य पश्चिमे भागे क्षेत्रपालाय बलिं दद्यात्।

And then to Kṣetra-pāla[1] on the West of the rectangle, with the

Mantra

"To Kṣetra-pāla Namaḥ,"

preceded by the letter Kṣa to which in succession the six long vowels are added with the Bindu[2].

खान्तबीजं समुद्धृत्य षड्दीर्घ स्वरसंयुतम्।
ङेऽन्तं गणपतिं चोक्त्वा वह्निजायांततो वदेत्।। ५८।।

उत्तरस्यां गणेशाय बलिमेतेन कल्पयेत्।
मध्ये तथा सर्वभूतबलिं दद्याद् यथाविधि।। ५९।।

khāntabījaṁ samuddhṛtya ṣaḍdīrghā svarasaṁyutam/
ṅe'ntaṁ gaṇapatiṁ coktvā vahnijāyāntato vadet//
uttarasyāṁ gaṇeśāya balimetena kalpayet/
madhye tathā sarvabhūtabaliṁ dadyād yathāvidhi//

खान्तेत्यादि। षड्दीर्घस्वरसंयुतं खान्तबीजं खस्यान्तो गकारस्तदूपं बीजं समुद्धृत्य ततो ङेऽन्तं गणपतिञ्चोक्त्वा ततो वह्निजायां स्वाहेति वदेत्। योजनया गाँ गीँ गूँ गैँ गौँ गँः गणपतये स्वाहेति मन्त्रो जातः। एषः सुधामिषान्वितान्नवलिरित्याद्येनानेनैव मन्त्रेण उत्तरस्यां मण्डलस्योत्तरेभागे गणेशाय बलिं कल्पयेद्दद्यात्। तथैव मण्डलस्य मध्ये यथाविधि विधिवत् सर्वभूतबलिं दद्यात्।

Following this, offering should be made to Gaṇa-pati on the North, with the Mantra formed by adding to the letter Ga the six long vowels in succession with the Bindu thereon, followed by the name of Gaṇeśa in the dative singular, and ending with Svāhā.[3] Lastly, offering should be made inside the

1. Protecting Devatā of the ground.
2. The mantra is—Kṣāṁ, Kṣīṁ, Kṣūṁ, Kṣaiṁ, Kṣauṁ, Kṣaḥ Kṣetrapālāya Namaḥ. The offering to Vaṭuka consists of food with wine.
3. *i.e.*, Gāṁ, Gīṁ, Gūṁ, Gaiṁ, Gauṁ, Gaḥ Gaṇa-pataye Svāhā.

rectangle to all Bhūtas,[1] according to proper form.

ह्रीँ श्रीँ सर्वपदञ्चोक्त्वा विघ्नकृद्भ्यस्ततो वदेत्।
सर्वभूतेभ्य इत्युक्त्वा हूँ फट् स्वाहा मनुर्म्मतः।। ६०।।

hrīṁ śrīṁ sarvapadañcoktvā vighnakṛdbhyastato vadet/
sarvabhūtebhya ityuktvā hūṁ phaṭ svāhā manurmmataḥ//

सर्वभूतेभ्यो बलिदानस्य मन्त्रमाह एकेन ह्रीमिति। ह्रीँ श्रीँ सर्वपदमुक्त्वा ततो विघ्नकृद्भ्यः इति वदेत्। ततः सर्वभूतेभ्य इत्युक्त्वा हूं फट् स्वाहेति वदेत्। योजनया ह्रीँ श्रीँ सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हूँ फट् स्वाहेति मनुर्जातः। एष सुधामिषान्वितान्नवलिरित्याद्योऽयमेव मनुः सर्वभूतेभ्यो बलिदाने मतः।

Uttering "Hrīṁ, Śrīm, Sarva-vighna-kṛdbhyaḥ, add " Sarva-bhūtebhya," and then "Hūṁ Phaṭ Svāhā "; this is how the Mantra is formed[2].

ततः शिवायै विधिवद्बलिमेकं प्रकल्पयेत्।
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि।। ६१।।

शुभाशुभं फलं व्यक्तं ब्रूहि गृह्ण बलिं तव।
मूलमेषं वलिः पश्चात् शिवायै नम इत्यपि।
चक्रानुष्ठानमेतत्तु तवाग्रे कथितं शिवे।। ६२।।

tataḥ śivāyai vidhivadvalimekaṁ prakalpayet/
gṛhṇa devi mahābhāge śive kālāgnirūpiṇi//
śubhāśubhaṁ phalaṁ vyaktaṁ brūhi gṛhṇa baliṁ tava/
mūlameṣaṁ valiḥ paścāt śivāyai nama ityapi/
cakrānuṣṭhānametattu tavāgre kathitaṁ śive//

तत इति। ततोऽनन्तरं शिवायै फेत्कारिकायै विधिवदेकं बलिं प्रकल्पयेत् दद्यात्। शिवायै बलिदानस्य मन्त्रमाह सार्द्धेन। गृह्णेति। गृह्ण देवि महाभागे इत्याद्युक्त्वा मूलमन्त्रं वदेत्। ततः एष बलिरित्युक्त्वा पश्चात् शिवायै नम इत्यपि वदेत्। सकलपदयोजनया

---

1. Sarva-bhūta (explained in the Mantra in next note). The manner of offering Sarva-bhūta-bali is described in following Śloka. The offering is the same as to Vaṭuka.
2. *i.e.*, Hrīṁ, Śrīṁ, sarva-vighna-kṛdbhyaḥ sarva-bhūtebhyaḥ Hūṁ Phaṭ Svāhā, or Hrīṁ, Śrīṁ, Saslutation to all Beings which cause obstruction, Hūṁ Phaṭ Svāhā—that is, cause obstruction to the worship. The ritual will be found described in detail in Bhakta's Edition, at p. 230.

गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ह्रीँ श्रीँ क्रीँ परमे स्वाहा एष बलिः शिवायै नम इति मन्त्री जातः। अनेनैव शिवायै बलिं दद्यात्।

Then an offering to Śiva[1] should be made in manner ordained with the following

Mantra

Oṁ, O Devī O Śivā, O Exalted One, Thou art in the form of the final Conflagration[2] at the Dissolution of things, deign to accept this sacrifice, and to reveal clearly to me the good and evil which I am to receive. Hrīṁ, Śrīṁ, Krīṁ, Parameśvarī, Svāhā. This offering is for Thee : Obeisance to Śivā.

O Holy One! I have now described to Thee the mode of formation of the circle of worship[3] (and the placing of the cups[4] and other rites).

चन्दनागुरुकस्तूरिवासितं सुमनोहरम्।
पुष्पं गृहीत्वा पाणिभ्यां करकच्छपमुद्रया।। ६३।।
नीत्वा स्वहृदयाम्भोजे ध्यायेदाद्यां परात्पराम्।। ६४।।

candanāgurukastūrivāsitaṁ sumanoharam/
puṣpaṁ gṛhītvā pāṇibhyāṁ karakacchapamudrayā//
nītvā svahṛdayāmbhoje dhyāyedādyāṁ parātparām//

चन्देनेत्यादि। ततश्चन्दनागुरुकस्तूरिवासितं सुमनोहरं पुष्पं पाणिभ्यां गृहीत्वा करकच्छपमुद्रया हृदि नीत्वा च स्वहृदयाम्भोजे परात्परामाद्यां कालीं ध्यायेत्।

---

1. This is Śivābali or offering to the jackal. The word means a jackal, and in the commentary of Bhāratī the word is said here to be the equivalent of Phet-kārikā (=Howling), which means a jackal. There is a well-known Tantra of this name. The jackal acompanies the Devī and feasts on the leavings. It is a Tāntrika usage to feed female jackals at and after midnight. The jackal feeds on carcases and frequents cremation grounds and hence is emblematic of final dissolution.
2. Kālāgni-rūpiṇī.
3. Cakrānuṣṭhāna. The Mantra of offering to Śivā consists of the two lines beginning with Gṛhṇa and ending valing tava following Hrīṁ, Śrīṁ, Krīṁ, Parameśvarī Svāhā; Eṣa Baliḥ Śivāyai Namaḥ.
4. The Śrī-pātra and other Pātras.

Then, making with the two hands the Kacchapa-Mudrā,[1] let the Sādhaka take up with his hands a beautiful flower scented with sandal, fragrant aloes, and saffron and holding it against his heart, let him meditate upon the most supreme Ādyā[2] in the lotus of his heart.

सहस्त्रारे महापद्मे सुषुम्नाब्रह्मवर्त्मना।
नीत्वा सानन्दितां कृत्वा बृहन्निश्वासवर्त्मना।
दीपाद्दीपान्तरमिव तत्र पुष्पे नियोज्य च।। ६५।।

यन्त्रे निधापयेन्मन्त्री दृढभक्तिसमन्वितः।
कृताञ्जलिपुटो भूत्वा प्रार्थयेदिष्टदेवताम्।। ६६।।

sahasrāre mahāpadme suṣumnābrahmavartmanā/
nītvā sānanditāṁ kṛtvā bṛhanniśvāsavartmanā/
dīpāddīpāntarmiva tatra puṣpe niyojya ca//
yantre nidhāpayenmantrī dṛḍhabhaktisamanvitaḥ/
kṛtāñjaliputo bhūtvā prārthayediṣṭadevatām//

सहस्त्रारे इति। स्वहृदयाम्भोजे ध्यात्वा चाद्यां कालीं ततः सुषुम्ना या नाडी तदूपेण ब्रह्मवर्त्मना सहस्त्रारे महापद्मे नीत्वा प्रापय्य सुधापायनया सानन्दितामानन्दयुताञ्च कृत्वा दीपाद्दीपान्तरमिवान्यं दीपमिव तस्या एव काल्याः सकाशादपरामाद्यां कालीं वृहन्निश्वासवर्त्मना नासापुटेन वहिरानीय तत्र पाणिसंस्थे पुष्पे नियोज्य संस्थाप्य च दृढभक्तिसमन्वितो मन्त्री हस्तस्थपुष्पस्थापितां देवीं यन्त्रे निधापयेत् स्थापयेत्। ततः कृताञ्जलिपुटो भूत्वेष्टदेवता प्रार्थयेत्।

The Sādhaka should next lead the Ādyā-Kālī (in the heart) along the path[3] which leads to Brahman and which is within the Suṣumnā-Nāḍī[4] to the great lotus of a thousand petals[5] and

1. Tortoise Gesture. The right thumb is left free, the first finger of right hand is palced on the first finger of left, the second and third fingers of the right are placed between the thumb and first finger of left, the little finger of right hand is placed on first finger of left, and the remaining three fingers of left are placed on the back of the right hand, which is slightly curved.
2. Parātparām Ādyāṁ=The Supreme Ādyā or Kālī.
3. The central "nerve" in the Merudaṇḍa or spine. See *serpent Power*.
4. Brahma-vartman : just as Rāja-vartman means the King's highway.
5. See *Serpent Power* as to this Sahasrāra-Padma.

there make Her joyful[1] (by Her union with Her Lord). Then bringing Her forth through his nostrils (as if another Ādyā-Kālī[2] emanates from Her) as light from light let the Sādhaka place Her on the flower[3] (which is in his hand). The Sādhaka versed in the Mantra with firm faith should then place the flower[4] on the Yantra,[5] and with folded hands pray with all devotion to his Iṣṭa-devatā[6] thus.

देवेशि भक्तिसुलभे परिवारसमन्विते।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव।। ६७।।

deveśi bhaktisulabhe parivārasamanvite/
yāvat tvāṁ pūjayiṣyāmi tāvat tvaṁ susthirā bhava//

किं प्रार्थयेत्तत्राह देवेशीत्यादि।

Mantra

O Queen of the Devas! Thou who art easily attained by devotion.[7] Remain here, I pray Thee, with all Thy following, the while I worship Thee.

क्रीमाद्ये कालिके देवि परिवारादिभिः सह।
इहागच्छ द्विधा प्रोक्त्वा इह तिष्ठ द्विधा पुनः।। ६८।।
इह शब्दात् सन्निधेहि इह सन्निपदात्ततः।
रुध्यस्व पदमाभाष्य मम पूजां गृहाण च।। ६९।।
इत्थमावाहनं कृत्वा देव्याः प्राणान् प्रतिष्ठयेत्।। ७०।।

krīmādye kālike devi parivārādibhiḥ saha/
ihāgaccha dvidhā proktvā iha tiṣṭha dvidhā punaḥ//
iha śabdāt sannidhehi iha sannipadāttataḥ/
rudhyasva padamābhāṣya mama pūjāṁ gṛhāṇa ca//
itthamāvāhanaṁ kṛtvā devyāḥ prāṇān pratiṣṭhayet//

1. For Her Lord and Husband is there, with whom She is there united. See *Serpent Power*, v. 52, and notes under it.
2. Aparāṁ Ādyāṁ Kālīṁ (Bhāratī).
3. Reffered to in verses 63, 64.
4. To which the presence of the Devī has been communicated.
5. Diagram of worship. See *Śakti and Śākta.*
6. The particular Devatā of the Sādhaka.
7. Bhakti—*i.e.*, by Bhakti-mārga.

क्रीमाद्ये इत्यादि। क्रीमाद्ये कालिके देवि परिवारादिभिः सहेति प्रोच्य ततो द्विधा द्विवारमिहागच्छेति च प्रोच्य ततः पुनर्द्विधा इह तिष्ठेति प्रोच्य ततः पुनरिह शब्दात् सन्निधेहीति प्रोच्य तत इह सन्नीतिपदात् रुध्यस्वेतिपदमाभाष्य ततो मम पूजां गृहाणेति वदेत्। सकलपदयोजनयां क्रीमाद्ये कालिके देवि परिवारादिभिः सहेहागच्छेछागच्छेह तिष्ठेह तिष्ठेह सन्निधेहि इह सन्निरुध्यस्व मम पूजां गृहाणेति मन्त्रो जातः। इत्थमनेन प्रकारेणानेन मन्त्रेण देव्या आवाहनं कृत्वा तस्या एव प्राणान् प्रतिष्ठयेत् प्राणप्रतिष्ठां कुर्यादित्यर्थः।

Krīṁ, O Ādyā Devī Kālikā! come here[1] with all Thy following, come here, stay here, stay here; place Thyself here and be Thou detained here. Accept my worship.

Having thus invoked (the Devī) into the Yantra,[2] the Life[3] of the Devī should be infused therein by the following Pratiṣṭhā-Mantra

आँ ह्रीँ क्रोँ श्रीँ वह्निजायाप्रतिष्ठामत्र ईरितः।
अमुष्या देवतायाश्च प्राणा इह ततः परम्।
प्राणा इति ततः पञ्चबीजानि तदनन्तरम्।। ७१।।
अमुष्या जीव इह च स्थित इत्युच्चरेत् पुनः।
पञ्चबीजान्यमुष्याश्च सर्वेन्द्रियाणि कीर्त्तयेत्।। ७२।।
पुनस्तत्पञ्चबीजानि अमुष्यावचनात्ततः।
वाङ्मनोनयनघ्राणश्रोत्रत्वक्पदतो वदेत्।। ७३।।
प्राणा इहागत्य सुखं चिरंतिष्ठन्तु ठद्वयम्।। ७४।।

āṁ hrīṁ kroṁ śrīṁ vahnijāyāpratiṣṭhāmatra īritaḥ/
amuṣyā devatāyāśca prāṇā iha tataḥ param/
prāṇā iti tataḥ pañcabījāni tadanantaram//

1. As the Worshipper says the Mantra he makes the gestures (Mudrā) —(1) Avāhanī, (2) Sthāpanī, (3) Saṁnidhāpanī, (4) Sammukhī-karaṇī, and (5) Saṁnirodhinī.
2. Diagram *(vide ante)*.
3. This is the Prāṇa-pratiṣṭhā ceremony. According to the general belief of all Hindu worshippers of images, the latter are not made the object of worship until this ceremony is performed, whereby the life or presence of the Deva or Devī is invoked into it. That is, in the consciousness of the worshipper the presence of the Devatā in the image is recognised. The Prāṇa-pratiṣṭhā-Mantra follows in next verse. The five Mudrās should also be shown.

amuṣyā jīva iha ca sthita ityuccaret punaḥ/
pañcabījānyamuṣyāśca sarvendriyāṇi kīrttayet//
punastatpañcabījāni amuṣyāvacanāttataḥ/
vāṅmanonayanaghrāṇaśrotratvakpadato vadet//
prāṇā ihāgatya sukhaṁ cirantiṣṭhantu ṭhadvayam//

ननु केन मन्त्रेण देव्याः प्राणान् प्रतिष्ठयेदित्यपेक्षायां प्राणप्रतिष्ठामन्त्रमाह चतुर्भिः आमित्यादि। आँ ह्रीँ क्रोँ श्रीमित्युक्त्वा वह्निजाया स्वाहा वक्तव्या। ततोऽमुष्या देवताया: प्राणा इहेत्युक्त्वा ततः परं प्राणा इत्युच्चरेत्। ततः आँ ह्रीमित्यादिनि पञ्चवीजानि वदेत्। तदनन्तरममुष्या जीव इह स्थित इत्युच्चरेत्। पुनः तान्येव पञ्चवीजानि वदेत्। ततोऽमुष्याः सर्वेन्द्रियाणीति वदेत्। पुनस्तानि पञ्चवीजानि वदेत्। ततोऽमुष्यावचनात् कथनात् परं वाङ्मनोनयनघ्राणश्रोत्रत्वक्पदं वदेत्। तस्माच्च पदात् प्राणा इहागत्य सुखं चिरन्तिष्ठन्त्विति वदेत्। ततः ठद्वयं स्वाहेति वदेत्। सकलपदयोजनया आँ ह्रीँ क्रोँ श्रीँ स्वाहा आद्या कालीदेवताया: प्राणा इह प्राणाः आँ ह्रीँ क्रोँ श्रीँ स्वाहा आद्याकालीदेवताया जीव इह स्थितिः आँ ह्रीँ क्रोँ श्रीँ स्वाहा आद्याकलीदेवताया: सर्वेन्द्रियाणि आँ ह्रीँ क्रोँ श्रीँ स्वाहा आद्याकालीदेवताया वाङ्मनोनयनघ्राण-श्रोत्रत्वक्प्राणाः इहागत्य सुखं चिरन्तिष्ठन्तु स्वाहेति प्राणप्रतिष्ठामन्त्र ईरितः।

Mantra

Āṁ, Hrīṁ, Kroṁ, Śrīṁ, Svāhā : May the Life[1] of this Devatā[2] be here : Āṁ, Hrīṁ, Kroṁ, Śrīm, Svāhā : May Her Jīva[3] be here : Āṁ, Hrīṁ, Kroṁ, Śrīm, Svāhā : May all Her senses be here: Āṁ, Hrīṁ, Kroṁ, Śrīm, Svāhā : The Speech, Mind, Sight, Smell, Hearing, Touch, and the Vital Airs[4] of the Ādyā-Kāli Devatā,[5] may they come here and stay happily here for ever : Svāhā.

इति त्रिधा यन्त्रमध्ये लेलिहानाख्यमुद्रया।
संस्थाप्य विधिवत् प्राणान् कृताञ्जलिपुटो वदेत्।। ७५।।

iti tridhā yantramadhye lelihānākhyamudrayā/
saṁsthāpya vidhivat prāṇān kṛtāñjaliputo vadet//

---

1. Prāṇāḥ-Life. Life presupposes the presence in the body of the five vital airs, namely, Prāṇa, Apāna, Samāna, Udāna, and Vyāna.
2. *i.e.*, Ādyā-Kālī.
3. Life individualised.
4. (see above note 1).
5. The Ever-glorious Primordial Devī Kālī—*i.e.*, Ādyā Kālī Devatā.

इतीति। इत्यनेनैव प्राणप्रतिष्ठामन्त्रेण त्रिधा वारत्रयं गुरूपदिष्टया लेलिहानाख्यमुद्रया यन्त्रमध्ये देव्याः प्राणान् विधिवत् संस्थाप्य कृताञ्जलिपुटः सन् वदेत्। लेलिहानाख्यमुद्रा यथा दक्षिणामूर्त्तिसंहितायाम्।

तर्जनीमध्यमानामाः समं कुर्यादधोमुखम्।
अनामायां क्षिपेद्बुद्धामृजुं कृत्वा कनिष्ठिकाम्।
लेलिहानाख्यमुद्रेयं जीवन्यासे प्रकीर्त्तितेति।

Having recited the above three times, and having in due form placed the Life[1] (of the Devī) in the Yantra[2] with the Lelihāna-Mudrā, with folded palms, he (the worshipper) should say.

आद्ये कालि स्वागतंते सुस्वागतमिदंतव।
आसनञ्चेदमत्र त्वयाऽऽस्यतां परमेश्वरि।। ७६।।

ādye kāli svāgataṁte susvāgatamidaṁtava/
āsanañcedamatra tvayā''syatāṁ parameśvari//

किं वदेदित्यपेक्षायामाह आद्ये इत्यादि। सुष्ठु आगतं स्वागतम्।

Mantra

O Ādyā-Kālī ! hast Thou had a good journey? Is this coming pleasing to Thee? O Parameśvarī ! mayest Thou be seated on this seat[4] ?

---

1. Prāṇa-pratiṣṭhā.
2. Diagram.
3. Literally, showing the Lelihāna-Mudrā. Lelihāna is derived from the root Liha=to lap, to lick. It is also a name of Śivā. Lelihāna Mudrā is of two kinds. In the *Dakṣiṇā-mūrti-Saṁhitā* it is described to be as follows : Hold the index middle, and ring fingers straight downward; hold the little finger out straight. The thumb should touch the root of the ring finger. Bhāratī refers to the *Dakṣiṇā-mūrti-saṁhitā*. The other kind is as follows : The two closed fists are placed near the two ears, the mouth is opened wide, and the tongue protruded and moved about. In the notes in the Edition of Bhakta it is said by Tarkālaṅkāra that it is the practice among worshippers to show Lelihāna-Mudrā, Khaḍga (sword) mudrā, Muṇḍa (head) Mudrā, Vara-Mudrā, and Abhaya-Mudrā after Prāṇa-pratiṣṭhā.
4. A usual form of welcome.

ततो विशेषार्घ्य जलैस्त्रिधा मूलं समुच्चरन्।
प्रोक्षयेद्देवशुद्ध्यर्थं षडङ्गैः सकलीकृतिः।
ततः सम्पूजयेद्देवीं षोडशैरुपचारकैः।। ७७।।

tato viśeṣārghya jalaistridhā mūlaṁ samuṁccaran/
prokṣayeddevaśuddhyarthaṁ ṣaḍaṅgaiḥ sakalīkṛtiḥ/
tataḥ sampūjayeddevīṁ ṣoḍaśairupacārakaiḥ//

तत इत्यादि। ततो मूलं मन्त्रं त्रिधा समुच्चरन् देवशुद्ध्यर्थं विशेषार्घ्यजलैर्देवीं प्रोक्षयेत् अभिषिञ्चेत्। षडङ्गैः हाँ हृदयाय नमः हीँ शिरसे स्वाहा हूँ शिखायै वषट् हैँ कवचाय हुम् हौँ नेत्रत्रयाय वौषट् हँः अस्त्राय फट् इति मन्त्रैर्देव्याः सकलीकृतिः समस्तीकरणं विधेयम्। सकलीकरणं यथा।

देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिरिति।

Then, for purification of the Devatā whilst repeating the Mūla-Mantra, the Sādhaka should sprinkle thrice the water of the special oblation[1] over the Devī, and next make Nyāsa[2].with the six limbs of the Devī. This ceremony is called Sakalī-kṛti. Then Devī should be worshipped with all the sixteen offerings.

पाद्यार्घ्याचमनीयञ्च स्नानं वसनभूषणे।
गन्धपुष्पे धूपदीपौ नैवेद्याचमने तथा।। ७८।।

pādyārghyācamanīyañca snānaṁ vasanabhūṣaṇe/
gandhapuṣpe dhūpadīpau naivedyācamane tathā//

तानेव षोडशोपचारान् दर्शयति पाद्येत्यादिना।

अमृतञ्चैव ताम्बूलं तर्पणञ्च नतिक्रिया।
प्रयोजयेदर्च्चनायामुपचारांश्च षोडश।। ७९।।

amṛtañcaiva tāmbūlaṁ tarpaṇañca natikriyā/
prayojayedarccanāyāmupacārāṁśca ṣoḍaśa//

अमृतं मद्यम्। प्रयोजयेत् निवेदयेत्।

These are : water for washing the feet, water for the offering, water for rinsing the mouth and for Her bath, garments, jewels, perfume, flowers, incense-sticks, lights, food, water for washing

1. Viśeṣārghya.
2. See *Śakti and Śākta.* This is the Śakalīkṛti or Sakalī-karaṇa rite : "Devatāṅge ṣaḍaṅgānāṁ nyāsaḥ syāt sakalīkṛtiḥ."

the mouth,[1] nectar,[2] *pān*,[3] water of oblation,[4] and obeisance. In worship these sixteen offerings are needed.[5]

आद्याबीजमिदं पाद्यं देवतायै नमः पदम्।
पाद्यञ्चरणयोर्द्दद्यात् शिरस्यर्घ्यं निवेदयेत्।। ८०।।

ādyābījamidaṁ pādyaṁ devatāyai namaḥ padam/
pādyañcaraṇayorddadyāt śirasyarghyaṁ nivedayet//

अथ क्रमतः पाद्यादिषोडशोपचारसमर्पणविधिमाह आद्याबीजमित्यादिभिः। आद्याबीजमुक्त्वा इदं पाद्यं देवतायै नम इति पदं वदेत्। योजनया ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेदं पाद्यमाद्याकालीदेवतायै नम इति मन्त्रो जातः। अनेन मन्त्रेण देव्याश्चरणयोः पाद्यं दद्यात्। स्वाहापदेन स्वाहापदघटितेन ह्रीँ श्रीँ क्रोँ परमेश्वरि स्वाहेदमर्घ्यमाद्यायै काल्यै स्वाहेति मन्त्रेण देव्याः शिरस्यर्घ्यं निवेदयेत्।

Uttering the Ādyā-Bīja,[6] and then saying "This water is for washing the feet of the Ādyā: To the Devatā Namaḥ," offer the water at the feet of the Devī. In making the offering of Arghya the same should be placed at the head of the Devī and the Mantra should end with Svāhā.

स्वाहापदेन मतिमान् स्वधेत्याचमनीयकम्।
मुखे नियोजयेन्मन्त्री मधुपर्कं मुखाम्बुजे।
वंस्वधेति समुच्चार्य्य पुनराचमनीयकम्।। ८१।।

svāhāpadena matimān svadhetyācamanīyakam/
mukhe niyojayenmantrī madhuparkaṁ mukhāmbuje/
vaṁsvadheti samuccāryya punarācamanīyakam//

---

1. There are two offerings of this water Ācamanīya, as water is used for rinsing the mouth both before and after the repast of the guest, to whom also water is offered for washing the feet.
2. Wine.
3. Tāmbūla—*i.e.*, Areca nut, lime, catechu, cardamom, cinnamon etc., wrapped up in betel-leaf and fastened with a clove.
4. Tarpaṇa—literally, satisfaction, or satisfying act.
5. If the rite is performed in the day time Madhu parka is substituted for wine. For as the *Tantrāntara* says the night rites should be done according to Kulācāra and during the day according to Vedācāra : Rātrau kulakriyāṁ kuryāt divā kuryācca vaidikīm.
6. *i.e.*, Hrīṁ Śrīṁ Krīṁ Parameśvari Svāhā.

स्वाहेत्यादि। स्वाहापदेनेति पूर्वान्वयि। मतिमान्मन्त्री स्वधेतिपदघटितेन ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेदमाचमनीयमाद्यायै काल्यै स्वधेति मन्त्रेण देव्या मुखे आचमनीयकं नियोजयेद्द्यात्। ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा एष मधुपर्क आद्यायै काल्यै स्वधेति मन्त्रेण देव्या मुखाम्बुजे मधुपर्कं नियोजयेत्। ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेदमाचमनीय-माद्यायै काल्यै वंस्वधेति समुच्चार्य पुनर्देवीमुखे आचमनीयकं नियोजयेत्।

Then the Sādhaka versed in Mantra should offer the water for rinsing the mouth[1] to the mouth of the Devī and the Mantra should end with the word Svadhā and then the worshipper should offer to the lotus-mouth of the Devī, Madhu-parka[2] with the Mantra ending with the word Svadhā. He should then offer water to rinse the mouth a second time with the Mantra ending with "Vaṁ Svadhā".

स्नानीयं सर्वगात्रेषु वसनं भूषणानि च।
निवेदयामि मनुना दद्यादेतानि देशिकः।।८२।।

snānīyaṁ sarvagātreṣu vasanaṁ bhūṣaṇāni ca/
nivedayāmi manunā dadyādetāni deśikaḥ//

स्नानीयमित्यादि। ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेदं स्नानीयमिदं वसनमेतानि भूषणानि चाद्यायै कालिकायै निवेदयामीति मनुना एतानि स्नानीयादीनि देव्याः सर्वगात्रेषु देशिकः साधको दद्यात्।

Then the Sādhaka should offer water for bathing, apparel and jewels, saying the

Mantra

Hrīṁ Śrīm Krīṁ Parameśvarī Svāhā : I offer this water for bathing, this apparel, these jewels, to all parts of the body of the Primordial Kālkā Svāhā.

मध्यानामिकाभ्याञ्च गन्धन्दद्याद्धृदम्बुजे।
नमोऽन्तेन च मन्त्रेण वौषडन्तेन पुष्पकम्।।८३।।

madhyānāmikābhyāñca gandhandadyāddhṛdambuje/
namo'ntena ca mantreṇa vauṣaḍantena puṣpakam//

---

1. Ācamanīya.
2. A mixture of curd, ghee, and honey.

मध्यमेत्यादि। नमोऽन्तेन ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा एष गन्ध आद्यायै काल्यै नम इति मन्त्रेण देव्या हृदम्बुजे मध्यमानामिकाभ्यामङ्गुलिभ्यां गन्धं दद्यात्। वौषडन्तेन ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहेदं पुष्पमाद्यायै काल्यै वौषडिति मन्त्रेण देव्यै पुष्पकं दद्यात्।

Then the worshipper should, with the same Mantra, but ending with Namaḥ, offer scent with his middle and third finger to, the heart-lotus (of the Devī), and with the same Mantra, but ending with Vauṣaṭ, he should similarly offer to Her flowers[1].

धूपदीपौ च पुरतः संस्थाप्य प्रोक्षणादिभिः।
निवेदयामि मन्त्रेण उत्सृज्य तदनन्तरम्।। ८४।।
जयध्वनिमन्त्रमातः स्वाहेति मन्त्रपूर्वकम्।
सम्पूज्य घण्टां वामेन वादयन् दक्षिणेन तु।। ८५।।
धूपं गृहीत्वा मतिमान् नासिकाधो नियोजयेत्।
दीपन्तु दृष्टिपर्य्यन्तं दशधा भ्रामयेत् पुरः।। ८६।।

dhūpadīpau ca purataḥ saṁsthāpya prokṣaṇādibhiḥ/
nivedayāmi mantreṇa utsṛjya tadanantaram//
jayadhvanimantramātaḥ svāheti mantrapūrvakam/
sampūjya ghaṇṭāṁ vāmena vādayan dakṣiṇena tu//
dhūpaṁ gṛhītvā matimān nāsikādho niyojayet/
dīpantu dṛṣṭiparyyantaṁ daśadhā bhrāmayet puraḥ//

धूपेत्यादि। पुरतो देव्यग्रे धूपदीपौ संस्थाप्य प्रोक्षणादिभिः संशोध्य च ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा एतौ धूपदीपावाद्यायै काल्यै निवेदयामीति मन्त्रेणोत्सृज्य देव्यै समर्प्य च तदनन्तरम् एते गन्धपुष्पे जयध्वनिमन्त्रमातः स्वाहेति मन्त्रपूर्वकं घण्टां सम्पूज्य वामेन हस्तेन तां घण्टां वादयन् सन् दक्षिणेन हस्तेन धूपं गृहीत्वा मतिमान् साधको देव्या नासिकाया अधो नियोजयेन्निवेदयेत्। दीपन्तु पुरो देव्यग्रे पादमारभ्य दृष्टिपर्यन्तं दशधा दशवारं भ्रामयेत्।

Having placed the burning incense and lighted lamp in front of Devī, and sprinkling them with water, they should be given away to Her with the

---

1. Bael-leaves are also offered.

Mantra

Hrīṁ Śrīṁ Krīṁ Parameśvarī Svāhā : This incense-stick and this light I humbly offer to Ādyā-Kālikā.

After worship of the Bell with scent and flower and with the

Mantra

The scent and flower are offered to the Mantra which is sound and rings the triumph of the Mother, Svāhā.

He should ring the bell with his left hand, and, whilst so ringing it, he should take up the incense-stick with his right hand, and wave it up to the nostrils of the Devī.[1] Then, placing the incense-stick on Her left, he should raise and wave the light ten times before the Devī[2] from Her feet up to Her eyes.

ततः पात्रञ्च शुद्धिञ्च समादाय करद्वये।
मूलं समुच्चरन् मन्त्री यन्त्रमध्ये निवेदयेत्।। ८७।।

tataḥ pātrañca śuddhiñca samādāya karadvaye/
mūlaṁ samuccaran mantrī yantramadhye nivedayet//

तत इत्यादि। ततोऽनन्तरं पानपात्रं शुद्धिं मांसादिकञ्च करद्वये समादाय गृहीत्वा मूलं मन्त्रं तदन्ते इदं मद्यमिमां शुद्धिञ्चाद्यायै काल्यै निवेदयामिति च समुच्चरन् मन्त्री यन्त्रमध्ये देव्यै निवेदयेत्।

---

1. Ārati is done by waving the light and incense-stick in an elliptical circle in front of the image, the top of the circle being under the nostrils or the eyes (see next verse).
2. And then, according to the ritual, he should palce it on the right. Tarkālaṅkāra says : After recitation of the Bīja say : This Pādya (water for the feet) to the Ādyā-Kālīka-Devatā Namaḥ. Then place it at Her feet. The Bīja should be repeated at every offering. Thus "This Arghya to—Namaḥ and then the Arghya should be offered to Her head : Then Ācamanīya should be offered to Her mouth with the Mantra This Ācamanīya to—Svāhā. Then offer Madhu-parka to the mouth to—Svadhā. Similarly with the second Ācamanīya. In offering bathing water sprinkle it all over Her. In offering wearing apparel (Vasanā) cover Her therewith. Dedicate ornaments to Her and place them on different parts of the body. Then offer scent, flower and sandal paste. Bael leaves should be offered and then incense and light.

Then, taking the Cup and the Śuddhi[1] in his two hands, the Sādhaka should, whilst uttering the Mūla-Mantra, offer them to the centre[2] of the Yantra.

परमं वारुणीकल्पं कोटिकल्पान्तकारिणि।
गृहाण शुद्धिसहितं देहि मे मोक्षमव्ययम्।। ८८।।

paramaṁ vāruṇīkalpaṁ koṭikalpāntakāriṇi/
gṛhāṇa śuddhisahitaṁ dehi me mokṣamavyayam//

ततः प्रार्थनावाक्यमाह परममित्यादि। वारुणीकल्पम् मद्यम्।

Mantra

O Thou who hast brought to an end a crore[3] of Kalpas ![4] take this excellent wine,[5] as also the Śuddhi, and grant to me endless Liberation.

ततः सामान्यविधिना पुरतो मण्डलं लिखेत्।
तस्योपरि न्यसेत् पात्रं नैवेद्यपरिपूरितम्।। ८९।।

tataḥ sāmānyavidhinā purato maṇḍalaṁ likhet/
tasyopari nyaset pātraṁ naivedyaparipūritam//

तत इति। ततोऽनन्तरं सामान्यविधिना साधारणविधानेन पुरतोऽग्रे त्रिकोणञ्चतुष्कोणं वा मण्डलं लिखेत्। तस्य मण्डलस्योपरि नैवेद्यपरिपूरितं पात्रं न्यसेत् स्थापयेत्।

Then, drawing a figure (in front of the Yantra), according to the rules of ordinary worship, place the plate with food thereon.

---

1. *Vide* p. 198, note 2.
2. *i.e.*, to the Devī in the Yantra (diagram).
3. Ten millions.
4. Duration of the life of Brahmā, or 4,320,000 human years at the end of which the universe comes to an end. By Koṭi-kalpānta-kāriṇi is meant that the Devī is the cause of endless creations, maintenance and withdrawal thereof.
5. Vāruṇī-kalpa is "like Vāruṇī". It is excellent because it is like Vāruṇī. Vāruṇī is like the Śakti of Varuṇa, Deva of Ocean by the churning of which nectar was produced. Vāruṇi=Varuṇastrī *(Vācas-patya)* Vāruṇīpriya and Vāruṇī-kānta are names of Viṣṇu. Vāruṇī=Lakṣmī who also came out of the water at the churning of the ocean. Vāruṇī is liquor made from rice.

प्रोक्षणञ्चावगुण्ठञ्च रक्षणञ्चामृतीकृतम्।
मूलेन सप्तधाऽऽमन्त्र्य अर्घ्याद्भिर्विनिवेदयेत्।। ९०।।

prokṣaṇañcāvaguṇṭhañca rakṣaṇañcāmṛtīkṛtam/
mūlena saptadhā''mantrya arghyādbhirvinivedayet//

प्रोक्षणमिति। तत्पात्रस्थस्य नैवेद्यस्य फट्या प्रोक्षणं हूँ बीजेनावगुण्ठनं वेष्टनं फटैव रक्षणं धेनुमुद्रया वं बीजेनामृतीकृतममृतीकरणञ्च विदध्यात्। ततो मूलमन्त्रेण सप्तधा तन्नैवेद्यमामन्त्र्यार्घ्याद्भिरर्घ्यजलैर्देव्यै निवेदयेत्।

Sprinkle the food (with the Mantra Phaṭ) and veil it with the Avaguṇṭhana-Mudrā[1] (and the Mantra Hūṁ[2]), and then again protect it (by the Mantra Phaṭ[2]). (Saying Vaṁ[2] and exhibiting the Dhenu-Mudrā[3] over it), it should be made into nectar of immortality.[4] Then, after recitation of the Mūla-Mantra seven times, it should be offered to the Devī with the water taken from the vessel of offering[5].

मूलमेतत्तु सिद्धान्नं सर्वोपकरणान्वितम्।
निवेदयामीष्टदेव्यै जुषाणेदं हविः शिवे।। ९१।।

mūlametattu siddhānnaṁ sarvopakaraṇānvitam/
nivedayāmīṣṭadevyai juṣāṇedaṁ haviḥ śive//

नैवेद्यनिवेदनमन्त्रमाहैकेन मूलमिति। पूर्वं मूलं वदेत्। ततः एतत् सर्वोपकरणान्वितं सिद्धान्नमिष्टदेवतायै निवेदयामीति वदेत्। ततः शिवे हविरिदं जुषाणेति वदेत्। योजनया ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा एतत् सर्वोपकरणान्वितं सिद्धान्नमिष्टदेवतायै निवेदयामि शिवे हविरिदं जुषाणेति मन्त्रो नैवेद्यसमर्पणायासीत्। सिद्धान्नमित्यामान्नस्याप्युपलक्षणम्।

The worshipper, after reciting the Mūla-Mantra,[6] should say : "This cooked food, with all other necessaries, I offer to the Ādyā-Kālī, my Iṣṭa-devī. He should then say : "O Śivā! partake of this offering ".

---

1. Gesture of veiling.
2. The Mantras are not in the text, but are in fact those used with sprinkling, veiling, and protecting.
3. See notes under vv. 74 and 85, ch. v.
4. Amṛta.
5. Arghya. That is Arghya water.
6. See p. 304 note 6.

ततः प्राणादिमुद्राभिः पञ्चभिः प्राशयेद्धविः।। ९२।

tataḥ prāṇādimudrābhiḥ pañcabhiḥ prāśayeddhaviḥ//

तत इत्यादि। ततोऽनन्तरम्प्राणाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहेति मन्त्रैर्गुरूपदिष्टाभिः पञ्चभिः प्राणादिमुद्राभिर्देवीं हविः प्राशयेत् भोजयेत्।

Then he should make the Devī eat the offering by means of the five Mudrās called Prāṇa, Apāna, Samāna, Vyāna, and Udāna[1].

वामे नैवेद्यमुद्राञ्च विकचोत्पलसन्निभाम्।
दर्शयेन्मूलमन्त्रेण पानार्थं तीर्थपूरितम्।। ९३।।
कलशं विनिवेद्याथ पुनराचमनीयकम्।
ततः श्रीपात्रसंस्थेनामृतेन तर्पयेत् त्रिधा।। ९४।।

vāme naivedyamudrāñca vikacotpalasannibhām/
darśayenmūlamantreṇa pānārtham tīrthapūritam//
kalaśam vinivedyātha punarācamanīyakam/
tataḥ śrīpātrasaṁsthenāmṛtena tarpayet tridhā//

वाम इति। वामे हस्ते विकचोत्पलसन्निभां प्रफुल्लपङ्कजतुल्यां नैवेद्यमुद्राञ्च देवीं दर्शयेत्। ततो मूलमन्त्रेण तीर्थपूरितं मद्येन पूरितं कलशं पानार्थं देव्यै निवेद्य पुनराचमनीयकं दद्यात्। ततोऽनन्तरं श्रीपात्रसंस्थेनामृतेन सुरया त्रिधा त्रिवारं पूर्ववद्देवीं तर्पयेत्।

Next, form with the left hand the Naivedya[2]-Mudrā, which is like a full-blown lotus. Then, whilst reciting the Mūla-Mantra, the jar 'filled with wine should be offered to the Devī for Her to

---

1. It is said that there are five different kinds of Vāyus, working various functions in the human body—manifestation of Prāṇa in its generic sense, constituting a part of the life sac of Prāṇamaya-kośa. In the Prāṇa-Mudrā the tip of thumb, middle, and third finger are joined together ; in Apāna Mudrā the thumb, index, and middle finger are similarly joined ; in Samāna-Mudrā the little finger, third, and thumb are so joined; in the Udāna-Mudrā the thumb, index middle, and third; and in the Vyāna-Mudrā all the fingers are so joined. After the Mudrās is said Apānāya, etc., Svāhā.
2. With left hand the palm is shown, and all fingers kept straight.

drink. After that again offer of water for rinsing the mouth, and following that a threefold oblation should be made to the Devī with wine from the cup of the Śrī-pātra[3].

उत्तमाङ्गं हृदाधारपादसर्वाङ्गकेषु च।
पञ्च पुष्पाञ्जलीन्दत्त्वा मूलमन्त्रेण देशिकः।। ९५।।

uttamāṅgaṁ hṛdādhārapādasarvāṅgakeṣu ca/
pañca puṣpāñjalīndattvā mūlamantreṇa deśikaḥ//

Then, reciting the Mūla-Mantra, let the Sādhaka offer five handfuls of flowers to the head, heart, Mūlādhāra Lotus,[4] the feet, and all parts of the body of the Devī,

कृताञ्जलिपुटो भूत्वा प्रार्थयेदिष्टदेवताम्।
तवावरणदेवांश्च पूजयामि नमो वदेत्।। ९६।।

kṛtāñjalipuṭo bhūtvā prārthayediṣṭadevatām/
tavāvaraṇadevāṁśca pūjayāmi namo vadet//

उत्तमाङ्गेत्यादि। ततो देशिकः साधको देव्याः उत्तमाङ्गे मस्तके हृदये आधारदेशे पादयोः सर्वाङ्गेषु च मूलमन्त्रेण पञ्च पुष्पाञ्जलीन् दत्वा कृताञ्जलिपुटो भूत्वेष्टदेवतां प्रार्थयेत्। यत् प्रार्थयेत्तदाहार्द्धेन तवेति। तवावरणदेवानित्युक्त्वा पूजयामि नम इति पदं वदेत्। योजनया इष्टदेवते तवावरणदेवान् पूजयामि नम इति प्रार्थनावाक्यमासीत्।

And thereafter with folded palms he should pray to his Iṣṭa-devatā thus :

Mantra

O Iṣṭa-devatā I am now worshipping the Devatās who surround Thee,[1] Namaḥ.

अग्निर्निर्ऋतिवाय्वीशपुरतः पृष्ठतः क्रमात्।
षडङ्गानि च सम्पूज्य गुरुपङ्क्तीः समर्चयेत्।। ९७।।

agnirnirṛtivāyvīśapurataḥ pṛṣṭhataḥ kramāt/
ṣaḍaṅgāni ca sampūjya gurupaṅktīḥ samarcayet//

---

1. See p. 210, note 8.
2. See p. 152, note 3.
3. Āvaraṇa-devatā—*i.e.*, the minor Devatās accompanying the Devī. The worshippers asks the leave of the Devī to worship them.

आवरणदेवानां पूजायाः प्रकारं दर्शयति अग्नीत्यादिभिः। अग्निनिर्ऋतिवाय्वीशपुरतः पृष्ठतः यन्त्रस्याग्निकोणे नैर्ऋतकोणे वायुकोणे ईशानकोणे पुरतोऽग्रे पृष्ठतः पश्चाद्भागे च क्रमतः हाँ नमः हीँ नमः हूँ नमः हैँ नमः हौँ नमः हँः नम इति मन्त्रैः षडङ्गानि षडङ्गदैवतानि संपूज्य गुरुपङ्क्तीर्गुरुश्रेणीः समर्च्चयेत्।

The six parts of the body[1] of the Devī should then be worshipped at the four corners of the Yantra,[2] and in front and behind it in their order; and then the lines of Gurus should be worshipped[3].

गुरुञ्च परमादिञ्च परापरगुरुन्तथा।
परमेष्ठिगुरुञ्चैव यजेत् कुलगुरूनिमान्।। ९८।।

---

1. The six Aṅgas are the heart, head tuft (Śikhā)—when Hindu women worship they gather together a lock of their hair, and knot it as their Śikhā—Kavaca three eyes (see note under ch. v. 125), and two sides of the hand (palm and back). The Mantras for the worship of the six limbs of the Devī are : (1) Hrāṁ Hṛdayāya Namaḥ, (2) Hrīṁ Śirase Svāhā, (3) Hrūṁ Śikhāyai Vaṣaṭ (4) Hraiṁ Kavacāya-Hūṁ, (5) Hrauṁ Netratrayāya Vauṣat, (6) Hraḥ Karatala-pṛṣṭābhyām Phaṭ.
2. Diagram—*i.e.*, at Agni, S.E.; Nairṛta, S.W.; Vāyu N.W.; and Iśāna, N.E. Agni is Fire, Nairṛta is a name of Yama, Vāyu is Wind, and Iśāna Śiva as Ruler.
3. There are three lines of Guru—Divyaugha (Heavenly line). Siddhaugha (Siddha line) Mānavaugha (Human line or type). The Gurus of the first class are four—Mahādevānanda-nātha, Mahākālānanda-nātha, Bhairavānanda-nātha, Vighneśvarānanda-nātha. There are five of the second, class, and ten of the third class. Of the second class are—Brahmānanda-nātha, Pūrṇadevānanda-nātha, Calacchittānanda-nātha, Calācalānanda-nātha, Kumārānanda-nāth. Of the third class are—Vimalānanda-nātha, Bhīmasenānanda-nātha, Sudhākarānanda-nātha, Nīlānanda-nātha, Gorakṣānanda-nātha, Bhoja-devānanda-nātha, vighneśvarānanda-nātha, Hutāśanānanda-nātha, Samayānanda-nātha and Nakulānanda-nātha. See also *Tantrarāja*, Ch. I, Inroduction, Vol. 8, A. Avalon's *Tāntrik Texts*, *Jñānārṇava* Tr., XVI, 50, *et seq.*, gives both additions and variations of these. These are the names of the three classes of Gurus for Sādhakas of Ādyā-kālī. For Sādhakas of other Devatās the name differs. See *Tantrarāja*, Ch. I, where names o the Gurus of the Sādhakas of Tripurā are given. These three lines are Āvaraṇa of the Iṣṭadevatā. When a Sādhaka does Saṁnyāsa then the Guru selects for him out of the names of his Iṣṭadevatā group (the Kaulāvadhūta need not do Saṁnyāsa) such name as he is qualified to receive. Some Gurus select a name from the eight Bhairavas and add nanda-nātha to it.

guruñca paramādiñca parāparaguruntathā/
parameṣṭhiguruñcaiva yajet kulagurūnimān//

गुरुपङ्क्तीरेव दर्शयन्नाह गुरुञ्चेत्यादि। ओँ गुरवे नमः ओँ परमगुरवे नमः ओँ परापरगुरवे नमः ओँ परमेष्टिगुरुवे नमः इति मन्त्रैर्गन्धपुष्पादिभिर्यन्त्रमध्ये गुरुं परमादिं परम आदिर्यस्य तथाभूतं गुरुं तथैव परापरगुरुं परमेष्टिगुरुञ्चापीमान् कुलगुरून् क्रमतो यजेत्।

Then, with scent and flowers, worship the four Kula-gurus—namely, Guru, Parama-guru, Parāpara-guru, Parameṣṭhi-guru[1].

गुरुपात्रामृतेनैव त्रिस्त्रिस्तर्पणमाचरेत्।
ततोऽष्टदलमध्ये तु पूजयेदष्टनायिकाः।। ९९।।

gurupātrāmṛtenaiva tristristarpaṇamācaret/
tato'ṣṭadalamadhye tu pūjayedaṣṭanāyikāḥ//

गुर्वित्यादि। गुरुपात्रामृतेनैव त्रिस्त्रिस्त्रिवारं त्रिवारं क्रमतो गुरूणां तर्पणमाचरेत् कुर्यात्। ततोऽनन्तरमष्टदलमध्येऽष्टपत्राणामभ्यन्तरे ओँ मङ्गलायै नम इत्येवं प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरष्टनायिकाः पूजयेत्।

मङ्गला विजया भद्रा जयन्ती चाऽपराजिता।
नन्दिनी नारसिंही च कौमारीत्यष्टमातरः।। १००।।

maṅgalā vijayā bhadrā jayantī cā'parājitā/
nandinī nārasiṁhī ca kaumārītyaṣṭamātaraḥ//

पूज्या अष्टनायिका आह मङ्गलेत्याद्येकेन।

Then, with the wine in the Guru-pātra make three Tarpaṇas[2] to each, and on the lotus of eight petals worship the eight Mothers, who are the eight Nāyikās—namely, Maṅgalā, Vijayā, Bhadrā, Jayantī, Aparājitā, Nandinī, Nāra-siṁhī, and Kaumārī[3].

---

1. *Vide.*, p. 290, note 5.
2. Oblation.
3. *Cf.* Chapter v, verse 134.
Tarkālaṅkāra gives the Mantras for the Tarpaṇa of the four Kulagurus. He syas that in almost all Tantras the rule is to worship and do Tarpaṇa of the fifteen Yoginīs and eight Śaktis. The former are Kālī, Kapālinī, Kullā, Kurukullā, Virodhinī, Vipracittā, Ugrā, Ugraprabhā,

दलाग्रेषु यजेदष्टभैरवान् साधकोत्तमः।। १०१।।

dalāgreṣu yajedaṣṭabhairavān sādhakottamaḥ//

दलेत्यादि। दलाग्रेषु पत्राग्रेषु ओँ असिताङ्गाय भैरवाय नम इत्येवं प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरष्टभैरवान् साधकोत्तमो यजेत्।

असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तो भयङ्करः।
कपाली भाषणश्चैव संहारोऽष्टौ च भैरवाः।। १०२।।

asitāṅgo ruruścaṇḍaḥ krodhonmatto bhayaṅkaraḥ/
kapālī bhāṣaṇaścaiva saṁhāro'ṣṭau ca bhairavāḥ//

पूज्यानष्टभैरवानाह असिताङ्ग इत्याद्येकेन।

And on the tips of the petals worship the eight Bhairavas—Asitāṅga, Ruru, Caṇḍa, Krodhonmatta, Bhayaṅkara, Kapālī, Bhiṣaṇa, and Saṁhāra[1].

इन्द्रादिदशदिक्पालान् भूपुरान्तः प्रपूजयेत्।
तेषामस्त्राणि तद्बाह्ये पूजयेत् तर्पयेत्ततः।। १०३।।

indrādidaśadikpālān bhūpurāntaḥ prapūjayet/
teṣāmastrāṇi tadbāhye pūjayet tarpayettataḥ//

इन्द्रेत्यादि। ततः प्रणवादिनमोऽन्तेन नाममन्त्रेण गन्धपुष्पादिभिरिन्द्रादिदशदिक्पालान् भूपुराभ्यन्तरे प्रपूजयेत्। तेषामिन्द्रादीनामस्त्राणि वज्रादीनि प्रणवादिनमोऽन्तनाममन्त्रेण तद्बाह्ये भूपुराद्बहिः पूजयेत्। ततः परम् ओँ इन्द्रं तर्पयामि नमः इत्येवं प्रणवादिना तर्पयामि नमः इत्यन्तेन नाममन्त्रेण इन्द्रादिदशदिक्पालांस्तर्पयेत्।

Indra and the other Dik-pālas[2] should be worshipped in

Dīptā, Nīlā, Ghanā, Valākā, Mātrā, Mudrā, Mitā. The latter are Brāhmī, Nārāyaṇī, Māheśvarī, Cāmuṇḍā, Kaumārī, Aparājitā, Vārāhī and Nārasiṁhī. The Mantra for worship is Oṁ Kālīdevyambā Śrīpādukāṁ pujayāmi Namaḥ Svāhā and so with the rest, when saying the Mantra wine is taken from the Yoginīpātra and cup is held in the left hand with Tattva-Mudrā. The Śuddhi is similarly held in the right hand. The two hands are united and Tarpaṇa is done on an inverted triangle drawn on the Sādhaka's heart. The Tarpaṇa of the other Yoginīs is done in the same way.

1. *Cf.*, Chapter v, verse 135.
2. Protectors of the ten sides—that is, North, East, South, West, Above and Below, South-East, South-West, North-East and North-West. The

the Bhū-pura,[1] and their weapons[2] outside the Bhū-pura and then Tarpaṇa should be made to them.

सर्वोपचारैः सम्पूज्य बलिं दद्यात् समाहितः।। १०४।।

sarvopacāraiḥ sampūjya balim dadyāt samāhitaḥ//

सर्वेत्यादि। पाद्यादिभिःसर्वोपचारैर्देवीं संपूज्य समाहितः सावधानो भूत्वा देव्यै बलिं दद्यात्।

After worshipping the Devī with all the offerings,[3] the Sādhaka should make sacrifice of an animal to Her.

मृगश्छागश्च मेषश्च लुलापः शूकरस्तथा।
शल्लकी शशको गोधा कूर्मः खड्गी दश स्मृताः।। १०५।।

mṛgaśchāgaśca meṣaśca lulāpaḥ śūkarastathā/
śallakī śaśako godhā kūrmaḥ khaḍgī daśa smṛtāḥ//

ननु बलिदानविधौ कः कः पशुः प्रशस्तः स्यात्तत्राह मृग इत्यादि। लुलापो महिषः। मृगादयो दश बलिदानविधौ प्रशस्ताः स्मृताः।

The ten approved beasts which may be sacrificed are—deer, goat, sheep, buffalo, hog, porcupine, hare, iguana,[4] tortoise and rhinoceros ;

अन्यानपि पशून् दद्यात् साधकेच्छानुसारतः।। १०६।।

anyānapi paśūn dadyāt sādhakecchānusārataḥ//

अन्यानपीति। न तु मृगादय एव बलिदानविधौ प्रशस्ताः किन्तु साधकेच्छानुसारतोऽन्यानपि पशून् देव्यै दद्यात्।

Dikpālas are Indra, Agni, Yama, Yakṣa, Varuṇa, Vāyu, Kubera, Iśāna Brahmā, Ananta.

1. See Introduction to Prapañcasāra (vol. III *Tantric Texts*).
2. The weapons are, Vajra of Indra, Śakti of Vahni, Daṇḍa of Yama, Khaḍga of Yakṣa, Pāśa of Varuṇa, Aṅkuśa of Vāyu, Gadā of Kubera, Śūla of Iśāna, Padma of Brahmā, Cakra of Ananta.
3. Upacāra, that is offerings beginning with Pādya.
4. Godhā (in Bengali, Go-sarpa). Sometimes cocks and pigeons are sacrificed. According to the *Nīla-Tantra* and *Annadā-kalpa*, a triangular Yantra representing the Yoni of the Devī is drawn on a mud platter, and the head of the bird is held is such a way that when severed the blood falls on the Yantra, and is then offered to Vaṭuka, the Yoginīs, etc.

But other beasts may also be sacrificed if the worshipper so desires.

सुलक्षणं पशुं देव्या अग्रे संस्थाप्य मन्त्रवित्।
अर्घ्योदकेन सम्प्रोक्ष्य धेनुमुद्रामृतीकृतम्।। १०७।।
कृत छागाय पशवे नम इत्यमुना सुधीः।
सम्पूज्य गन्धसिन्दूरपुष्पनैवेद्यपाथसा।
गायत्रीं दक्षिणे कर्णे जपेत् पाशविमोचनीम्।। १०८।।

sulakṣaṇaṁ paśuṁ devyā agre saṁsthāpya mantravit/
arghyodakena samprokṣya dhenumudrāmṛtīkṛtam//
kṛta chāgāya paśave nama ityamunā sudhīḥ/
sampūjya gandhasindūrapuṣpanaivedyapāthasā/
gāyatrīṁ dakṣiṇe karṇe japet pāśavimocanīm//

अथ बलिदानविधिमाह सुलक्षणमित्यादिभिः। मन्त्रवित् मन्त्रज्ञः सुधीः धीरः साधकः सुलक्षणं रोगादिशून्यं पशुं देव्या अग्रे संस्थाप्य विशेषार्घ्योदकेन फट् मन्त्रेण संप्रोक्ष्याभिषिच्य धेनुमुद्रया वं बीजेनामृतीकृतं कृत्वा छागाय पशवे नम इत्यमुना मन्त्रेण गन्धसिन्दूरपुष्पनैवेद्यपाथसा संपूज्य च छागस्य दक्षिणे कर्णे पशुपाशविमोचनीं गायत्रीं जपेत्। छागायेति मृगादीनामप्युपलक्षणं। पाथो जलम्।

The Sādhaka versed in the rules of sacrifice should select a beast free from disease and defect, and, placing it before the Devī, should sprinkle it with the water from the Viśeṣārghya,[1] and by the Dhenu-Mudrā[2] should make it into nectar.[3]

Let him then worship the goat (sheep, or whatever other animal is being sacrificed) with (the Mantra) " Namaḥ[4] to the goat, which is a beast," and with perfumes, flowers, vermilion, food, and water. Then he should whisper into the right ear of the beast the Gāyatrī Mantra, which severs the bond of its life as a beast.

पशुपाशाय शब्दान्ते विद्महे पदमुच्चरेत्।
विश्वकर्म्मणि च पदात् धीमहीति पदं वदेत्।। १०९।।

1. *i.e.*, Special offering, at the same time saying the Mantra "Phaṭ".
2. Cow Mudrā (see p. 198, note 2).
3. Amṛta—*i.e.*, food fit for the Immortals (Immortalising Food).
4. Namaḥ Chāgāya-paśave.

ततश्चोदीरयेन् मन्त्री तन्नो जीवः प्रचोदयात्।
एषा तु पशुगायत्री पशुपाशविमोचनी।। ११०।।

paśupāśāya śabdānte vidmahe padamuccaret/
viśvakarmmaṇi ca padāt dhīmahīti padaṁ vadet//
tataścodīrayen mantrī tanno jīvaḥ pracodayāt/
eṣā tu paśugāyatrī paśupāśavimocanī//

पशुपाशविमोचनीं गायत्रीमाह पशुपाशेत्यादिना। मन्त्री साधकः पशुपाशायेति शब्दस्यान्ते विद्महे इति पदमुच्चरेत्। ततो विश्वकर्मणे इति पदात् धीमहीति पदं वदेत् ततः परं तन्नो जीवः प्रचोदयात् इत्युदीरयेदुच्चरेत्। योजनया पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात् इति गायत्री जाता।

The Paśu-Gāyatrī, which liberates a beast from its life of a beast,[1] is as follows: After the word "Paśu-pāśāya" say "Vidmahe," then, after the word "Viśvakarmaṇe," say "Dhmahi," and then "Tanno Jīva pracodayāt".[2]

Mantra

Let us bring to mind the bonds of the life of a beast. Let us meditate upon the Creator of the Universe. May He liberate thee from out of this life (of a beast).

ततः खड्गं समादाय कूर्चबीजेन पूजयेत्।
तदग्रमध्यमूलेषु क्रमतः पूजयेदिमान्।। १११।।

tataḥ khaḍgaṁ samādāya kūrcabījena pūjayet/
tadagramadhyamūleṣu kramataḥ pūjayedimān//

तत इत्यादि। कूर्चबीजेन हूमिति बीजेन। तदग्रमध्यमूलेषु खड्गाग्रमध्यमूलेषु।

वागीश्वरीञ्च ब्रह्माणं लक्ष्मीनारायणौ ततः।
उमामहेश्वरौ मूले पूजयेत् साधकोत्तमः।। ११२।।

vāgīśvarīñca brahmāṇaṁ lakṣmīnārāyaṇau tataḥ/
umāmaheśvarau mūle pūjayet sādhakottamaḥ//

---

1. The sacrifice is as much for the benefit to the beast sacrificed as for the benefit of the sacrificer, since the beast, though sacrificed, attains after death a higher state of existence. The sacrificer says to the beast the Gāyatrī of release.
2. Translation follows.

खड्गाग्रमध्यमूलेषु यान् पूजयेत्तानाहैकेन वागीश्वरीमिति। ओँ वागीश्वरीब्रह्मभ्यां नम इत्येवं प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिः खड्गाग्रे वागीश्वरीं सरस्वतीं ब्रह्माणञ्च ततः खड्गमध्ये लक्ष्मीनारायणौ ततः खड्गमूले उमामहेश्वरी साधकोत्तमः पूजयेत्।

Then, taking the sacrificial knife,[1] the excellent Sādhaka should worship it with the Bīja "Hūṁ," and worship Vāgeśvarī and Brahmā at its end, Lakṣmī and Nārāyaṇa[2] at its middle, and Umā and Maheśvara[3] at the handle.

अनन्तरं ब्रह्मविष्णुशिवशक्तियुताय च।
खड्गाय नम इत्यन्तमनुना खड्गपूजनम्।। ११३।।

anantaraṁ brahmaviṣṇuśivaśaktiyutāya ca/
khaḍgāya nama ityantamanunā khaḍgapūjanam//

अनन्तरमिति। ततोऽनन्तरं ब्रह्मविष्णुशिवशक्तियुताय खड्गाय नम इत्यन्तमनुना खड्गपूजनं कुर्यात्।

Then the sacrificial knife should be worshipped with the

Mantra

Namaḥ : To the sacrificial knife infused with the presence of Brahmā, Viṣṇu, Śiva, and their Śaktis.

महावाक्येन चोत्सृज्य कृताञ्जलिपुटो वदेत्।
यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्।। ११४।।

mahāvākyena cotsṛjya kṛtāñjaliputo vadet/
yathoktena vidhānena tubhyamastu samarpitam//

---

1. Khaḍga : A heavy knife with a straight blade and curved endlike a cresecent. The cutting is done with the straight blade.
2. Viṣṇu—a compound word made of Nāra (water) and Ayana (abode)—"he Whose abode was in water in the beginning of the creation." The Supreme Lord first created water, on which He reposed Himself. It is said also that the Lord descended on earth as the Sages Nara and Nārāyaṇa, sons of Mūrti—daughter of Dakṣa and Dharma (*Śrīmad-bhāgavata*, ii, 77). According to the *Kālikā-Purāṇa*, Nārāyaṇa is the Simha portion of the Nara-simha-Avatāra. Vāgīśvarī is a name of Sarasvatī.
3. Śiva—"the Great Lord."

महावाक्येनेति। ततो महावाक्येन विष्णुरों तत्सत् ओं अद्यामुकमास्यमुकपक्षे-ऽमुकतिथावमुकराशिस्थिते भास्करे समस्ताभीप्सितपदार्थसिद्धिकामोऽमुकगोत्रोऽमुक-शर्माऽहमिष्टदेवतायै पशुमिमं सम्प्रददे इति महता वाक्येन छागमुत्सृज्य देव्यै समर्प्य कृताञ्जलिपुटे भूत्वा वदेत्। किं वदेत्तत्राह यथेत्यादि।

Then, dedicating it with the Mahāvākya[1] he should with folded hands, say : "May this dedication to Thee be according to the ordained rites".

इत्थं निवेद्य च पशुं भूमिसंस्थन्तु कारयेत्।
देवीभावपरो भूत्वा हन्यात्तीव्रप्रहारतः।। ११५।।

itthaṁ nivedya ca paśuṁ bhūmisaṁsthantu kārayet/
devībhāvaparo bhūtvā hanyāttīvraprahārataḥ//

Having thus offered the beast to the Devī, it should be placed on the ground[2].

स्वयं वा भ्रातृपुत्रैर्वा भ्रात्रा वा सुहृदैव वा।
सपिण्डेनाथ वा छेद्यो नारिपक्षं नियोजयेत्।। ११६।।

svayaṁ vā bhrātṛputrairvā bhrātrā vā suhṛdaiva vā/
spiṇḍenātha vā chedyo nāripakṣaṁ niyojayet//

इत्थमिति। पशुं छागादिम्। स्वयं वा आत्मनैव वा। पशुहननेऽरिपक्षं न नियोजयेत् प्रवर्त्तयेत्।

The worshipper then, with devotion to the Devī, should sever the head of the beast with one sharp stroke. This may be done either by the worshipper himself or by his brother,

1. Mahā-vākya—ordinarily means a great Vedic saying pre-eminently "Tat tvam asi"; but here Vākya-Saṅkalpa, declaration expression of purpose of rite, *i.e.*, the following Mantra : Viṣṇuroṁ tatsat adya (today; here the worshipper inserts the date, month, Pakṣa or half of the lunar month, and the position of the Sun in the Zociac) samastā-bhīpsita-padārtha-siddhi-kāmaḥ (desirous of obtaining success and the object of all desires; here is given the name and Gotra of the performer of the sacrifice) aham Iṣṭa-devatāyai paśuṁ imaṁ sam-pradade (I give away to the Iṣṭa-devatā this beast). Hariharānanda-Bhāratī.
2. Hitherto the animal has been standing, but before sacrifice it is raised and held before the Devī, and then placed on the ground.

brother's son, a friend,[1] or a kinsman,[2] but never by one who is inimical.

ततः कवोष्णं रुधिरं वटुकेभ्यो बलिं हरेत्।
सप्रदीपशीर्षबलिर्नमो देव्यै निवेदयेत्।। ११७।।

tataḥ kavoṣṇaṁ rudhiraṁ vaṭukebhyo baliṁ haret/
sapradīpaśīrṣabalirnamo devyai nivedayet//

तत इति। ततः परं एष कवोष्णरुधिरबलिः ओँ वटुकेभ्यो नभ इति मन्त्रेण कवोष्णमीषदुष्णं रुधिरवलिं निवेदयेत्।

The blood, when yet warm, should be offered to the Vaṭukas.[3] Then[4] the head with a light on it[5] should be offered to the Devī with the following

Mantra

"Krīṁ : This head with the light upon it I offer to the Devī : Namaḥ"[6].

एवं बलिविधिः प्रोक्तः कौलिकानां कुलार्चने।
अन्यथा देवताप्रीतिर्जायते न कदाचन।। ११८।।

evaṁ balividhiḥ proktaḥ kaulikānāṁ kulārcane/
anyathā devatāprītirjāyate na kadācana//

एवमिति। अन्यथा बलिविधेरभावात्।

This is the sacrificial rite of the Kaulikas[7] in Kaula worship. If it be not observed, the Devatā is never pleased.

ततो होमं प्रकुर्वीत तद्विधानं शृणु प्रिये।
स्वदक्षिणे वालुकाभिर्मण्डलं चतुरस्त्रकम्।। ११९।।

---

1. Su-hṛd—a well disposed person.
2. Sapiṇḍa—an agnate.
3. The mantra for offering to the Vaṭukas is : Oṁ eṣah kavoṣṇa-rudhirabaliḥ Vaṭukādibhyo Namaḥ.
4. Krīṁ.
5. After the head is severed, a light is placed on it between the horns.
6. Krīṁ Eṣaḥ sa-pradīpa-śīrṣa-baliḥ: Śrīmadādyā-Kālikāyai Devyai Namaḥ.
7. Tāntrikas of that Ācāra.

tato homaṁ prakurvīta tadvidhānaṁ śṛṇu priye/
svadakṣiṇe vālukābhirmaṇḍalaṁ caturasrakam//

After this, Homa[1] should be performed. Listen, O Beloved One! to the rules which relate to it.

चतुर्हस्तपरिमितं कृत्वा मूलेन वीक्षणम्।
अस्त्रेण ताडयित्वा च तेनैव प्रोक्षणं चरेत्।। १२०।।

caturhastaparimitaṁ kṛtvā mūlena vīkṣaṇam/
astreṇa tāḍyitvā ca tenaiva prokṣaṇaṁ caret//

अनन्तरकर्त्तव्यमाह तत इति द्वाभ्याम्। अथ होमविधानमाह स्वदक्षिणे इत्यादिभिः। स्वदक्षिणे देशे बालुकाभिश्चतुर्हस्तपरिमितं चतुरस्रकञ्चतुष्कोणं मण्डलं कृत्वा मूलेन मन्त्रेण तस्य वीक्षणं विलोकनञ्च कृत्वा अस्त्रेण फट् मन्त्रेण कुशेन ताडयित्वा च तेनैव फडैव मन्त्रेण मण्डलस्य प्रोक्षण सेकञ्चरेत्।

The worshipper should, with sand, make on his right a square, each side of which is one cubit. Let him, then, while reciting the Mūla-Mantra,[2] gaze at it, stroke it with a wisp of Kuśa grass, uttering the Weapon-Bīja,[3] and then sprinkle it with water to the accompaniment of the same Bīja.

कूर्चबीजेनावगुण्ठ्य देवतानामपूर्वकम्।
स्थण्डिलाय नम इति यजेत् साधकसत्तमः।। १२१।।

kūrcabījenāvaguṇṭhya devatānāmapūrvakam/
sthaṇḍilāya nama iti yajet sādhakasattamaḥ//

कूर्चेत्यादि। कूर्चबीजेन हूमिति बीजेन तन्मण्डलमवगुण्ठ्य वेष्टयित्वा देवतानाम-पूर्वकं स्थण्डिलाय नम इत्युच्चरन् साधकसत्तमो यजेत् अमुकदेवतास्थण्डिलाय नम इति मन्त्रेण गन्धपुष्पादिभिः स्थण्डिलं पूजयेदित्यर्थः।

Then, veiling it with the Kūrccha Bīja, he should say : "Obeisance to the Sthaṇḍila of the Devī," and with this Mantra worship the square[5].

1. Sacrifice in fire.
2. See *ante*, ch. v, 66, and note.
3. Phaṭ.
4. Hūṁ. It is to be veiled by the veil (Avaguṇṭhana) Mudrā.
5. Sthaṇḍila—*i.e.*, the squre piece of raised ground marked off as above. The Mantra here for worshipping it is : Śrīmadādya-Kālikā-devatā-sthaṇḍilāya Namaḥ. The worship is with scent and flower.

प्रागग्रा उदगग्राश्च रेखाः प्रादेशसम्मिताः।
तिस्रस्तिस्रो विधातव्यास्तत्र सम्पूजयेदिमान्।। १२२।।

prāgagrā udagagrāśca rekhāḥ prādeśasammitāḥ/
tisrastisro vidhātavyāstatra sampūjayedimān//

प्रागग्रा इति। प्राक् प्राच्यां दिश्यग्राणि। यासां ताः प्रागग्राः। उदक् उदीच्यां दिश्यग्राणि यासां ता उदगग्राश्च। प्रादेशसम्मिताः प्रादेशेन परिमितास्तिस्रस्तिस्रो रेखाः स्थण्डिले विधातव्याः। तत्र तासु रेखासु इमान् संपूजयेत्। तर्जनीयुक्ते विस्तृतेऽङ्गुष्ठे प्रादेशः स्यात्। तथैवामरसिंहः।

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते।

अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशोङ्गुल इति।

Then, inside the square three lines should be drawn from East to West, and three lines from South to North, of the length of a Prādeśa.[1] When this has been done, the following Devatās, (whose names are hereinafter given) should be worshipped over these lines.

प्रागग्रासु च रेखास मुकुन्देशपुरन्दरान्।
ब्रह्मवैवस्वतेन्दूंश्च उत्तराग्रासु पूजयेत्।। १२३।।

prāgagrāsu ca rekhāsa mukundeśapurandarān/
brahmavaivasvatendūṁśca uttarāgrāsu pūjayet//

तासु रेखासु यान् पूजयेत्तान् दर्शयन्नाह प्रागग्रास्विति। प्रागग्रासु रेखासु प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिः मुकुन्देशपुरन्दरान् विष्णुशिवेन्द्रान् क्रमतः पूजयेत्। उत्तराग्रासु रेखासु तु ब्रह्मवैवस्वतेन्दून् ब्रह्मयमचन्द्रान् पूजयेत्।

Over the lines from West to East worship Mukunda[2], Īśa,[3] and Purandara :[4] over the lines from South to North, Brahmā,[5] Vaivasvata,[6] and Indu[7].

---

1. *i.e.*, the length between the tip of the thumb and that of the first finger when fully stretched out.
2. Viṣṇu—"Giver of liberation".
3. Śiva—Īśa is God, the Ruler.
4. Indra, so called as destroying the Asura Tripura.
5. Yama—Son of the Sun.
6. Candra—the Moon, the pleasing one.
7. This is the Mahā-preta-Bīja, the formation of which is shown in the

ततः स्थण्डिलमध्ये तु हसौःगर्भं त्रिकोणकम्।
षट्कोणं तद्बहिर्वृत्तं ततोऽष्टदलपङ्कजम्।
भूपुरं तद्बहिर्विद्वान् विलिखेद्यन्त्रमुत्तमम्।। १२४।।

tataḥ sthaṇḍilamadhye tu hasauḥgarbhaṁ trikoṇakam/
ṣaṭkoṇaṁ tadbahirvṛttaṁ tato'ṣṭadalapaṅkajam/
bhūpuraṁ tadbahirvidvān vilikhedyantramuttamam//

तत इति। ततोऽनन्तरं स्थण्डिलमध्ये हसौः मिलिता एव हकारसकारौकारविसर्गा गर्भे यस्य तथाभूतं त्रिकोणं तद्बहिः षट्कोणं तद्बहिर्वृत्त च मण्डलं ततो वहिरष्टदलपङ्कजं ततोऽपि बहिश्चतुष्कोणञ्चतुर्द्वारं भूपुरञ्च विद्वान् विलिखेत्।

Then a triangle should be drawn within the square, and within the triangle the Bīja Hsauḥ[1] should be written. Outside the triangle draw a hexagon, outside this a circle, and outside the circle a lotus with eight petals, and outside this a (square) Bhū-pura,[1] with four entrances; so should the wise one draw the excellent Yantra[2].

मूलेन पुष्पाञ्जलिना संपूज्य प्रणवेन तु।
होमद्रव्याणि संप्रोक्ष्य कर्णिकायां यजेत् सुधीः।
मायामाधारशक्त्यादीन् प्रत्येकं वा प्रपूजयेत्।। १२५।।

mūlena puṣpāñjalinā saṁpūjya praṇavena tu/
homadravyāṇi saṁprokṣya rkṇikāyāṁ yajet sudhīḥ/
māyāmādhāraśaktyādīn pratyekaṁ vā prapūjayet//

मूलेनेति। एवं लिखितमुत्तमं यन्त्रं मूलेन मन्त्रेण पुष्पाञ्जलिना संपूज्य प्रणवेन होमद्रव्याणि च संप्रोक्ष्याष्टदलपङ्कजस्य कर्णिकायां बीजकोशे समुदितानेवाधारशक्त्यादीन् मायां ह्रीँ बीजमुच्चरन् सुधीः साधको यजेत्। ह्रीँ आधारशक्त्यादिभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिः पूजयेदित्यर्थः। अथवा आधारशक्त्यादिकं प्रत्येकमेव प्रपूजयेत्।

---

eighth verse of the *Ānanda-laharī* of Śaṅkarācārya and in the 2nd Ch. of *Jñānārṇava-Tantra.* The Mahā-Pretas are the five Śivas—Brahmā, Viṣṇu, Rudra, Iśāna and Sadāśiva (*Rudra-yāmala-Tantra).* Ha-kāra=Śiva, and Sa-kāra-Śakti, Au-kāra-Suddhā-sindhu. (Ocean of Nectar).

1. Bhū (Earth), Pura (town, city, etc.). This is the part of the diagram outside the drawing, the marked-off space with in which the special diagram is drawn (see Introduction).
2. Diagram.

Having worshipped, with the Mūla-Mantra[1] and with offerings of handfuls of flowers, the space thus marked off,[2] and washed the articles[3] for the Homa sacrifice with the Praṇava,[4] the intelligent one, should, after first uttering the Māyā-Bīja,[5] worship in the pericarp of the lotus the Ādhāra-śakti[6] and others,[7] either individually or collectively.

अग्न्यादिकोणे धर्म्मञ्च ज्ञानं वैराग्यमेव च।
ऐश्वर्यं पूजयित्वा तु पूर्वादिषु दिशां क्रमात्।। १२६।।
अधर्म्ममज्ञानमिति अवैराग्यमनन्तरम्।
अनैश्वर्यं यजेन्मन्त्री मध्येऽनन्तञ्च पद्मकम्।। १२७।।

---

1. See note under ch. v, 66, 67.
2. Maṇḍala, or Yantra.
3. *i.e.*, Ghee, plantain, rice, fried paddy (Bengali khaī, or Lāja in Sanskrit), bael-leaf, flowers, curd, and caru (rice boiled with milk), stick of Palāśa-tree, and leaves of Śamī (a thorn).
4. Oṁ.
5. Hrīṁ.
6. Śakti of the Support.
7. *i.e.*, Prakṛti, Kūrma (tortoise), Ananta (Serpent), Pṛthivī (earth), Sudhāmbudhi (Ocean of Nectar), Maṇī-dvīpa (Island of Gems), Cintāmaṇi-gṛīha (Room of Cintāmaṇi stones, which grant all desires), Pārijāta (Tree so called), Kalpaka-vṛkṣa (The tree which grants all desires), Ratnavedikā (Jewelled altar), Ratna-siṁhāsana (Lion seat of gems), Maṇi-pīṭha (Gem-set seat)—all to be worshipped in the pericarp (see *ante*, p. 113). To which Tarkālaṅkāra adds Muni, Deva Vahumāṁsāsthimodamānaśivā (she-jackals), Savamuṇḍa (Head of a corpse), Citāṅkārāsthi (fuel and bones from the funeral pyre), Dharma, Jñāna, Vairāgya, Aiśvarya, Adharma, Ajñāna, Avairāgya, Anaiśvarya, Samvinnāla (the stalk which is Samvid), Prakṛti-maya-patra (the leaves which are Prakṛti) Vikāra-maya-kesara (the filaments which are Vikāra), Tattva-maya-karṇikā (the Tattva which is the pericarp) Arkamaṇḍala (the solar circle with 12 Kalās), Somamaṇḍala (Lunar circle with 16 Kalās), Vahni-maṇḍala (the fire circle with 10 Kalās), Sattva, Rajas, Tamas, Ātmā, Antarātmā, Paramātmā, Jñānātmā (see *Śakti and Śākta* Ch. I), Icchā, Jñāna, Kriyā, Kāminī, Kāma-dāyinī, Rati, Rati-priyā, Anandā, Manomanī, Parā, Parāparā, Sadā-śiva-mahāpretapadmāsana.
These are given from the *śyāmārahasya*, *Śyāmapradīpa* and other Tāntrik works.

agnyādikoṇe dharmmañca jñānaṁ vairāgyameva ca/
aiśvaryaṁ pūjyitvā tu pūrvādiṣu diśāṁ kramāt//
adharmmamajñānamiti avairāgyamanantaram/
anaiśvaryaṁ yajenmantrī madhye'nantañca padmakam//

अग्नीत्यादि। प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिर्यन्त्रस्याग्न्यादिकोणे क्रमतो धर्मं ज्ञानं वैराग्यमैश्वर्यञ्च पूजयित्वा दिशां क्रमात् पूर्वादिषु दिक्षु अधर्ममज्ञानमवैराग्यं एतदनन्तरमनैश्वर्यञ्च मन्त्री यजेत्। यन्त्रस्य मध्येऽनन्तं पद्मकञ्च यजेत्।

Piety, Knowledge, Dispassion, and Dominion[1] should be worshipped in the Agni, Iśāna, Vāyu, and Nairṛta corners of the Yantra respectively,' and the negation of the qualities in the East, North, West, and South respectively,[2] and in the centre Ananta and Padma[3].

कलासहितसूर्यस्य तथा सोमस्य मण्डलम्।
प्रागादिकेशरेष्वेषु मध्ये चैताः प्रपूजयेत्।। १२८।।

kalāsahitasūryasya tathā somasya maṇḍalam/
prāgādikeśareṣveṣu madhye caitāḥ prapūjayet//

कलेत्यादि। पूर्वोक्ताभ्यामेव मन्त्राभ्यां गन्धपुष्पादिभिः कलासहितसूर्यस्य तथा कलासहितस्य सोमस्य च मण्डलं यंत्रमध्ये एव प्रपूजयेत्। एषु प्रागादिकेशरेषु मध्ये च क्रमेणैताः प्रपूजयेत्।

पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा तथैव च।
स्फुलिङ्गिनी च रुचिरा ज्वलिनीति तथा क्रमात्।। १२९।।

pītā śvetā'ruṇā kṛṣṇā dhūmrā tīvrā tathaiva ca/
sphuliṅginī ca rucirā jvalinīti tathā kramāt//

याः प्रपूजयेत्ता आह पीतेत्याद्येकेन। पीताश्वेतादीनां मध्ये ज्वलिनीं मध्ये पूजयेत्।

Then let him worship Sun with his twelve digits, and Moon with her sixteen digits,[4] and, on the filament commencing from

1. *i.e.*, Dharma, Jñāna, Vairāgya, Aiśvarya. The latter term, which comes from Īśvara (Lord, God), a divine attribute of Īśvara, of which there are eight. It means also the prosperity, power, might.
2. *i.e.*, the South-East, North-East, North-West, South-West, of which the Devas named are regents.
3. Ananta, the endless one—Viṣṇu, Padma, the lotus from navel of Viṣṇu.
4. Kalās.

the East,[1] worship Pītā, and then Śvetā, Aruṇā, Kṛṣṇā, Dhūmrā, Tīvrā, Sphuliṅgnī, Rucirā, in their order, and in the centre Jvālinī[2].

प्रणवादिनमोऽन्तेन सर्वत्र पूजनं चरेत्।
रं वह्नेरासनायेति नमोऽन्तेन प्रपूजयेत्।। १३०।।

praṇavādinamo'ntena sarvatra pūjanaṁ caret/
raṁ vahnerāsanāyeti namo'ntena prapūjayet//

प्रणवादीत्यादि। सर्वत्र देशे नमोऽन्तेन रं वह्नेरासनायेति मन्त्रेण यन्त्रमध्ये वह्नेरासनं प्रपूजयेत्।

वागीश्वरीमृतुस्नातां नीलेन्दीवरलोचनाम्।
वागीश्वरेण संयुक्तां ध्यात्वा मन्त्री तदासने।। १३१।।

vāgīśvarīmṛtusnātāṁ nīlendīvaralocanām/
vāgīśvareṇa saṁyuktāṁ dhyātvā mantrī tadāsane//

In the worship of these Praṇava[3] should commence the Mantra, and Namaḥ should end it. The seat of Fire[4] should be worshipped with the

Mantra

Raṁ : Salutation to the seat of Fire.[5]

Then the Mantrin[6] should meditate upon the Devī Vāgīśvarī as after She has bathed,[7] with eyes like the blue lotus, on the

---

1. Pragādi-kesara. The other are Iśāna, (Śiva), North-East, Uttara (North), Vāyu (Wind), (North-West), Paścima (West), Nairṛta (South-West, whose regent is Yama), Dakṣiṇa (South), Agni (fire), or South-East.
2. *i.e.*, Yellow, White, Tawny-red, Black, Smoky (Red seen through smoke), Fierceness, Having Sparks of Fire, Brilliant, Flaming, the names or Fire. Śvetā is worshipped in N.E., Aruṇā in N., Kṛṣṇā in N.W., Dhūmrā in W., Tīvrā in S.W., Sphuliṅginī in S., and Rucirā in S.E.
3. Oṁ.
4. Vahni.
5. Raṁ Vahner-āsanāya Namaḥ.
6. One versed in the Mantras—the worshipper, sacrificer.
7. Ṛtu-snātā Vāgīśvarī. This refers to the first bath after the monthly period, during which no bath of immersion is taken, such as bathing in the river, tank, etc. Vāgīśvarī or Sarasvatī—Devī of Speech, Learning, Fine Arts, etc.

seat of Fire in the embrace of Vāgīśvara;[1] and worship them in the seat of Fire with the Māyā-Bīja[2].

मायया तौ प्रपूज्याथ विधिवद्वह्निमानयेत्।
मूलेन वीक्षणं कृत्वा फटाऽऽवाहनमाचरेत्।। १३२।।

māyayā tau prapūjyātha vidhivadvahnimānayet/
mūlena vīkṣaṇaṁ kṛtvā phaṭā''vāhanamācaret//

वागीश्वरीमिति। ततो वागीश्वरेण ब्रह्मणा संयुक्तां नीलेन्दीवरलोचनां श्यामपङ्कजनेत्राम् ऋतुस्नातां वागीश्वरीं धत्वा मन्त्री साधकस्तदासने तस्मिन् वह्निपीठे तौ वागीश्वरीब्रह्माणौ मायया ह्रीँ बीजाद्येन नमोऽन्तेन नाममन्त्रेण प्रपूज्याथानन्तरं विधिवत् शरावेण कांस्यपात्रेण वा शुद्धमग्निमानयेत्। मूलेन मन्त्रेण वह्नेर्वीक्षणं कृत्वा फट् मन्त्रेण तस्यैवावाहनञ्चरेत्।

After worshipping Vāgīśvarī and Vāgīśvara on the seat of fire with the Māyā Bīja the Sādhaka should bring Fire in the manner prescribed,[3] and gaze intently on it, and, whilst repeating the Mūla-Mantra, invoke Vahni into it with the Mantra Phaṭ[4].

प्रणवं च ततो वह्नेर्योगपीठाय हृन्मनुः।
यन्त्रे पीठं पूजयित्वा दिक्षु चैताः प्रपूजयेत्।
वामा ज्येष्ठा तथा रौद्री अम्बिकेति यथाक्रमात्।। १३३।।

praṇavaṁ ca tato vahneryogapīṭhāya hṛnmanuḥ/
yantre pīṭhaṁ pūjayitvā dikṣu caitāḥ prapūjayet/
vāmā jyeṣṭhā tathā raudrī ambiketi yathākramāt//

प्रणवमिति। पूर्वं प्रणवं वदेत् ततो वह्नेर्योगपीठायेति वदेत्। ततो हृत् नम इति वदेत्। योजनया ओँ वह्नेर्योगपीठाय नम इति मनुर्जातः। अनेनैव मनुना यन्त्रे वह्नेः पीठं पूजयित्वा पीठात् पूर्वादिषु चतसृष दिक्षु प्रणवादिनमोऽन्तनाममन्त्रेण गन्धपुष्पादिभिरेताश्च प्रपूजयेत्। पूर्वादिदिक्षु याः प्रपूजयेत्ता आह वामेत्याद्यर्द्धेन।

---

1. *i.e.*, Brahmā.
2. Hrīṁ.
3. *i.e.*, either on a mud or bell-metal platter.
4. Tarkālaṅkāra says that "Phaṭ" is her incongrouous in that it is the Astra or Weapon Mantra used to avert danger, and there can be no invocation by Phaṭ. He would therefore read "phaṭā tāḍanaṁ," or "phaṭā rakṣaṇam," in lieu of "phaṭāvāhanaṁ". It would then mean driving out or protecting by Phaṭ.

Then the seat of Fire should be worshipped in the Yantra with the

Mantra

Oṁ : Salutation to the Yoga-pīṭha of Fire,[1].

and on the four sides, beginning on the East and ending on the South, Vāmā,[2] Jyeṣṭhā,[3] Raudrī,[4] Aṁbikā,[5] should be worshipped in the order given.

ततोऽमुक्या देवतायाः स्थण्डिलाय नमः पदम्।
इति स्थण्डिलमापूज्य तन्मध्ये मूलरूपिणीम्।। १३४।।
ध्यात्वा वागीश्वरीं देवीं वह्निबीजपुरःसरम्।
वह्निमुद्धृत्य मूलान्ते कूर्चमस्त्रं समुच्चरन्।। १३५।।
क्रव्यादेभ्यो वह्निजायां क्रव्यादांशं परिज्यजेत्।
अस्त्रेण वह्निं संवीक्ष्य कूर्च्चेनैवावगुण्ठयेत्।। १३६।।

tato'mukyā devatāyāḥ sthaṇḍilāya namaḥ padam/
iti sthaṇḍilamāpūjya tanmadhye mūlarūpiṇīm//
dhyātvā vāgīśvarīṁ devīṁ vhnibījapuraḥsaram/
vahnimuddhṛtya mūlānte kūrcamastraṁ samuccaran//
kravyādebhyo vahnijāyāṁ kravyādāṁśaṁ parijyajet/
astreṇa vahniṁ saṁvīkṣya kūrccenaivāvaguṇṭhayet//

तत इति। ततोऽनन्तरम् अमुक्या देवतायाः स्थण्डिलाय नम इति सर्वं मन्त्रपदमुच्चरन् गन्धपुष्पादिभिः स्थण्डिलमापूज्य तन्मध्ये मूलदेवतारूपिणीं वागीश्वरीं देवीं ध्यात्वा

---

1. Oṁ Vahner Yoga-pīṭhāya Namaḥ. Yoga-pīṭha is Yoga Seat.
2-3. See next note. Vāmā is Icchā, Jyeṣṭhā Jñāna, and Raudrī is Kriyā Śakti. See Ch. I. *Yoginīhṛdaya-Tantra*, vv. 36-42.
4. *Cf. Bhūta-śuddhi-Tantra*, chap, iv : "O Maheśānī! Vāmā is Brahmā and Jyeṣṭhā is called Viṣṇu, and by Raudrī is to be understood Rudra. Vāmā dwells in the navel, Jyeṣṭhā in the heart, and Raudrī always in the head. These are the Bindus from which everything has originated. Brahmā, Viṣṇu, and Rudra are Prakṛti Herself. And O Parameśāni! It is the Bindu which prompts them to action. It is by Bindu that everything is created, protected, and absorbed (Sṛṣṭi, Sthiti, Laya). The Bindu is the Bīja (Cause) of Brahmā, Viṣṇu, and Maheśa." Possibly "navel" may indicate the whole region from Mūlādhāra to the heart.
5. Mother. Here the state when the creative Śakti first saw Her own Sphuraṇa.

वह्निबीजं पुरःसरं यत्र वह्निबीजपुरःसरं यथास्यात्तथा वह्निमुद्धृत्य रं बीजेन वह्निमुत्थाप्येत्यर्थः। मूलान्ते कूर्चं हूँ बीजमस्त्रं फडिति चा बीजं समुच्चरन् तदन्ते क्रव्यादेभ्य इत्युच्चरन् तदन्ते वह्निजाया स्वाहेत्युच्चरेत्। योजनया ह्रीँ श्रीँ क्रीँ परमेश्वरि स्वाहा हूँ फट् क्रव्यादेभ्यः स्वाहेति मन्त्रो जातः। अनेनैव मन्त्रेण वह्नितो ज्वलद्दहरूपं क्रव्यादांशं राक्षसभागं दक्षिणस्यां दिशि परित्यजेत्। ततोऽस्त्रेण फट्य वह्निं संवीक्ष्य दृष्ट्वा कूर्चेनैव हूँ बीजेनैवावगुण्ठयेद्वह्निं वेष्टयेत्।

Then the marked-off space[1] should be worshipped with the

Mantra

Salutation : To the Sthaṇḍila of the revered Devatā, the Primeval Kālikā[2]

and then within this place the worshipper should meditate upon the Devī-Vāgīśvarī[3] under the form of the Mūla-Devatā.[4] After lighting the Fire with the Bīja Raṁ, and reciting the Mūla-Mantra, and then the

Mantra

Huṁ Phaṭ : To the eaters of rawflesh,[5] Svāhā,

the share of the raw meat eaters (Rākṣasas) should be put aside. Gaze at the Fire, saying the Weapon-Mantra,[6] and surround it with the Veil Mudrā,[7] uttering the Bīja Hūṁ.

धेन्वा चैवामृतीकृत्य हस्ताभ्यामग्निमुद्धरेत्।
प्रादक्षिण्यक्रमेणाग्निं भ्रामयन् स्थण्डिलोपरि।। १३७।।

त्रिधा जानुस्पृष्टभूमिः शिवबीजं विचिन्तयन्।
आत्मनोऽभिमुखीकृत्य योनियन्त्रे नियोजयेत्।। १३८।।

dhenvā caivāmṛtīkṛtya hastābhyāmagnimuddharet/
prādakṣiṇyakrameṇāgniṁ bhrāmayan sthaṇḍilopari//

---

1. Sthaṇḍila.
2. Śrīmad-Adyā-Kālikāyāḥ Devatāyāḥ Sthaṇḍilāya Namaḥ.
3. Devī of Speech—Sarasvatī.
4. *i.e.*, Kālī.
5. Kravyādebhyaḥ—that is, to the Demonic, Rākṣasas. Hūṁ is kūrca-Bīja.
6. *i.e.*, Phaṭ.
7. Avaguṇṭhana-Mudrā.

tridhā jānuspṛṣṭabhūmiḥ śivabījaṁ vicintayan/
ātmano'bhimukhīkṛtya yoniyantre niyojayet//

धेन्वेति। धेन्वा मुद्रया चामृतीकृत्य हस्ताभ्यां पुनरग्निमद्धरेत् उत्थापयेत्। उत्थाप्य च प्रादक्षिण्यक्रमेण स्थण्डिलोपरि त्रिधा त्रिवारमग्निं भ्रामयन् शिवबीजं शम्भुवीर्य-रूपमग्निं विचिन्तयंश्च साधको जानुस्पृष्टिभूमिः सन्नात्मनोऽभिमुखीकृत्य योनियन्त्रे त्रिकोणमण्डले नियोजयेत् स्थापयेत्।

Make the Fire into nectar with the Dhenu-Mudrā.[1] Take some Fire in both palms, and wave it thrice in a circle over the Sthaṇḍila from right to left. Then with both knees on the ground, and meditating on Fire as the male seed of Śiva, the worshipper should place it into that portion of the Yoni-Yantra[2] which is nearest him.

ततो मायां समुच्चार्य वह्निमूर्त्तिञ्च ङेयुताम्।
नमोऽन्तेन प्रपूज्याथ रं वह्निपरतः सुधीः।
चेतन्याय नमो वह्नेश्चैतन्यं परिपूजयेत्।। १३९।।

tato māyāṁ samuccārya vahnimūrttiñca ṅeyutām/
namo'ntena prapūjyātha raṁ vahniparataḥ sudhīḥ/
cetanyāya namo vahneścaitanyaṁ paripūjayet//

तत इति। ततोऽनन्तरं मायां ह्रीँ बीजं समुच्चार्य नमोऽन्तेन नमसाऽन्तेन सह ङेयुतां वह्निमूर्त्तिं समुच्चरेत्। योजनया ह्रीँ वह्निमूर्त्तये नमः इति मन्त्रो जातः। अनेन मन्त्रेण वह्निमूर्त्तिं प्रपूज्याथानन्तरं सुधीः साधको रं वह्नेः परतः चैतन्याय नम इति वदेत्। योजनया रं वह्निचैतन्याय नमं इति मनुर्जातः। अनेनैव मनुना वह्नेः चैतन्यं परिपूजयेत्।

Then, the Sādhaka should first worship the Image of Fire with the

Mantra

Hrīṁ : Salutation to the Image of Fire,[3] Namaḥ

---

1. Cow Mudrā (see p. 198, note 2).
2. Female organ diagram—*i.e.*, the triangle, which is symbolical of the Yoni.
3. Hrīṁ Vahni-mūrtaye Namaḥ.

and after that the Spirit[1] of Fire with the

Mantra

Raṁ : to the Spirit of Fire, Namaḥ[2].

नमसा वह्निमूर्त्तिञ्च चैतन्यं परिकल्प्य च।
प्रज्वालयेत्ततो वह्निं मन्त्रेणानेन मन्त्रवित्।। १४०।।

namasā vahnimūrttiñca caitanyaṁ parikalpya ca/
prajvālayettato vahniṁ mantreṇānena mantravit//

नमसेति। नमसा मन्त्रेण वह्निमूर्त्तिं वह्नेः चैतन्यञ्च परिकल्प्य मनसा विरच्य ततोऽनेनान्तरमेव वक्ष्यमाणेन मन्त्रेण मन्त्रवित् साधको वह्निं प्रज्वालयेदुद्दीपयेत्।

The Mantrin[3] will then think in his mind of the awakened form of Vahni,[4] and kindle Fire with the following

प्रणवं पूर्वमुद्धृत्य चित्पिङ्गलपदं तथा।
हनद्वयं दह दह पच पचेति ततो वदेत्।। १४१।।

सर्वज्ञाज्ञापय स्वाहा वह्निप्रज्वालने मनुः।
ततः कृताञ्जलिर्भूत्वा प्रकुर्यादग्निवन्दनम्।। १४२।।

praṇavaṁ pūrvamuddhṛtya citpiṅgalapadaṁ tathā/
hanadvayaṁ daha daha paca paceti tato vadet//
sarvajñājñāpaya svāhā vahniprajvālane manuḥ/
tataḥ kṛtāñjalirbhūtvā prakuryādagnivandanam//

वह्निप्रज्वालनमन्त्रमेवाह प्रणवमित्यादिना सार्द्धेन। पूर्वं प्रणवमुद्धृत्य उक्त्वा ततः परं चित्पिङ्गलपदं वदेत्। ततो हनद्वयं ततो दहदहेति ततः पचपचेति च वदेत्। ततः सर्वज्ञाज्ञापय स्वाहेति वदेत् योजनया ओँ चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहेति मन्त्रो जातः। अयं मनुर्वह्निप्रज्वालने स्मृतः।

Mantra

Oṁ : Ruddy Spirit of Fire, which knows all, destroy, destroy, burn, burn, ripen, ripen,[5] command : Svāhā.

---

1. Caitanya derived from cit=to awaken, to be conscious.
2. Raṁ Vahni-caitanyāya Namaḥ.
3. See p. 226, note 6.
4. Fire.
5. Oṁ cit-piṅgala, hana hana, daha, daha, paca, paca, sarvajñā-jñāpaya : Svāhā. "Ripen," either in the sense that Fire should assimilate the oblation, or convey them matured to the other Devas.

This is the Mantra for kindling Fire. After this, with folded hands, Fire should again be adored.

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं सर्वतोमुखम्।। १४३।।

agniṁ prajvalitaṁ vande jātavedaṁ hutāśanam/
suvarṇavarṇamamalaṁ samiddhaṁ sarvatomukham//

अग्निवन्दनमन्त्रमाह अग्निं प्रज्वलितं वन्दे इत्याति।

Mantra

I adore the lighted and kindled Fire of the colour of gold, free from impurity, burning, Jāta-veda,[1] the devourer of oblations,[2] which faces every quarter[3].

इत्युपस्थाप्य दहनं छादयेत् स्थण्डिलं कुशैः।
स्वेष्टनाम्ना वह्निनाम कृत्वाऽभ्यर्चनमाचरेत्।। १४४।।

ityupasthāpya dahanaṁ chādayet sthaṇḍilaṁ kuśaiḥ/
sveṣṭanāmnā vahnināma kṛtvā'bhyarcanamācaret//

इतीति। इत्यनेनैव मन्त्रेण दहनं वह्निमुपस्थाप्याभिवन्द्य स्थण्डिलं छादयेत्। ततः स्वेष्टनाम वह्निनाम्ना कृत्वा इतोऽनन्तरमेव वक्ष्यमाणेन मन्त्रेण वह्नेरभ्यर्चनमाचरेत्।

After adoration of Fire in this manner, cover the marked-off space[4] with Kuśa grass, and then the worshipper, giving Fire the name of his own Iṣṭa-devatā,[5] should worship[6] him with the

---

1. See p. 333, n. 1, and *Ṛg-veda* (x, 79, 80).
2. Hutāśana is name of sacrificial Fire.
3. Agniṁ prajvalitaṁ vande Jāta-vedaṁ Hutāśanaṁ :
Suvarṇa-varṇam-amalaṁ samiddhaṁ sarvato-mukhaṁ.
4. Sthaṇḍila.
5. See note under ch. v, 33. This is done thus : "Agne! tvaṁ Ādyā-Kālikā-nāmāsi"=Agni, Thy name is Adyā Kālikā.
6. Arcanā : in external Arcanā scent and flower are offered. The Mantra is : Ete gandha-puṣpe Ādyā-Kālikā-nāmāgnaye Namaḥ" (These the flower and scent are to Āgni, whose name is Ādyā Kālikā); and before Arcanā the Deva must be invoked with the Āvāhana-Mantra, which is as follows : "Ādyā-kālikā-nāmāgne! ihāgaccha ihāgaccha; iha tiṣṭha iha tiṣṭha, iha sannidhehi, iha sannidhehi; iha sammukhībhava, iha

तारो वैश्वानरपदात् जातवेदपदं वदेत्।
इहावहावहेत्युक्त्वा लोहिताक्षपदान्तरम्।। १४५।।
सर्वकर्माणि पदतः साधयान्तेऽग्निवल्लभा।
इत्यभ्यर्च्य हिरण्यादिसप्तजिह्वाः प्रपूजयेत्।। १४६।।

tāro vaiśvānarapadāt jātavedapadaṁ vadet/
ihāvahāvahetyuktvā lohitākṣapadāntaram//
sarvakarmāṇi padataḥ sādhayānte'gnivallabhā/
ityabhyarcya hiraṇyādisaptajihvāḥ prapūjayet//

बह्वभ्यर्चनमन्त्रमेवाह तार इत्यादिना सार्द्धेन। पूर्वं तारः प्रणवो वाच्यः ततो वैश्वानरपदात् परं जातवेदपदं वदेत्। तत इहावहावहेत्यक्त्वा लोहिताक्षरूपपदान्तरं वदेत्। ततः सर्वकर्माणीति पदात्परं साधयेति पदं वदेत्। तदन्ते चाग्निवल्लभा स्वाहा वाच्या। योजनया ओँ वैश्वानर जातवेद इहावहावह लोहिताक्ष सर्वकर्म्माणि साधय स्वाहेति मनुरासीत्। इत्यनेनैव मनुना स्वेष्टदेवतानामानं वह्निमभ्यर्च्य ओँ वह्नेर्हिरण्यादि-सप्तजिह्वाभ्यो नमः इति मन्त्रेण वह्नेर्हिरण्यादिसप्तजिह्वा गन्धपुष्पादिभिः पूजयेत्।

Mantra

Oṁ, Vaiśvānara, Jāta-veda, come here, come here, O Red-eyed One, accomplish all works : Svāhā.[1]

In this way the seven Tongues[2] of Fire, Hiraṇya and others, should be worshipped.

सहस्रार्चिःपदं ङेऽन्तं हृदयाय नमो वदन्।
षडङ्गं पूजयेद्वह्नेस्ततो मूर्त्तीर्यजेत् सुधीः।। १४७।।

---

sasmmukhībhava; iha sanniruddho bhava, iha sanniruddho bhava; mama pujāṅg grīhāṇa" (O Agnī! whose name is Adyā-Kālikā, come here, come here, stay here, stay here, fix thyself here, fix thyself here be here and face towards me, be here and face towards me, be here detained, be there detained. Accept my worship).

1. Oṁ Vaiśvānara Jātaveda ihāvaha ihāvaha; lohitākṣa, sarvakarmāṇi sādhaya : Svāhā. Viśānara="Ruling or benefiting all men," is a name of Savitṛ. Vaiśvānara=Son of Viśvānara, an ephithet of Agni. As to Jātaveda, see below, note 1 on next page.
2. *i.e.*, Kālī, Karālī, Mano-javā, Su-lohitā, Sudhūmra-varṇā, Ugrā or Sphuliṅginī, Pradīptā. The Mantra is Oṁ Vahner Hiraṇyādi-sapta-jihvābhyo Namaḥ.

sahasrārciḥpadaṁ ṅe'ntaṁ hṛdayāya namo vadan/
ṣaḍaṅgaṁ pūjayedvahnestato mūrttīryajet sudhīḥ//

सहस्रेत्यादि। ङेऽन्तं सहस्रार्च्चिःपदं ततो हृदयाय नम इति च पदं वदन् सहस्रार्च्चिषे हृदयाय नमः इति मन्त्रं समुच्चरन् साधको वह्नेर्हृदयं पूजयेत्। ततो वह्ने षडङ्गेभ्यो नम इति मन्त्रेण गन्धपुष्पादिभिर्वह्नेः षडङ्गं पूजयेत्। ततो वह्निमूर्त्तिभ्यो नमः इति मन्त्रेण वह्नेर्मूर्त्तीः सुधीर्यजेत्।

The worshipper should next adore the six Limbs of Vahni,[1] uttering the word "of a thousand rays" in the dative singular, and also "obeisance to the heart".[2]

Then the wise one should worship the forms of Vahni.

जातवेदप्रभृतयो मूर्त्तयोऽष्टौ प्रकीर्त्तिताः।। १४८।।

jātavedaprabhṛtayo mūrttayo'ṣṭau prakīrttitāḥ//

ननु वह्नेः कति मूर्त्तयः सन्तीत्यपेक्षायामाह जातवेदेत्यादि। जातवेदप्रभृतया वह्नेरष्टौ मूर्त्तयः प्रकीर्त्तिताः पूर्वमुक्ताः।

The eight[3] forms are Jāta-veda and others.

---

1. Fire. The worshipper should do Hṛdyādi-ṣaḍaṅga-nyāsa of Fire. The first Mantra applicable to the heart is given. The rest is understood (see next note).
2. The full Mantra runs thus : Oṁ Sahasrārcise Hṛdayāya Namaḥ (Oṁ salutation to the heart of a thousand rays), Oṁ Svasti-pūrṇāya Śirase Svāhā (salutation to the head full of prosperity), Oṁ Uttiṣṭha-puruṣāya Śikhāyai Vaṣaṭ (salutation to the crown lock where abides the Supreme Puruṣa or Being), Oṁ Dhūma-vyāpine Kavacāya Hūṁ (to the smoke-spreading body), Oṁ Sapta-jihvāya Netra-trayāya Vauṣaṭ (to the seven-tongued and three-eyed), Oṁ Dhanurdharāya Astrāya phaṭ (carrying the bow and his weapon).
O Supreme Brahman! all this life of mine has been spent in the discharge of household duties. Do Thou, O Lord! be gracious to me in this my adoption of the life of an ascetic.

निवृत्तगृहकर्माणं विचार्य विधिवद्गुरुः।
शान्तं विवेकिनं वीक्ष्य द्वितीयाश्रममादिशेत्।। २३०।।

---

1. The text has Para-devatā, which literally means the Supreme Deva (Brahman), but which is translated by *Takālaṅkāra* as Abhīṣṭa-devatā (or Iṣṭa-devatā), such Devatā being to each worshipper his Supreme Devatā. So far as the Tantra is concerned the Iṣṭa-devatā is either the Brahman or Supreme Devī-Kālikā.
2. Paramānanda, or in the Brahman who is Supreme Bliss.

nivṛttagṛhakarmāṇaṁ vicārya vidhivadguruḥ/
śāntaṁ vivekinaṁ vīkṣya dvitīyāśramamādiśet//

शान्तम् उपरतचित्तम्।

The religious Preceptor[1] should thereupon satisfy himself that the disciple's duties as a householder have all been accomplished, and, on finding him to be of calm mind and full of' discernment, initiate him into the second stage.

ततः शिष्यः कृतस्नानो यतात्मा विहिताह्निकः।
ऋणत्रयविमुक्त्यर्थं देवर्षीनर्चयेत् पितॄन्।। २३१।।

tataḥ śiṣyaḥ kṛtasnāno yatātmā vihitāhnikaḥ/
ṛṇatrayavimuktyarthaṁ devarṣīnarcayet pitṝn//

तत इति। ततः परं यतात्मा संयतमनाः शिष्यः कृतस्नानो विहिताह्निकश्च भूत्वा ऋणत्रयविमुक्त्यर्थं देवर्षीन् देवान् ऋषीन् पितॄश्चार्चयेत् पूजयेत्।

The disciple should then, with a well-controlled mind, make his ablutions and say his daily prayer, and then, with the object of being absolved from the threefold debt[2] due to them, worship the Devas, the Ṛṣis,[3] and the Pitṛs.

देवा ब्रह्मा च विष्णुश्च रुद्रश्च स्वगणैः सह।
ऋषयः सनकाद्याश्च देवब्रह्मर्षयस्तथा ।। २३२।।

devā brahmā ca viṣṇuśca rudraśca svagaṇaiḥ saha/
ṛṣayaḥ sanakādyāśca devabrahmarṣayastathā//

---

1. Guru.
2. The threefold debt is that due to the Devas, Ṛṣis, and Pitṛs for protection, teaching, parentage; the fourth debt (Mānava) is that to men for their help. The first is discharged by Yajña, the second by Brahmacarya, the third by giving birth to children, and the fourth by the performance of the duties of the Āśrama.
3. Ṛṣi according to some comes from that root Dṛś=to see for they are seers. Vācaspatya derives it from root Ṛṣ=to go, that is, one who has gone to the end of Saṁsāra by Jñāna is a Ṛṣi. *Bhāratī* classifies them as follows: the highest are the mānasa-putras of Brahmā who are Sanaka, Sanandana, Sanātana and others. The second class are the Devarṣis—Nārada and others. The third class are the Brahmarṣis Bhṛgu and others. Others give a different classification, Bhṛgu is there a Mānasa-putra which is then the same as Brahmarṣi. Another class of Ṛṣis is the King's who are Ṛṣis (Rājarṣi).

ऋणविमुक्त्यर्थं ये देवा ऋषयश्च पूज्यास्तानाह देवा इत्यादिना। ब्रह्मा च विष्णुश्च स्वगणैः सह रुद्रश्चैते देवाः संन्यासकर्मणि पूज्याः। सनक आद्यो येषां ते सनकाद्याः सनकसनन्दनसनातनाद्याः सनकसजातीया ऋषयः तथा देवर्षयो नारदादयो ब्रह्मर्षयो भृग्वादयश्च पूज्याः।

By the Devas are meant Brahmā, Viṣṇu, and Rudra, with their followers[1]; by the Ṛṣis[2] are meant Sanaka and others, as also the Devarṣis[2] and the Brahmarṣis[2].

अत्र ये पितरः पूज्या वक्ष्यामि शृणु तानपि।। २३३।।

atra ye pitaraḥ pūjyā vakṣyāmi śṛṇu tānapi//

अत्र संन्यासकर्मणि।

Listen whilst I now enumerate the Ancestors[3] who should be worshipped.

पिता पितामहश्चैव प्रपितामह एव च।
माता पितामही देवि तथैव प्रपितामही।
मातामहादयोऽप्येवं मातामह्यादयोऽपि च।। २३४।।

pitā pitāmahaścaiva prapitāmaha eva ca/
mātā pitāmahī devi tathaiva prapitāmahī/
mātāmahādayo'pyevaṁ mātāmahyādayo'pi ca//

ऋणविमुक्त्यर्थं पूज्यान् पितृनेवाह पितेत्यादिना सार्द्धेना। एवं पित्रादिवन्माता-महादयोऽपि पूज्याः एवमन्वयः। आदिना प्रमातामहवृद्धप्रमातामहयोः प्रमातामहीवृद्ध-प्रमातामह्योश्च ग्रहणम्।

The father, paternal grandfather. paternal great-grand-father, mother, the maternal grandfather, and others in the ascending line, and the maternal grandmother and others in the ascending line.

प्राच्यामृषीन् यजेद्देवान् दक्षिणस्यां पितॄन् यजेत्।
मातामहान् प्रतीच्याञ्च पूजयेन्न्यासकर्मणि।। २३५।।

---

1. *Bhāratī* says that "their followers" should be "his", that is, Rudra's followers.
2. See p. 473 note 3.
3. Pitṛs.

prācyāmṛṣīn yajeddevān dakṣiṇasyāṁ pitṝn yajet/
mātāmahān pratīcyāñca pūjayennyāsakarmaṇi//

ननु कस्यां कस्यां दिशि देवानृषीन्। पितृंश्च पूजयेदित्यपेक्षायामाह प्राच्यामित्यादि। संन्यासकर्मणि देवानृषींश्च प्राच्यां पूर्वस्यां दिशि यजेत्। दक्षिणस्यां दिशि पितॄन् पित्रादीन् यजेत्। प्रतीच्यां पश्चिमायां दिशि मातामहान्मातामहप्रभृतीन् यजेत् पूजयेत्।

At the time of adoption of the life of an ascetic,[1] the Devas and Ṛṣis should be worshipped in the East, the paternal ancestors in in the South, the maternal ancestors in the West.

पूर्वादिक्रमतो दद्यादासनानां द्वयं द्वयम्।
देवादीन् क्रमतस्तत्राऽऽवाह्य पूजां समाचरेत्।। २३६।।

pūrvādikramato dadyādāsanānāṁ dvayaṁ dvayam/
devādīn kramatastatrā''vāhya pūjāṁ samācaret//

अथ संक्षेपतो देवादीनां पूजाया विधानमाह पूर्वादिक्रमत इत्यादिभिः। पूर्वादिक्रमतः पूर्वादिक्रमेण तिसृषु दिक्ष्वासनानां द्वयं द्वयं दद्यात्। तत्रासनानां द्वये द्वये क्रमतो देवादीनावाह्य तेषां पूजां समाचरेत् कुर्यात्।

Spreading two seats on each of these sides, beginning from the East, and invoking the Devas and others thereto, they should there be worshipped[2].

समर्च्य विधिवत्तेभ्यः पिण्डान् दद्यात् पृथक् पृथक्।
पिण्डप्रदानविधिना दत्त्वा पिण्डं यथाक्रमम्।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् पितृदेवताः।। २३७।।

samarcya vidhivattebhyaḥ piṇḍān dadyāt pṛthak pṛthak/
piṇḍapradānavidhinā dattvā piṇḍaṁ yathākramam/
kṛtāñjaliputo bhūtvā prārthayet pitṛdevatāḥ//

समर्च्येत्यादि। देवर्षिपितॄन् विधिवत् समर्च्य तेभ्यो देवर्षिपितृभ्यः पृथक् पृथक् पिण्डान् विधिवद्दद्यात्। वक्ष्यमाणेन पिण्डप्रदानविधिना देवादिभ्यो यथाक्रमं पिण्डं दत्त्वा कृताञ्जलिपुटो भूत्वा पितृदेवताः प्रार्थयेत्।

---

1. Nyāsa-karma=Saṁnyāsa-karma.
2. That is, the Devas and Ṛṣis in the East, the paternal Ancestors in the South, and the maternal Ancestors in the West. And each should be worshipped there separately.

Having worshipped them in proper form, Piṇḍas[1] should be offered to each of them separately according to the rules relating thereto. And then, with folded palms, let the disciple thus supplicate the Devas and Ancestors :

तृप्यध्वं पितरो देवा देवर्षिमातृका गणाः।
गुणातीतपदे यूयमनृणीकुरुताऽचिरात्।। २३८।।

tṛpyadhvaṁ pitaro devā devarṣimātṛkā gaṇāḥ/
guṇātītapade yūyamanṛṇīkurutā'cirāt//

Mantra

O Fathers! O Devas ! O Ṛṣis ! O Mothers! be you satisfied. Do you absolve me, about to enter upon the path of Renunciation[2] from all debts[3].

इत्यानृण्यमर्थयित्वा प्रणम्यं च पुनः पुनः।
ऋणत्रयविनिर्मुक्त आत्मश्राद्धं प्रकल्पयेत्।। २३९।।

ityānṛṇyamarthayitvā praṇamyaṁ ca punaḥ punaḥ/
ṛṇatrayavinirmukta ātmaśrāddhaṁ prakalpayet//

किं प्रार्थयेत्तत्राह तृप्यध्वमित्यादि। हे पितरो देवा देवर्षयो मातृगणाश्च यूयं तृप्यध्वं गुणातीतपदे अतिक्रान्तगुणे पदे व्रजन्तं मामचिरादतिशीघ्रमेव यूयमनृणी कूरुत।

Having thus prayed to be free from all debts, bowing again and again, and being thus freed of all debts, he should perform his own funeral rites[4].

पिता ह्यात्मैव सर्वेषां तत्पिता प्रपितामहः।
आत्मन्यात्मार्पणार्थाय कुर्यादात्मक्रियां सुधीः।। २४०।।

pitā hyātmaiva sarveṣāṁ tatpitā prapitāmahaḥ/
ātmanyātmārpaṇārthāya kuryādātmakriyāṁ sudhīḥ//

आत्मश्राद्धकरणे हेतुं दर्शयन्नाह पिता हीत्यादि। हि यतः सर्वेषामात्मैव पिता तत्पिता पितामहः प्रपितामहश्च स्यात् अतः आत्मनि परमात्मनि आत्मनोऽर्पणार्थाय सुधीर्विद्वान् आत्मक्रियां कुर्यात्।

---

1. Funeral cakes.
2. Guṇātīta-pada—literally, beyond the life of attrubutes.
3. *Vide* verse 232, *ante.*
4. Śrāddha in order to realize his severance from the world and o consign the individual Self (Ātmā) into the Supreme Self (paramātmā).

The father and paternal grandfather and great-grandfather are one's Self. In offering, therefore, the individual Self to the Supreme Spirit, he who is wise should perform his own funeral rites.

उत्तराभिमुखो भूत्वा पूर्ववत् कल्पितासने।
आवाह्याऽऽत्मपितॄन् देवि दद्यात् पिण्डं समर्चयन्।। २४१।।

uttarābhimukho bhūtvā pūrvavat kalpitāsane/
āvāhyā''tmapitṝn devi dadyāt piṇḍaṁ samarcayan//

संक्षेपतः आत्मनश्च श्राद्धस्य विधानमाह उत्तराभिमुख इत्यादिना। आत्मपितॄन् आत्मस्वरूपान् पित्रादीन्।

O Devī! sitting with his face to the North, and invoking the spirits of his ancestors[1] upon the seats which he has prepared for them, he should, after doing them homage, offer the funeral cakes[2].

प्रागग्रान् दक्षिणाग्रांश्च पश्चिमाग्रान् यथाक्रमात्।
पिण्डार्थमास्तरेद्दर्भानुदगग्रान् स्वकर्मणि।। २४२।।

prāgagrān dakṣiṇāgrāṁśca paścimāgrān yathākramāt/
piṇḍārthamāstareddarbhānudagagrān svakarmaṇi//

In so offering he should spread Kuśa grass with the ends towards the East,[3] South,[4] West,[5] and towards the North for himself[6].

समाप्य श्राद्धकर्माणि गुरुदर्शितवर्त्मना।
युयुक्षुश्चित्तशुद्ध्यर्थमिमं मन्त्रं शतं जपेत्।। २४३।।

samāpya śrāddhakarmāṇi gurudarśitavartmanā/
yuyukṣuścittaśuddhyarthamimaṁ mantraṁ śataṁ japet//

प्रागग्रानिति। पिण्डार्थं देवर्षिपित्रुद्देश्यकपिण्डदानार्थं यथाक्रमात् क्रमेणैव प्राक्

1. Who are his Sva-rūpa (Bhāratī).
2. Piṇḍa.
3. For the Devas the Ṛṣis. The Piṇḍas are placed on the Kuśa grass.
4. For the paternal Ancestors.
5. For the maternal Ancestors.
6. For his own Śrāddha, offering Piṇḍa to himself as dead.

प्राच्यां दिश्यग्राणि येषां तान् प्रागग्रान् दक्षिणाग्रान् पश्चिमाग्रांश्च दर्भान् कुशानास्तरे-दाच्छादयेत्। स्वकर्मणि आत्मश्राद्धक्रियायां तु उदक् उदीच्यामग्राणि येषां तथाभूतान् दर्भानास्तरेत्।

After completion, according to the directions of the Guru, of the funeral rites, the seeker after Liberation should, in order to purify his heart inwardly, recite the following Mantra a hundred times :

ह्रीँ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
ऊर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात्।। २४४।।

hrīṁ tryambakaṁ yajāmahe sugandhiṁ puṣṭivarddhanam/
ūrvārukamiva bandhanān mṛtyormukṣīya mā'mṛtāt//

तमेव मन्त्रमाह ह्रीँ त्र्यम्बकमित्यादिकम्।

Mantra

Hrīṁ, Let us worship Tryaṁbaka,[1] sweet-scented increaser of nourishment. May He free us from the bond of death just as the Urvaruka[2] is freed of its stalk. May He not cast us away from immortality.

उपासनानुसारेण वेद्यां मण्डलपूर्वकम्।
संस्थाप्य कलशं तत्र गुरुः पूजां समारभेत्।। २४५।।

upāsanānusāreṇa vedyāṁ maṇḍalapūrvakam/
saṁsthāpya kalaśaṁ tatra guruḥ pūjāṁ samārabhet//

उपासनेत्यादि। ततः उपासनाया अनुसारेण रचितायां वेद्यां मण्डलपूर्वकं कलशं संस्थाप्य तत्र कलशे शिष्यस्येष्टदेवतायाः पूजां गुरुः समारभेत्।

Then the reiigious Preceptor[3] should draw a Maṇḍala[4] on

---

1. Tryaṁbaka, which, according to Tarkālaṅkāra, means the Father of the three Devas—Brahmā, Viṣṇu, and Rudra—though the Ṛg-vidhāna uses it as an equivalent of Mahādeva (See Chpater v. 210).
2. A kind of melon (see as to mantra, Ṛg-veda, vii, 59, 12). See *ante*, p. 261.
3. Guru.
4. Maṇḍala, or diagram which should be that of the Iṣṭa-devatā of the disciple.

the altar of a shape in accordance with the form of worship of the Iṣṭa-devatā of the Sādhaka,[1] and then place the jar on the altar and commence worship.

ततस्तु परमं ब्रह्म ध्यात्वा शाम्भववर्त्मना।
विधाय पूजां ब्रह्मज्ञो वह्निस्थापनमाचरेत्।। २४६।।

tatastu paramaṁ brahma dhyātvā śāmbhavavartmanā/
vidhāya pūjāṁ brahmajño vahnisthāpanamācaret//

ततस्त्विति। ततस्तु शिष्येष्टदेवतापूजनादनन्तरं तु ब्रह्मज्ञो गुरुः परमं ब्रह्म ध्यात्वा शाम्भववर्त्मना तस्य पूजां च विधाय वेद्यां वह्निस्थापनमाचरेत् कुर्यात्।

Then the Guru, possessed of Brahma knowledge, should meditate upon and worship the Supreme Spirit in the manner prescribed by Śaṁbhu, and place fire on the altar.

प्रागुक्तसंस्कृते वह्नौ स्वकल्पोक्ताहुतिं गुरुः।
दत्त्वा शिष्यं समाहूय साकल्यं हावयेत्तु तम्।। २४७।।

prāguktasaṁskṛte vahnau svakalpoktāhutiṁ guruḥ/
dattvā śiṣyaṁ samāhūya sākalyaṁ hāvayettu tam//

प्रागुक्तेत्यादि। ततः प्रागुक्तेन विधिना संस्कृते वह्नौ स्वकल्पोक्ताहुतिं स्वस्वकल्पे उक्तामाहुतिं दत्त्वा गुरुस्तं शिष्यं समाहूय तेन साकल्यमग्नौ हावयेत्।

The Guru should then offer unto the fire so sanctified the oblation according to his own Kalpa,[2] and then make his disciple perform the complete Homa[3].

आदौ व्याहृतिभिर्हुत्वा प्राणहोमं प्रकल्पयेत्।
प्राणापानौ समानश्चोदानव्यानौ च वायवः।। २४८।।

ādau vyāhṛtibhirhutvā prāṇahomaṁ prakalpayet/
prāṇāpānau samānaścodānavyānau ca vāyavaḥ//

आदाविति। आदौ प्रथमतो भूरादिभिर्व्याहृतिभिः साकल्यं हुत्वा ततः प्राणहोमं शरीरस्थप्राणादिपञ्चवायुहोमं प्रकल्पयेत् कुर्यात्। होतव्यान् प्राणादीन् पञ्चवायूनाह प्राणेत्याद्यर्द्धेन।

---

1. That is, the shape of the figure will vary with the Devatā worshipped. The Vedī or altar should be made according to the form of worship.
2. See *post*, under ch. x, v. 139.
3. Sākala-Homa—the universal oblation or sacrifice to Fire.

He should first offer oblation with the Vyāhṛtis, and then with the vital airs, Prāṇa, Apāna, Samāna, Udāna, Vyāna[1].

तत्त्वहोमं ततः कुर्याद्देहात्माध्यासमुक्तये।
पृथिवी सलिलं वह्निर्वायुराकाशमेव च।। २४९।।

tattvahomaṁ tataḥ kuryāddehātmādhyāsamuktaye/
pṛthivī salilaṁ vahnirvāyurākāśameva ca//

तत्वेति। ततः परं देहात्माध्यासमुक्तये शरीरनिष्ठात्मत्वज्ञानविमुक्त्यर्थं यथाक्रमं तत्त्वहोमं पृथ्वीजलादिचतुर्विंशतितत्त्वहवनं कुर्यात्। क्रमेणैव हवनीयानि चतुर्विंशति-तत्त्वान्येवाह पृथिवीत्यादिनाऽहङ्कार इत्यन्तेन किञ्चिदधिकेन सपादद्वयेन।

गन्धो रसश्च रूपश्च स्पर्शः शब्दो यथाक्रमात्।
ततो वाक्पाणिपादाश्च पायूपस्थौ ततः परम्।। २५०।।

श्रोत्रं त्वङ्नयनं जिह्वा घ्राणं बुद्धीन्द्रियाणि च।
मनो बुद्धिश्च चित्तञ्चाहङ्कारो देहजाः क्रियाः।। २५१।।

gandho rasaśca rūpaśca sparśaḥ śabdo yathākramāt/
tato vākpāṇipādāśca pāyūpasthau tataḥ param//
śrotraṁ tvaṅnayanaṁ jihvā ghrāṇaṁ buddhīndriyāṇi ca/
mano buddhiśca cittañcāhaṅkāro dehajāḥ kriyāḥ//

गन्ध इत्यादि। पृथिव्यादिपञ्चतत्त्वहवनानन्तरं गन्धादिपञ्चतत्त्वानि यथाक्रमात् होतव्यानि। ततो वागादिपञ्चकर्मेन्द्रियाणि हवनीयानि। ततः परं श्रोत्रादीनि पञ्चबुद्धीन्द्रि-याणि होतव्यानि। ततो मन आदीनि चत्वारि तत्त्वानि हवनीयानि। ततो देहजाः क्रियाः होतव्याः।

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि यानि च।। २५२।।

sarvāṇīndriyakarmāṇi prāṇakarmāṇi yāni ca//

सर्वाणीति। ततः सर्वाणीन्द्रियकर्माणि यानि च प्राणकर्माणि तान्यपि हवनीयानि।

एतानि मे पदान्ते च शुद्ध्यन्तां पदमुच्चरेत्।
ह्रीँ ज्योतिरहं विरजा विपाप्मा भूयासमित्यपि।। २५३।।

etāni me padānte ca śuddhyantāṁ padamuccaret/
hrīṁ jyotirahaṁ virajā vipāpmā bhūyāsamityapi//

प्राणादिपञ्चवायूनां पृथिव्यादिचतुर्विंतितत्त्वानां देहजक्रियाणां सर्वेन्द्रियकर्मणां

1. The Vyāhṛti are Bhūḥ, Bhuvaḥ, Svaḥ. See p. 483, note 1.

प्राणादिवायुकर्मणाञ्च होमस्य मन्त्रमाह एतानीत्यादिना। पूर्वं एतानि मे इत्युच्चरेत्। तत्पदान्ते च शुद्ध्यन्तामिति पदमुच्चरेत्। ततो ह्रीँ ज्योतिरहं विरजा विपाप्मा भूयासमित्युच्चरेत्। ततो द्विठः स्वाहेत्यप्युच्चरेत्। योजनया एतानि मे शुद्ध्यन्तां ह्रीँ ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहेति मन्त्रो जातः। अनेनैव प्राणादीनि प्राणकर्मपर्यन्तानि सर्वाणि जुहुयात्। यथा प्राणापानसमानोदानव्याना मे शुद्ध्यन्तां ह्रीँ ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहेति प्राणादीन् जुहुयादिति। एवं सर्वत्र योजना।

For the destruction of the false belief that the body, whether gross or subtle, is the Ātmā, the Tattva-Homa[1] should be performed, uttering the following words :

Mantra

"Earth, Water, Fire, Air, Ether; (then) Smell, Taste, Vision, Touch, Hearing; (then) Mouth, Hands, Feet, Anus, and Organ of generation; (then) Ears, Skin, Eyes, Tongue, and Smell; (then) Manas, Buddhi, Ahaṅkāra, and Citta;[2] (and lastly) all involuntary acts, the functions of the senses and of life,[3]

He should then say (after each group) :

"May all these of mine be purified;" (adding)

"Hrīṁ :[4] I am the Light, may I be free from Desire[5] and from the Sin of Ignorance : Svāhā"[6].

चतुर्विंशतितत्त्वानि कर्माणि दैहिकानि च।
हुत्वाऽग्नौ निष्क्रियो देहं मृतवच्चिन्तयेत्ततः।। २५४।।

---

1. *Cf.* Tattva-śuddhi, Chapter VI, verse 53.
2. Constituting the mental Self, or Antaḥkaraṇa.
3. The twenty-four Tattvas have been grouped under their different heads—(five) Pṛthivī, Salila, Vahni, Vāyu, Ākāśa; (five) Gandha, Rasa, Rūpa, Sparśa, Śabda; (five) Vāk, Pāṇi, Pāda, Pāyu, Upastha; (five) Śrotra, Tvak, Nayana, Jihvā, Ghrāṇa; (four) Manas, Buddhi, Citta, Ahaṅkāra.
4. Or Mahā-māyā. The union of Cit (Śiva) and (Śakti) that is "May I be like unto the universal Caitanya united with Hrīṁ."
5. Virajā, that is free from Rajoguṇa which is the impulse to action.
6. Vipāpmā, the "Sin" being Avidyā. This should be repeated at the end of each of the seven groups and an oblation made into fire. The seven groups include that of the vital airs. This rite resembles Tattva-śuddhi. See p. 284, note 4, *Cf.* A. Avalon's *Serpent Power*, v. 40.

caturviṁśatitattvāni karmāṇi daihikāni ca/
hutvā'gnau niṣkriyo dehaṁ mṛtavaccintayettataḥ//

चतुर्विंशतीत्यादि। एवं चतुर्विंशतितत्त्वानि दैहिकानि कर्माणि चाग्नौ हुत्वा निष्क्रियः क्रियाभ्यश्च निष्क्रान्तो भूत्वा ततो देहं मृतवच्चिन्तयेत्।

Having consigned as oblations into the fire the twentyfour Tattvas and the functions of the body, he who is now actionless should consider his body as dead.

विभाव्य मृतवत् कायं रहितं सर्वकर्मणा।
स्मरंस्तत् परमं ब्रह्म यज्ञसूत्रं समुद्धरेत्।। २५५।।

vibhāvya mṛtavat kāyaṁ rahitaṁ sarvakarmaṇā/
smaraṁstat paramaṁ brahma yajñasūtraṁ samuddharet//

विभाव्येति। सर्वकर्मणा रहितं मृतवच्च कायं देहं विभाव्य विचिन्त्य तत् जगत्कारणत्वेनातिप्रसिद्धं परमं ब्रह्म स्मरन् सन् यज्ञसूत्रं यज्ञोपवीतं समुद्धरेत् उरःस्थलात् स्कन्धं नयेत्।

Considering his body as dead and devoid of all function, and calling to mind the Supreme Brahman, let him take off his sacred thread.

ऐँ क्लीँ हूँ इति मन्त्रेण स्कन्धादुत्तार्य तत्त्ववित्।
यज्ञसूत्रं करे कृत्वा पठित्वा व्याहृतित्रयम्।
वह्निजायां समुच्चार्य घृताक्तमनले क्षिपेत्।। २५६।।

aiṁ klīṁ hūṁ iti mantreṇa skandhāduttārya tattvavit/
yajñasūtraṁ kare kṛtvā paṭhitvā vyāhṛtitrayam/
vahnijāyāṁ samuccārya ghṛtāktamanale kṣipet//

ऐमित्यादि। ततः तत्त्ववित् ब्रह्मविज्जनः ऐँ क्लीँ इमिति मन्त्रेण यज्ञसूत्रं स्कन्धादुत्तार्य करे हस्ते च कृत्वा व्याहृतित्रयं पठित्वा व्याहृतित्रयान्ते च वह्निजायां स्वाहेति पदं समुच्चार्य घृताक्तं घृतसंयुक्तं यज्ञसूत्रमनलेऽग्नौ क्षिपेत्।

He, the knower of the Tattva, should take it from his shoulder, uttering the

Mantra

Aiṁ Klīṁ Haṁsaḥ

Holding it in his hand while he recites the three Vyāhṛtis,[1] ending with Svāhā, let him throw it steeped in ghee into the fire.

हुत्वैवमुपवीतञ्च कामबीजं समुच्चरन्।
छित्वा शिखां करे कृत्वा घृतमध्ये नियोजयेत्।। २५७।।

hutvaivamupavītañca kāmabījaṁ samuccaran/
chitvā śikhāṁ kare kṛtvā ghṛtamadhye niyojayet//

हुत्वेति। एवं प्रकारेणोपवीतं यज्ञसूत्रमग्नौ हुत्वा कामबीजं क्लीमिति बीजं समुच्चरन् सन् शिखां छित्त्वा करे च कृत्वा घृतमध्ये नियोजयेत् स्थापयेत्।

Having thus offered the sacred thread as an oblation to the fire, he should, whilst uttering the Kāma-Bija[2] cut off his crown-lock[3] and take and place it in the ghee[4] [with the]

ब्रह्मपुत्रि शिखे त्वं हि बालरूपा तपस्विनी।
दीयते पावके स्थानं गच्छ देवि नमोऽस्तु ते।। २५८।।

brahmaputri śikhe tvaṁ hi bālarūpā tapasvinī/
dīyate pāvake sthānaṁ gaccha devi namo'stu te//

Mantra

O Crown Lock! Daughter of Brahman! thou art an ascetic[5] in the form of hair. I am now giving thee a place in the Purifying One.[6] Depart, O Devī! I make obesiance to thee.

कामं मायां कूर्चमन्त्रं वह्निजायामुदीरयन्।
तस्मिन् सुसंस्कृते वह्नौ शिखाहोमं समाचरेत्।। २५९।।

kāmaṁ māyāṁ kūrcamantraṁ vahnijāyāmudīrayan/
tasmin susaṁskṛte vahnau śikhāhomaṁ samācaret//

---

1. The seven Lokas which are the seven limbs of Praṇava are collectively called Mahā-vyāhṛti. Homa with the first three is called Vyāhṛti Homa. The seven Lokas are: Bhūḥ, Bhuvaḥ, Svaḥ, Mahaḥ, Jana, Tapas, Satya. They have their places in the human body. (See A. Avalon's *Serpent Power*).
2. Klīṁ.
3. See pp. 299, note 2, 384 note 4.
4. Clarified butter.
5. Tapasvinī—feminine of Tapas-vin, one who has performed penances.
6. Pāvaka=the purifier, *i.e.*, Fire.

He should then, whilst uttering the Kāma,[1] Māyā,[2] Kūrca,[3] and Astra[4] Bījas, ending with the Mantra Svāhā, make the Homa[5] sacrifice of that lock of hair in the sanctified fire.

शिखामाश्रित्य पितरो देवा देवर्षयस्तथा।
सर्वाण्याश्रमकर्माणि निवसन्ति शिखोपरि।। २६०।।

śikhāmāśritya pitaro devā devarṣayastathā/
sarvāṇyāśramakarmāṇi nivasanti śikhopari//

ब्रह्मेति। ततो ब्रह्मपुत्रि इत्याद्यं नमोऽस्तुते इत्यन्तं मन्त्रमुदीरयन् एतन्मन्त्रान्ते च कामं क्लीमितिमायां ह्रीमिति कूर्चं हूमिति अस्त्रं फडिति वह्नि जायां स्वाहेति च बीजं कीर्त्तयन् तस्मिन् सुसंस्कृते वह्नौ शिखाया होमंसमाचरेत् कुर्यात्।

The Pitṛs, Devas, and Devarṣis,[6] as also all acts performed in the worldly stage of life,[7] reside in that lock and have it as their support.

अतः सन्तर्प्य ताः सर्वा देवर्षिपितृदेवताः।
शिखासूत्रपरित्यागाद्देही ब्रह्ममयो भवेत्।। २६१।।

ataḥ santarpya tāḥ sarvā devarṣipitṛdevatāḥ/
śikhāsūtraparityāgāddehī brahmamayo bhavet//

ब्रह्ममयो ब्रह्मस्वरूपः।

Therefore the man who renounces the crown-lock and sacred thread after the performance of the oblation becomes one with Brahman.

यज्ञसूत्रशिखात्यागात् संन्यासः स्यात् द्विजन्मनाम्।
शूद्राणामितरेषाञ्च शिखां हुत्वैव संस्क्रिया।। २६२।।

yajñasūtraśikhātyāgāt saṁnyāsaḥ syāt dvijanmanām/
śūdrāṇāmitareṣāñca śikhāṁ hutvaiva saṁskriyā//

---

1. Klīṁ.
2. Hrīṁ.
3. Hūṁ.
4. Phaṭ.
5. Śikhā-Homa.
6. See p. 473, no. 3.
7. Āśramas. Or "previos stage," if, as according to the Āgama, there, are, now, but two stages.

The twice-born enter the stage of an ascetic by renunciation of the crown-lock and sacred thread, and the Śūdras and Sāmānyas by the renunciation of the crown-lock[1] only.

ततो मुक्तशिखासूत्रः प्रणमेत् दण्डवद् गुरुम्।
गुरुरुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिदम्।। २६३।।

tato muktaśikhāsūtraḥ praṇamet daṇḍavad gurum/
gururutthāpya taṁ śiṣyaṁ dakṣakarṇe vadedidam//

द्विजन्मनाम् ब्राह्मणक्षत्रियवैश्यानाम् इतरेषाम् वर्णसङ्कराणाम्।

तत्त्वमसि महाप्राज्ञ हंसः सोऽहं विभावय।
निर्ममो निरहङ्कारः स्वभावेन सुखं चर।। २६४।।

tattvamasi mahāprājña haṁsaḥ so'haṁ vibhāvaya/
nirmamo nirahaṅkāraḥ svabhāvena sukhaṁ cara//

ननु गुरुः शिष्यस्य दक्षिणे कर्णे किं वदेदित्यपेक्षायामाह तत्त्वमसीत्यादि। हे महाप्राज्ञ महामनीषिन् तत् जगत्कारणत्वेनातिप्रसिद्धं परं ब्रह्म त्वमेवासि अतोऽहमेव स परमात्मा स एवाहमस्मीति त्वं विभावय विचिन्तय। किञ्च निर्ममः पुत्रादिविषयकममताशून्यो निरहङ्कारो विद्यादिविषयनिमित्तकचित्तसनुन्नतिशून्यश्च सन् स्वभावेन सुखं यथा स्यात्तथा चर इतस्ततो गच्छ। अहमित्यस्यादेर्लोपस्त्वार्षः।

Then he whose crown-lock and sacred thread have been thus removed should make obeisance to the Guru, laying himself full length upon the ground. The Guru should then raise his disciple and say into his right ear : "O wise one! Thou art That.[2] Think within thyself 'I am He'[3] and 'He is I'.[4] Free from all attachments[5] and sense of Self,[6] do thou go as thou pleasest as moved thereto by thy nature"[7].

ततो घटञ्च वह्निञ्च विसृज्य ब्रह्मतत्त्ववित्।
आत्मस्वरूपं तं मत्वा प्रणमेच्छ्रसा गुरुः।। २६५।।

---

1. These classes have no thread, which is worn by the "twice-born" only.
2. Tat tavm asi, the Mahā-vākya or Great Word of the Upaniṣads.
3. Haṁsaḥ : Ahaṁ+Saḥ, the A being deleted.
4. So'haṁ is Haṁsaḥ reversed.
5. Nir-mama—literally, devoid of the sense of mineness.
6. Nir-ahaṅkāra.
7. Sva-bhāva, which is now divine.

tato ghaṭañca vahniñca visṛjya brahmatattvavit/
ātmasvarūpaṁ taṁ matvā praṇamecchirasā guruḥ//

तत इति। ततः परं घटं वह्निञ्च विसृज्य ब्रह्मतत्त्वविद गुरुस्तं शिष्यमात्मस्वरूपं मत्वा वक्ष्यमाणमन्त्रेण शिरसा प्रणमेत्।

The Guru, knower of the Brahman, should then, after removal of the jar and the fire, bend his head in obeisance to the disciple, recognizing in him, his own very Self[1].

नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः।
त्वमेव तत् तत्त्वमेव विश्वरूप नमोऽस्तु ते।। २६६।।

namastubhyaṁ namo mahyaṁ tubhyaṁ mahyaṁ namo namaḥ/
tvameva tat tattvameva viśvarūpa namo'stu te//

येन मन्त्रेण प्रणमेत् तमेव मन्त्रमाह नमस्तुभ्यमित्यादिकम्।

and say :

"O Thou whose form is this Universe![2] bow to Thee and to Myself. To Thee and Me I bow again and again. Thou art 'That' and 'That' is Thou. Again I bow to Thee."

ब्रह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम्।
स्वमन्त्रेण शिखाच्छेदात् संन्यासग्रहणं भवेत्।। २६७।।

brahmamantropāsakānāṁ tattvajñānāṁ jitātmanām/
svamantreṇa śikhācchedāt saṁnyāsagrahaṇaṁ bhavet//

ब्रह्ममन्त्रोपासकानां तु संन्यासग्रहणे विशेषविधिमाह ब्रह्ममन्त्रेत्यादिना। तत्त्वज्ञानां ब्रह्मज्ञानिनां जितात्मनां जितमनसां ब्रह्ममन्त्रोपासकानां स्वमन्त्रेण शिखाच्छेदादेव संन्यासग्रहणं भवेत्।

The worshippers of the Brahma-Mantra, who know the Tattva and have conquered themselves, attain the stage of an ascetic by cutting off the crown-lock with their own Mantra[3].

ब्रह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः।
स्वेच्छाचारपराणां तु प्रत्यवायो न विद्यते।। २६८।।

---

1. Ātma-svarūpa, which may also mean Brahman, which is the same thing.
2. Viśva-rūpa.
3. That is, the Brahma-Mantra. See p. 466, note 1.

brahmajñānaviśuddhānāṁ kiṁ yajñaiḥ śrāddhapūjanaiḥ/
svecchācāraparāṇāṁ tu pratyavāyo na vidyate//

ननु यज्ञश्राद्धादिकमकृत्वैव संन्यासं गृह्णतां ब्रह्ममन्त्रोपासकानां प्रत्यवायभागित्वं स्यात्तत्राह ब्रह्मज्ञानेत्यादि।

What need is there of sacrificial[1] or funeral[2] rites or ritual worship[3] for those purified by divine knowledge.[3] For those, who act as they please, there is no fault[4].

ततो निर्द्वन्द्वरूपोऽसौ निष्कामस्थिरमानसः।
विहरेत् स्वेच्छया शिष्यः साक्षाद् ब्रह्ममयो भुवि।। २६९।।

tato nirdvandvarūpo'sau niṣkāmasthiramānasaḥ/
viharet svecchayā śiṣyaḥ sākṣād brahmamayo bhuvi//

निर्द्वन्द्वरूपः सुखदुःखादियुगलानि द्वन्द्वानि तद्रहितो निर्द्वन्द्वस्तत्स्वरूपः।

The disciple, devoid of all contraries;[5] of tranquil mind because desireless, may, as he pleases, roam the earth, the visible image of Brahman.

आब्रह्मस्तम्बपर्यन्तं सदूपेण विभावयन्।
विस्मरन्नामरूपाणि ध्यायन्नात्मानमात्मनि।। २७०।।

ābrahmastambaparyantaṁ sadrūpeṇa vibhāvayan/
vismarannāmarūpāṇi dhyāyannātmānamātmani//

आब्रह्मस्तम्बपर्यन्तं ब्रह्मारभ्य तृणादिगुच्छपर्यन्तं सदूपेण सत्यरूपेण विभावयन् विचिन्तयन्।

He will think of everything, from Brahma to a blade of grass, as the form of the Brahman,[6] and, meditating upon the Supreme in himself, will forget all name and form.

---

1. Yajña.
2. Śrāddha. Pūjana. On the contrary, disjunctive knowledge is inherent in ceremonial ordinances.
3. Brahma-jñāna-viśuddhānāṁ : that is, for those whose nature is purified by the knowledge of Brahma tattva.
4. Pratyavāya from prati+ava+i=to go downwards; hence detriment, decrease, omission, fault, etc. Such a one acts prompted by the divine light in him.
5. *i.e.*, devoid of the sense of happiness and misery, etc.
6. Sat=Truth, Being=Brahman.

अनिकेतः क्षमावृत्तो निःशङ्कः सङ्गवर्जितः।
निर्ममो निरहङ्कारः संन्यासी विहरेत् क्षितौ।। १७१।।

aniketaḥ kṣamāvṛtto niḥśaṅkaḥ saṅgavarjitaḥ/
nirmamo nirahaṅkāraḥ saṁnyāsī viharet kṣitau//

अनिकेत इत्यादि। अनिकेतः नियतवासशून्यः। क्षमावृत्तः क्षमैव वृत्तं यस्य सः। निःशङ्कः उद्वेगरहितः। सङ्गवर्जितः क्वचिदप्यनासक्तः।

Homeless, merciful, fearless, devoid of attachment, claiming nothing as his own, devoid of egoism, the ascetic will move about the earth.

मुक्तो विधिनिषेधेभ्यो निर्योगक्षेम आत्मवित्।
सुखदुःखसमो धीरो जितात्मा विगतस्पृहः।। २७२।।

mukto vidhiniṣedhebhyo niryogakṣema ātmavit/
sukhaduḥkhasamo dhīro jitātmā vigataspṛhaḥ//

मुक्त इत्यादि। निर्योगक्षेमः अप्राप्तस्वीकारो योगः प्राप्तपरिरक्षणं क्षेमः ताभ्यां रहितः। सुखदुःखसंमः सुखदुःखे समे यस्य सः। जितात्मा जितदेहः। विगतस्पृहः उच्चावचेषु दृष्टमात्रेषु वस्तुषु इतस्ततो जिघृक्षा स्पृहाः विगता स्पृहा यस्य सः।

He is free of all injunctions and prohibitions. He shall not strive to attain what he has not, nor to protect what he has. He knows himself. He is equally unaffected by either joy or sorrow. He is calm, the conqueror of himself, and free from all desires.

स्थिरात्मा प्राप्तदुःखोऽपि खे प्राप्तेऽपि निष्पृहः।
सदानन्दः शुचिः शान्तो निरपेक्षो निराकुलः।। २७३।।

sthirātmā prāptaduḥkho'pi khe prāpte'pi niṣpṛhaḥ/
sadānandaḥ śuciḥ śānto nirapekṣo nirākulaḥ//

स्थिरेत्यादि। स्थिरात्मा स्थिरचित्तः स्थिरस्वभावो वा। निष्पृहः भोगाकाङ्क्षाशून्यः। शुचिः बाह्याभ्यन्तरशौचसम्पन्नः। शान्तः संयतान्तःकरणः। निरपेक्षः परापेक्षारहितः। निराकुलः आकुलताशून्यः।

नोद्वेजकः स्याज्जीवानां सदा प्राणिहिते रतः।
विगतामर्षभीर्दान्तो निःसङ्कल्पो निरुद्यमः।। २७४।।

nodvejakaḥ syājjīvānāṁ sadā prāṇihite rataḥ/
vigatāmarṣabhīrdānto niḥsaṅkalpo nirudyamaḥ//

नेत्यादि। नोद्वेजकः न भीतिजनकः। विगतामर्षभीः अपगतक्रोधभयः। दान्तः संयतवाह्येन्द्रियः। निरुद्यमः स्वदेहनिर्वाहार्थव्यापारशून्यः।

His soul is untroubled even in sorrow, desireless even in prosperity. He is ever joyful, pure, calm, independent and unperturbed. He will hurt no living dung, but will be ever devoted to the good of all being. He is free from anger and fear, with his senses under control and without desire. He strives riot for the preservation of his body. He is not obsessed by any longing.

शोकद्वेषविमुक्तः स्यात् शत्रौ मित्रे समो भवेत्।
शीतवातातपसहः समो मानापमानयोः।। २७५।।

śokadveṣavimuktaḥ syāt śatrau mitre samo bhavet/
śītavātātapasahaḥ samo mānāpamānayoḥ//

शोकेत्यादि। शत्रौ मित्रे च समः एकरूपः मानापमानयोरपि समः हर्षविषादशून्य इत्यर्थः।

He will be free from grief and resentment, equal to friend and foe, patient in the endurance of cold and heat, and to him both honour and disgrace are one and the same.

समः शुभाशुभे तुष्टो यदृच्छप्राप्तवस्तुना।
निस्त्रैगुण्यो निर्विकल्पो निर्लोभः स्यादसञ्चयी।। २७६।।

samaḥ śubhāśubhe tuṣṭo yadṛcchāprāptavastunā/
nistraiguṇyo nirvikalpo nirlobhaḥ syādasañcayī//

सम इत्यादि। निस्त्रैगुण्यः त्रयो गुणा यस्मिन् स त्रिगुणः सकामः तस्य भावस्त्रैगुण्यम् तस्मान्निष्क्रान्तो निस्त्रैगुण्यः निष्कामः इत्यर्थः। निर्विकल्पः नानाविधकल्पनाशून्यः। निर्लोभः धनाद्यागमे बहुधा जायमानेऽपि पुनर्वर्द्धमानोऽभिलाषो लोभः तद्रहितः। असञ्चयी तत्तद्वस्तुसञ्चयाभाववान्।

He is the same in good or evil fortune, pleased with whatsoever, without effort, he may obtain.[1] He is beyond the

1. That is, whatever comes to him.

three attributes,[1] and ignorance,[2] free of covetousness, and (wealth) he will hoard not[3].

यथा सत्यमुपाश्रित्य मृषा विश्वं प्रतिष्ठति।
आत्माश्रितस्तथा देहो जानन्नेवं सुखी भवेत्।। २७७।।

yathā satyamupāśritya mṛṣā viśvaṁ pratiṣṭhati/
ātmāśritastathā deho jānannevaṁ sukhī bhavet//

यथेत्यादि। यथा सत्यं परमात्मानमेवोपाश्रित्यावलम्ब्य मृषा मिथ्याभूतमपि विश्वं प्रतिष्ठित सत्यवदास्ते तथैवात्मानमाश्रितो मिथ्याभूत एव देहः प्रतिष्ठति एवं जानन् संन्यासी सुखी भवेत्।

He will be happy in the knowledge that, as the unreal universe, which is not Sat, has its support in Sat or the Truth,[4] so the body has the Spirit as its support.

इन्द्रियाण्येव कुर्वन्ति स्वं स्वं कर्म पृथक् पृथक्।
आत्मा साक्षी विनिर्लिप्तो ज्ञात्वैवं मोक्षभाग् भवेत्।। २७८।।

indriyāṇyeva kurvanti svaṁ svaṁ karma pṛthak pṛthak/
ātmā sākṣī vinirlipto jñātvaivaṁ mokṣabhāg bhavet//

इन्द्रियाणीति। इन्द्रियाण्येव पृथक् पृथक् स्वं स्वं कर्म कुर्वन्ति। आत्मा तु साक्षी केवलं शुभाशुभकर्मणां द्रष्टा भवति। अतएव निर्लिप्तः तत्तत्कर्मभिर्बद्धो न भवति। एवं ज्ञात्वैव संन्यासी मोक्षभाग् भवेत्।

---

1. Nis-traiguṇya. Tri-guṇa, the three qualities of manifested being, are Sattva, Rajas, Tamas. The state of possession of the three qualities is Traiguṇya, which is Sakāma and that of freedom from them Nis-traiguṇya.
2. Nir-vikalpa, which, Bhāratī says, means here devoid of imaginings (Kalpanā). Vikalpa, according to Yoga-Sūtra (i. 9), is a notion conveyed by mere words, but of which there is no corresponding real object.
3. Asañcayī. Asañcayī is a person who makes provision for the uncertainty of the future not necessarily in a bad sense. An Asañcayī leaves the furture to take care of itself. So Jesus said "Take no heed for the morrow"which is Yoga practice.
4. Satya—that is, the Supreme spirit=Paramātmā. Ātmā=Self or Spirit. "Supported" (Upāśritya) for the self is the support of all (Āśraya). In it which is the eternally enduring Sat are the changing passing forms which are Asat. The term unreal leads to misconception. Asat is the contrary of Sat, and Sat is that which endured. As to "Reality" see *World as Power* by the author.

He attains Liberation by the realization that the Spirit is completely detached from the organs of sense which function each its own way, and is the witness of that which is done[1].

धातुप्रतिग्रहं निन्दामनृतं क्रीडनं स्त्रिया।
रेतस्त्यागमसूयाञ्च संन्यासी परिवर्जयेत्।। २७९।।

dhātupratigrahaṁ nindāmanṛtaṁ krīḍanaṁ striyā/
retastyāgamasūyāñca saṁnyāsī parivarjayet//

The ascetic should not touch any metal, and should avoid calumny, untruth, jealousy, all dallying with woman, and all discharge of seed.

सर्वत्र समदृष्टिः स्यात् कीटे देवे तथा नरे।
सर्वं ब्रह्मेति जानीयात् परिव्राट् सर्वकर्मसु।। २८०।।

sarvatra samadṛṣṭiḥ syāt kīṭe deve tathā nare/
sarvaṁ brahmeti jānīyāt privrāṭ sarvakarmasu//

He should regard with an equal eye worms, men, and Devas. The ascetic wanderer should know that Brahman is in everything that is done.

विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम्।
देशं कालं तथा पात्रमश्नीयादविचारयन्।। २८१।।

viprānnaṁ śvapacānnaṁ vā yasmāttasmāt samāgatam/
deśaṁ kālaṁ tathā pātramaśnīyādavicārayan//

अनृतम् अयथार्थभाषणम्। असूयाम् सत्स्वपि गुणेषु दोषारोपणम्।

He should eat without making any distinction as to the fitness of place, time, or person, food whether it comes from a Vipra[2] or Caṇḍāla,[3] or from any other source or person whatsoever.

---

1. The intelligent man becomes aware that his spirit is distinct from the body, and in no way dependent on it (see Chapter III, part XII, of the Chāndogya-Upaniṣad). And so, according to the Vedānta—Ātmā sākṣī ceta kevalo nirguṇaśca—"the Spiriti is the one, intelligent, attributeless witness," and to its permanency is due, to use Kantian phraseology, the cause of "the synthetic unity of apperception."
2. *Vide*, p. 496, note 2.
3. *Vide* p. 91, note 3.

अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः।
अवधूतो नयेत् कालं स्वेच्छाचारपरायणः।। २८२।।

adhyātmaśāstrādhyayanaiḥ sadā tattvavicāraṇaiḥ/
avadhūto nayet kālaṁ svecchācāraparāyaṇaḥ//

अध्यात्मशास्त्राध्ययनैः वेदान्तशास्त्रपाठैः। तत्त्वविचारणैः ब्रह्मतत्त्वविवेचनैः।

The ascetic, though passing his time as he pleases, should study the Scriptures relating to the Self[1] and in meditation upon the nature of That[2].

संन्यासिनां मृतं कायं दाहयेन्न कदाचन।
सम्पूज्य गन्धपुष्पाद्यैर्निखनेद्वाप्सु मज्जयेत्।। २८३।।

saṁnyāsināṁ mṛtaṁ kāyaṁ dāhayenna kadācana/
sampūjya gandhapuṣpādyairnikhanedvāpsu majjayet//

निखनेत् शुचौ भूमौ गर्त्तं विधाय तत्रैव निदध्यात्। अप्सु जलेषु।

The corpse of an ascetic should on no account be cremated. It should be worshipped with scents and flowers, and then either buried or sunk into water.

अप्राप्तयोगमर्त्यानां सदा कामाभिलाषिणाम्।
स्वभावाज्जायते देवि प्रवृत्तिः कर्मसङ्कुले।। २८४।।

aprāptayogamartyānāṁ sadā kāmābhilāṣiṇām/
svabhāvājjāyate devi pravṛttiḥ karmasaṅkule//

अप्राप्तयोगमर्त्यानाम् न प्राप्तो योगो ब्रह्मज्ञानसंबन्धो यैस्तथाभूतानाम्। कर्मसङ्कुले कर्मसमूहे।

O Devī! the inclination of those men who have not attained union with the Supreme Spirit,[3] and who ever seek after enjoyment, is by nature turned towards the path of action[4].

तत्रापि ते सानुरक्ता ध्यानार्चाजपसाधने।
श्रेयस्तदेव जानन्तु यत्रैव दृढनिश्चयाः।। २८५।।

---

1. Adhyātma-śāstra, such as the Vedānta and the like.
2. Tattva—that is, Brahma-tattva.
3. Aprāpta-yoga—that is, those who have not got Yoga, that is, Brahma-jñāna.
4. Karma—that is, Karma-kāṇḍa; in worship, ritualism.

tatrāpi te sānuraktā dhyānārcājapasādhane/
śreyastadeva jānantu yatraiva dṛḍhaniścayāḥ//

तत्रापि तत्रैवापि। अप्राप्तयोगमर्त्याः। सानुरक्ताः अनुरागवन्तः। तदेव अर्च्चादि-कर्मैव।

They remain attached to the practice of meditation, ritual worship, and recitation. Let them who are strong in their faith therein know that to be the best for them.

अतः कर्मविधानानि प्रोक्तानि चित्तशुद्धये।
नामरूपं बहुविधं तदर्थं कल्पितं मया।। २८६।।

ataḥ karmavidhānāni proktāni cittaśuddhaye/
nāmarūpaṁ bahuvidhaṁ tadarthaṁ kalpitaṁ mayā//

It is on account of them[1] that I have spoken of various rites for the purification of the heart, and have with the same object devised many names and forms[2].

ब्रह्मज्ञानादृते देवि कर्मसंन्यसनं बिना।
कुर्वन् कल्पशतं कर्म न भवेन्मुक्तिभाग् जनः।। २८७।।

brahmajñānādṛte devi karmasaṁnyasanaṁ binā/
kurvan kalpaśataṁ karma na bhavenmuktibhāg janaḥ//

O Devī! without knowledge of the Brahman and the abandonment of all action, man cannot attain Liberation, even though he performed countless such acts of worship[3].

---

1. That is, in the case of the Aprāpta-yoga.
2. As Śāṅkarācārya, in the Commentary on the Chāndogya Upaniṣad, says : "Rites are enjoined on one who is conscious of the nature of actor and recipient, and is subject to the defects of envy, anger, and the rest. Forms of knowledge contribute to the knowledge to the non-dual, and are easy of accomplishment. They are primarily propounded, and first of all adoration with ceremony, inasmuch as, mankind being habituated to ceremony, adoration without it is difficult. In the case, however, of him who has overcome disjunctive knowledge, there is no necessity for religious restraint, observances, or for penance (Tapas)."
3. Because, as stated, only non-dual knowledge liberates, and duality is inherent in ceremonial worship.

कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः।
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत्।। २८८।।

kulāvadhūtastattvajño jīvanmukto narākṛtiḥ/
sākṣānnārāyaṇaṁ matvā gṛhasthastaṁ prapūjayet//

The householder should consider the Kula ascetic, possessed of divine knowledge, to be the visible Nārāyaṇa[1] in the form of man, and should worship Him as such.

यतेर्दर्शनमात्रेण विमुक्तं सर्वपातकात्।
तीर्थव्रततपोदानसर्वयज्ञफलं लभेत्।। २८९।।

yaterdarśanamātreṇa vimuktaṁ sarvapātakāt/
tīrthavratatapodānasarvayajñaphalaṁ labhet//

।। इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्म्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे वर्णाश्रमाचारधर्मकथनं नामाष्टमोल्लासः।। ८।।

// iti śrīmahānirvāṇatantre sarvatantrottamottame sarvadharmmanirṇayasāre śrīmadādyāsadāśivasaṁvāde varṇāśramācāradharmakathanaṁ nāmāṣṭamollāsaḥ//

तदर्थम् अप्राप्तयोगमर्त्यार्थम्।

इति श्रीमहानिर्वाणतन्त्रटीकायां अष्टमोल्लासः।

By the mere sight of one who has subdued his passions[2] a man is freed of all his sins, and earns that merit which he obtains by journeying to places of pilgrimage, the giving of alms, and the performance of all vows, penances, and sacrifices.

End of the Eighth Chapter entitled "The Dharma and Customs of the Castes and Āśramas."

1. Viṣṇu as collective humanity.
2. Yati.

		Due date of Return	

the Vedic system. Neither the individual capacity of man nor the condition of the collective environment of modern societies is favourable to their practice. For the people of this age the Tantra Shāstra provides the most practicable and sure guide for the achievement of the goal of life. These preach not only for liberation from the hold of ignorance. Mukti, the basic usages for self-existence, self-affirmation and the delight of fulfilment of worldly enjoyment-Bhakti. The Tantras have certain special features which give it a wider appeal than the systems of the Veda. Firstly tantrism is catholic and open to all irrespective of their class or sex. No one is excluded from the shelter of Tantras because of his birth. Even a chandala has a right to be initiated.

This Tantra is to all other Āgama as Śiva is there to all other gods. The Mahanirvana Tantra, as now available consists of over 2500 verses in fourteen chapters. It is in the form of replies given by the lord Śiva to the Devi Parvati, On Mount Kailash, in answer to her urgent queries regarding the most appropriate Śāstra for men in the Kaliyuga.

First Edition : 2009
ISBN : 81-8315-067-5
Rs. 1800 (Set in Two Vols.)

ok Corporation
5824/7, New Chandrawal, Near Shiv Mandir,
Jawahar Nagar, Delhi-110007. (INDIA)
Phone : 91-11-23851294, 65195809
Fax : 91-011-23854870
E-mail : newbbc@indiatimes.com

Rs. 1800.00
(In 2 Vols.)